52 ^{a}) Da2 M °बाहू च — ^{b}) Ñ1 2 प्रिया च, S सुप्रीता (G2 6 °मना) K0 B3 सुवसुस्, Ñ3 B5 Da Dn च वपुस्; D5 सव°; T1 सुपदस् — ^{d}) K2 4 B6 Dn D1, G1 सुरसा, T2 G5 °नासा, G1 °नया, G4 °नसा K2 Ñ3 B3, 5 D2 अथ; B1 अथै (for च) K3 प्रमादिनी K4 सुरसाप्यप्रमादिनी

53 ^{a}) T2 G4 5 अन्या (for काम्या) Ś1 K1 3 स(K3 सा)रस्वती, T2 G4 5 द्वारवती — ^{b}) G1 सभ्रम (for सघ°) K0 °तुर्वननिर्झरे — ^{c}) D2 अनुजन्या — ^{d}) K0 Dn D1 5 कर्णिका; K3 T1 G (except G4 5) वर्णि°, Ñ1 2 B

अनुम्लोचा घृताची च विश्वाची पूर्वचित्त्यपि ।
उम्लोचेत्यभिविख्याता प्रम्लोचेति च ता दश ।
उर्वश्येकादशीत्येता जगुरायतलोचनाः ॥ ५४
धातार्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ।
इन्द्रो विवस्वान्पूषा च त्वष्टा च सविता तथा ॥ ५५
पर्जन्यश्चैव विष्णुश्च आदित्याः पावकार्चिषः ।
महिमानं पाण्डवस्य वर्धयन्तोऽम्बरे स्थिताः ॥ ५६
मृगव्याधश्च सर्पश्च निर्ऋतिश्च महायशाः ।
अजैकपादहिर्बुध्न्यः पिनाकी च परंतपः ॥ ५७
दहनोऽथेश्वरश्चैव कपाली च विशां पते ।
स्थाणुर्भवश्च भगवान्रुद्रास्तत्रावतस्थिरे ॥ ५८
अश्विनौ वसवश्चाष्टौ मरुतश्च महाबलाः ।
विश्वेदेवास्तथा साध्यास्तत्रासन्परिसंस्थिताः ॥ ५९
कर्कोटकोऽथ शेषश्च वासुकिश्च भुजंगमः ।
कच्छपश्चापकुण्डश्च तक्षकश्च महोरगः ॥ ६०
आययुस्तेजसा युक्ता महाक्रोधा महाबलाः ।
एते चान्ये च बहवस्तत्र नागा व्यवस्थिताः ॥ ६१
तार्क्ष्यश्चारिष्टनेमिश्च गरुडश्चासितध्वजः ।

अरुणश्चारुणिश्चैव वैनतेया व्यवस्थिताः ॥ ६२
तद्दृष्ट्वा महदाश्चर्यं विस्मिता मुनिसत्तमाः ।
अधिकां स ततो वृत्तिमवर्तन्पाण्डवान्प्रति ॥ ६३
पाण्डुस्तु पुनरेवैनां पुत्रलोभान्महायशाः ।
प्राहिणोद्दर्शनीयाङ्गीं कुन्ती त्वेनमथाब्रवीत् ॥ ६४

नातश्चतुर्थं प्रसवमापत्स्वपि वदन्त्युत ।
अतः परं चारिणी स्यात्पञ्चमे बन्धकी भवेत् ॥६५

स त्वं विद्वन्धर्ममिमं बुद्धिगम्यं कथं नु माम् ।
अपत्यार्थं समुत्क्रम्य प्रमादादिव भाषसे ॥ ६६

G. 1 4835 B. 1 123 78 K. 1 132 65

इति श्रीमहाभारते आदिपर्वणि चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

62, S repeats, with variation, 61^{ab} [v 1 तपसा (for तेज°) and °वेगा (for °क्रोधा)] — S ins after the *repetition* of 61^{ab}, D4 (marg. *sec m* om lines 2–3, 6–7, 11–12), after 62

1229* महान्पितामहस्त्वेनं वस्त्रेणारजसा तदा ।
प्रतिजग्राह नप्तारं राजर्षिपरिवारित. ।
सगरेणाम्बरीषेण नहुषेण ययातिना ।
धीमता धुन्धुमारेण राज्ञोपरिचरेण ह ।
मुचुकुन्देन मान्धात्रा शिबिनारिष्टनेमिना । [5]
भरतेन दिलीपेन सर्वैश्च जनमेजय ।
पूरु सार्धं नृपतिभिर्जग्राह कुरुपुंगवम् ।
अन्ये च बहवस्तत्र समासन्राजसत्तमा ।
एते चान्ये च बहवो नरलोकाधिपास्तथा ।
देवलोकादिहागम्य प्रैक्षन्त भरतर्षभम् । [10]
विद्योतमानं वपुषा भासयन्त दिशो दश ।
लक्षणैर्व्यञ्जितैर्युक्त सर्वैर्माहात्म्यसूचकैः ।

[(L. 1) M °जसावृत — (L 4) T1 G4 श्रीमता — (L 6) G5 भरतर्षभ (for जन°) — (L 8) D4 तत्रासन् — (L 9) Prior half = 61^{c}. T1 नरदेवा दिवौकस ; M गयाद्या राजसत्तमा — (L 12) T2 G1 5 व्यजनैर्]

— Ś1 K1 2 ins after 61 K0 3 4 Ñ B D, after 62 (D4, after 1229*)

1230* तांश्च देवगणान्सर्वांस्तप सिद्धा महर्षय ।
विमानगिर्यग्रगतान्ददृशुर्नेतरे जना ।

[(L 1) Ñ1 Da ताश्च Ñ1 दिव्यागना॰ सर्वा, Ñ3 B6 Da D2 दिव्यान्गणान्स°, D5 दिव्यग° — (L 2) K0 2 4 D5 °नवर्याग्र°; D2 °नमार्गाग्र°]

63 ^{ab}) S एन (T2 एतद्, G3 4–6 M5 एत) दृष्ट्वा महावीर्यं विस्मिता ऋषिस° — ^{c}) D5 एकैकस्मिन्; G6 अथ तस्य (for °कां स) K0 च, Ñ2 B1 D4 तु (for स) T G M1 तदा (G2 3 °था) Ñ1 2 B Da Dn3 D1, 2 4 प्रीतिं, G1 वृत्तं — ^{d}) N1 B6 अकुर्वन्, S वर्तते S पाडव प्रति (G6 ते तु पांडव) — After 63, D4 (marg *sec m*) S ins

1231* पाण्डु॰ प्रीतेन मनसा देवतादीनपूजयत् ।
पाण्डुना पूजिता देवा प्रत्यूचुर्नृपसत्तमम् ।
प्रादुर्भूतो ह्ययं धर्मो देवताना प्रसादज॰ ।
मातरिश्वा ह्ययं भीमो बलवानरिमर्दन ।
साक्षादिन्द्र स्वय जात प्रसादाच्च शतक्रतो. । [5]
पितृत्वाद्देवताना हि नास्ति पुण्यतरस्त्वया ।
पितॄणामृणमुक्तोऽसि स्वर्गं प्राप्स्यसि पुण्यभाक् ।
इत्युक्त्वा देवताः सर्वा विप्रजग्मुर्यथागतम् ।

[(L 4) G1 M6–8 °श्च स्वयं — (L 6) T1 पितॄणां देवताना च — (L 7) T2 G4 5 °मृणनिर्मुक्त॰, G2 6 धन्यस्त्वमचिरादेव — Before line 8, T2 G5 ins वैश°]

64 ^{a}) K0 Dn1 D4 G6 च (for तु) D5 °वैता, S °वार्यां. — ^{b}) Ś1 K1 महारथ, T2 G °बल — ^{c}) Ñ1 2 B D (except D5) वक्तुमैच्छद्धर्मपत्नीं; Ñ3 °नीयार्थां, S प्रादिशद्दर्शनीयार्थां (T1 तुरीये प्रादिशत्पुत्रे) — ^{d}) B1 °मभाषत

65 Before 65, D4 5 ins कुंत्युवाच, M6–8 कुंती — ^{a}) S वै (for अतश्च) Ś1 व्यसन (for प्रस°) — ^{b}) B5 प्र॰ (for अपि) S विदुरापत्सु भारत — ^{c}) K0 4 Ñ B D स्वैरिणी स्यात्, S अनाचार Cd cites चारिणी (as in text) — ^{d}) N (except B Da D2) transp पञ्चमे (Ś1 K1 °मी) and बन्ध° T G वर्धकी

66 ^{a}) S वै (for त्व) Ś1 धर्मं, K1 D5 S (except G1) विद्वान्; Da2 विदुर् Ś1 बुद्धिगम्य, K0 D5 T1 M5 °मिद; B6 °मंमेव — ^{b}) Ś1 विद्वन्निम, Ñ B D (except D5) अधिगम्य K0 3. 4 Da1 D1 तु (for नु) S सचोदयसि मां कथ — ^{c}) D2 °र्थं विवेकी सन्, S अपत्यलो॰(T1 G1 3 5 6 °ला)भारव राजन् — ^{d}) S प्रमत्त इव K3 जल्पसि (for भाष°) — After 66, D4 (marg *sec m.*) S ins

1232* पाण्डु ।
एवमेतद्धर्मशास्त्र यथा वदसि तत्तथा ।

[D4 पांडुरुवाच (for पाण्डु)]

Colophon *Major parvan* T2 G M संभव° (for

65

११५

वैशंपायन उवाच ।

कुन्तीपुत्रेषु जातेषु धृतराष्ट्रात्मजेषु च ।
मद्रराजसुता पाण्डुं रहो वचनमब्रवीत् ॥ १
न मेऽस्ति त्वयि संतापो विगुणेऽपि परंतप ।
नावरत्वे वरार्हायाः स्थित्वा चानघ नित्यदा ॥ २
गान्धार्याश्चैव नृपते जातं पुत्रशतं तथा ।
श्रुत्वा न मे तथा दुःखमभवत्कुरुनन्दन ॥ ३
इदं तु मे महद्दुःखं तुल्यतायामपुत्रता ।
दिष्ट्या त्विदानीं भर्तुर्मे कुन्त्यामप्यस्ति संततिः ॥ ४
यदि त्वपत्यसंतानं कुन्तिराजसुता मयि ।
कुर्यादनुग्रहो मे स्यात्तव चापि हितं भवेत् ॥ ५
स्तम्भो हि मे सपत्नीत्वाद्वक्तुं कुन्तिसुतां प्रति ।
यदि तु त्वं प्रसन्नो मे स्वयमेनां प्रचोदय ॥ ६

पाण्डुरुवाच ।

ममाप्येष सदा माद्रि हृद्यर्थः परिवर्तते ।
न तु त्वां प्रसहे वक्तुमिष्टानिष्टविवक्षया ॥ ७
तव त्विदं मतं ज्ञात्वा प्रयतिष्याम्यतः परम् ।
मन्ये ध्रुवं मयोक्ता सा वचो मे प्रतिपत्स्यते ॥ ८

वैशंपायन उवाच ।

ततः कुन्तीं पुनः पाण्डुर्विविक्त इदमब्रवीत् ।

कुलस्य मम संतानं लोकस्य च कुरु प्रियम् ॥ ९
मम चापिण्डनाशाय पूर्वेषामपि चात्मनः ।
मत्प्रियार्थं च कल्याणि कुरु कल्याणमुत्तमम् ॥ १०
यशसोऽर्थाय चैव त्वं कुरु कर्म सुदुष्करम् ।
प्राप्याधिपत्यमिन्द्रेण यज्ञैरिष्टं यशोऽर्थिना ॥ ११
तथा मन्त्रविदो विप्रास्तपस्तप्त्वा सुदुष्करम् ।
गुरूनभ्युपगच्छन्ति यशसोऽर्थाय भामिनि ॥ १२
तथा राजर्षयः सर्वे ब्राह्मणाश्च तपोधनाः ।
चक्रुरुच्चावचं कर्म यशसोऽर्थाय दुष्करम् ॥ १३
सा त्वं माद्रीं प्लवेनेव तारयेमामनिन्दिते ।
अपत्यसंविभागेन परां कीर्तिमवाप्नुहि ॥ १४
एवमुक्ताब्रवीन्माद्रीं सकृच्चिन्तय दैवतम् ।
तस्मात्ते भवितापत्यमनुरूपमसंशयम् ॥ १५
ततो माद्री विचार्यैव जगाम मनसाश्विनौ ।
तावागम्य सुतौ तस्यां जनयामासतुर्यमौ ॥ १६
नकुलं सहदेवं च रूपेणाप्रतिमौ भुवि ।

C 1 4851
B 1 124 17
K 1 133 18

1234* अनुगृह्णीष्व कल्याणि मद्रराजसुतामपि ।
— T1 om 9c–10b — c) D2 कुरुष्व (for कुल°) M6–8 चैव (for मम) — d) Ś1 कुलस्य च (sup lin as in text) Ñ3 प्रिय कुरु (by transp)
10 T1 om. 10ab (cf. v 1 9) — a) K0 3 4 Ñ2 B (except B1) Da D5 G3 5 6 वा, T2 G1.2 4 M अपि (for च) Ñ2 B6 Da पिंडदं सुश्रु, B1 पिंडदानाय, B3 5 पिंडद पुत्र, S (T1 om) पिंडलाभा (G5 °भावा) य — b) K0 Da सर्वेषाम् Ś1 K1.2 4 D5 अपि भामिनि, D1 अपि भाविनी, S (T1 om) च महात्मनां — c) T2 G2.4–6 हि (for च) — After 10, S ins
1235* कुलस्य पिण्डवृद्धिश्च कुलस्य कुलसंतति· ।
मम चेष्टस्य निर्वृत्तिस्तव चापि पर यश· ।
[(L 1) G1 °वृद्धीह; M6–8 °वृत्तिश्च — (L 2) M8 तवापि परमं यश·]
11 a) M6–8 शशंसोर्थाय (sic) — c) Ś1 K (except K0) Ñ3 °धिपत्य (Ñ3 °धिराज्य) ईंद्रेण, B1 3 Da प्रासाधि°, D4 T2 प्रासाधिपत्येनेंद्रेण, T1 G M प्राप्य दै (G1 3.6 M3 दे) वादपत्य च — d) D5 इष्ट्वा S यज्ञैरिष्ट्वा सहस्रश — After 11, T2 repeats 11cd with the reading of T1 G M
12 b) K1 तप· कृत्वा; G3 तपस्तत्तु Ś1 D4 5 M6–8 सुदुश्चर — After 12ab, G5, which (hapl.) om 12c–13d, ins 1236* — c) Ś1 कुरून् Ś1 K1 अभ्यवग°, T2 G3 अभ्युपग°, M6–8 अभ्युदय° — d) G3 यशसेर्थाय Ñ1.2 B D (except D2 4 5) भाविनि Ś1 K1 यशोर्थाय (K1 यशसेर्थे) यशस्विनि
13 G5 om 13 (cf v 1 12) — a) S (G5 om) ब्रह्मर्षय पूर्वे (M3 5 सर्वे) — b) K0 परंतपा (for तपो°) — d) Ś1 Ñ1 2 B1 3 D2 4 यशोर्थाय सुदुष्कर — S ins after 13 (G5, which om. 12c–13d, after 12ab)
1236* तथा राजर्षयो धीरा मनुवैन्यादय· पृथक् ।
यशोऽर्थं धर्मयुक्तानि चक्रु· कर्माणि शोभने ।
[(L 2) G1 य श्रोतु, G3–6 ययोक्त (for यशोऽर्थं) G1 तथा चक्रुश्च शो°]
14 a) G6 अद्य (for माद्रीं) Ś1 Ñ D (except Dn1 D2) S (except M3 5) प्लवेनैव; K0 °नेह — b) Ñ3 B1.6 D (except D2 4 5) T G तारयेनाम् — c) D5 °सम्प्रदानेन — d) Ñ1 प्रीतिं (for कीर्तिं) S °मवाप्स्यसि — After 14, D4 (marg sec m) S ins
1237* धर्मं वै धर्मशास्त्रोक्तं यथा वदसि तत्तथा ।
तस्मादनुग्रह माद्र्या कुरुष्व वरवर्णिनि ।
[Before line 1, D4 ins कुंत्युवाच, M6–8 कुंती — (L. 2) D4 तस्या , T1 माद्र्या, G1 मह्य D4 करोमि D4 कुरुनंदन, M नृपनंदन (for वर°)]
15 T1 G2–5 M om 15ab — a) K2–4 Ñ B1 3 Da1 Dn D1 G1 °मुक्त्वा Ś1 K0 D1 माद्री, Ñ3 कुंती, G1 स्नेहात् — b) K2 4 देवतां — D5 om 15cd — c) S (except T2) तत्र ते (G2–5 मे) — D4 (marg sec m) S ins after 15 D5, after 15ab
1238* कुन्त्या मद्रे कृते तस्मिन्विधिदृष्टेन कर्मणा ।
ततो राजसुता स्नाता शयने सविवेश ह ।
[Before line 1, T2 G1 2 M3 ins वैश° — (L 1) T2 G3–6 कुर्त्या D4 मन्त्रेण सा, G3 मन्त्रकृते — (L 2) T2 G3 4 स्नात्वा]
16 G2 om 16 — a) K0 3 Ñ3 T G1.4–6 M एका (M5 एत), Ñ1 2 B D (except Da D5) एव (for एव) G3 ततो माद्र्यपि चाप्येतौ — cd) K4 युवौ, G5 युतौ (for सुतौ) Ś1 Da3 तस्या G1 तथा च कुलापत्यार्थे प्रायुङ्क्त यलिमुत्तम — After 16, G1 ins 1239*
17 G1 om 17 — b) K3 वीर्येणाप्रतिमौ — c) S (G1 om) जातौ च ता° — d) G (G1 om) °वाचाद्भुतोपमौ — D4 (marg sec m) S ins. after 17 (G1, which om. 17, after 16)

[illegible] वाग्युवाचाशरीरिणी ॥ १७
सत्त्वरूपगुणोपेतौ भवतोऽन्याञ्जनानिति ।
भासतस्तेजसात्यर्थं रूपद्रविणसम्पदा ॥ १८
नामानि चक्रिरे तेषां शतशृङ्गनिवासिनः ।
भक्त्या च कर्मणा चैव तथाशीर्भिर्विशां पते ॥ १९
ज्येष्ठं युधिष्ठिरेत्याहुर्भीमसेनेति मध्यमम् ।
अर्जुनेति तृतीयं च कुन्तीपुत्रानकल्पयन् ॥ २०
पूर्वजं नकुलेत्येवं सहदेवेति चापरम् ।
माद्रीपुत्रावनु[illegible] विप्राः प्रीतमानसाः ।
अनुसंवत्सरं जाता अपि ते कुरुसत्तमाः ॥ २१
कुन्तीमथ पुनः पाण्डुर्माद्र्यर्थे समचोदयत् ।
तमुवाच पृथा राजन्रहस्युक्ता सती सदा ॥ २२
उक्ता सकृद्द्वन्द्वमेषा लेभे तेनास्मि वञ्चिता ।
बिभेम्यस्याः परिभवान्नारीणां गतिरीदृशी ॥ २३
नाज्ञासिषमहं मूढा द्वन्द्वाह्वाने फलद्वयम् ।
तस्मान्नाहं नियोक्तव्या त्वयैषोऽस्तु वरो मम ॥ २४

एवं पाण्डोः सुताः पञ्च देवदत्ता महाबलाः ।
संभूताः कीर्तिमन्तस्ते कुरुवंशविवर्धनाः ॥ २५
शुभलक्षणसंपन्नाः सोमवत्प्रियदर्शनाः ।
सिंहदर्पा महेष्वासाः सिंहविक्रान्तगामिनः ।
सिंहग्रीवा मनुष्येन्द्रा ववृधुर्देवविक्रमाः ॥ २६
विवर्धमानास्ते तत्र पुण्ये हैमवते गिरौ ।
विस्मयं जनयामासुर्महर्षीणां समेयुषाम् ॥ २७
ते च पञ्च शतं चैव कुरुवंशविवर्धनाः ।
सर्वे ववृधुरल्पेन कालेनाप्स्विव नीरजाः ॥ २८

इति श्रीमहाभारते आदिपर्वणि पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

११६

वैशंपायन उवाच ।
दर्शनीयांस्ततः पुत्रान्पाण्डुः पञ्च महावने ।
तान्पश्यन्पर्वते रेमे स्वबाहुबलपालितान् ॥ १
सुपुष्पितवने काले कदाचिन्मधुमाधवे ।
भूतसंमोहने राजा सभार्यो व्यचरद्वनम् ॥ २
पलाशैस्तिलकैश्चूतैश्चम्पकैः पारिभद्रकैः ।

C. 1. 4868
B. 1. 125. 3
K. 1. 124. 16

च (for ते) — d) = 28b Ko D4 T1 G (except G1 6) M5 कुल° — S ins. after 25 (M5, after 26cd)

1243* देवौजसः सत्त्ववन्तः सर्वशास्त्रविशारदाः ।
दिव्यसंहनना· सर्वे सर्वे भास्वरमूर्तयः ।
[(L. 1) G6 M6-8 सत्ववंत G2 M3.5 सर्वे शास्त्र° — (L. 2) G3 दिव्यसिंहासना — भास्करमू°]

26 Ś1 K1 D2 (hapl.) om. 26-28ab M5 transp. 26ab and 26cd, ins. 1243* between them — a) Ko शुभदर्शन°, T G3-6 M6-8 सर्व(T1 श्रुत-; G4 inf. lin. शुभ)लक्षण° — G4 om. 26cdef — c) G5 सिंहदंष्ट्रा — d) M8 सर्वे (for सिंह) — S (except G1.2, G4 om.) °चारिण· (for °गामिनः) — After 26cd, M5 ins. 1243*, while Ñ B D4.5 ins.

1244* सिंहोरस्का सिंहसत्त्वा सिंहाक्षा सिंहविक्रमा ।
[Ñ3 D4.5 सिंहास्या (for सिंहाक्षा)]

— e) T1 G2.3.6 M सिंहग्रीवा, T2 G5 सिंहाक्षाश्च, G1 सिंहसत्वा D4 G1.2.5 M8 °ध्येंद्र D5 सिंहसहनना धीरा — f) K2.4 D4 बभूवुर्, G3 ददृशुर् B3 D4 °वर्चस, S (G4 om.) °दर्शना (G2 °नदना, M6-8 °दर्शिन)

27 Ś1 K1 D2 om. 27 (cf. v. l. 26) — b) M8 दिव्ये (for पुण्ये) K4 Dn T1 हिमवते (Dn °वतो) — After 27, S (M5 om.) reads 19-21

28 Ś1 K1 D2 om. 28ab (cf. v. l. 26) — a) Ko.2 D4 M6-8 ते पच च; B1.3 एते पच; B6 ते तु पच, M6-8 (all inf. lin.) तत्र पच Da ते पचशतक चैव — b) = 25d D5 विप्रो प्रीतिविव° — Cd cites 28cd exactly as in text! — c) D4 बभूवुरल्पेन; T1 (corrupt) च पृथिवीराजन्, T2 G (except G3) ववृधिरे राजन्, M8.6 °धिरे वीरा — d) S (except M3.5) पकजा (M6-8 all inf. lin. नीरजा· as in text). — After 28, S ins. a passage of 62 lines given in App. I (No. 67), D5 ins. certain lines thereof after 1. 116. 1ab (q. v.)

Colophon om. in T G — *Major parvan* M संभव° (for आदि°) — *Sub-parvan* Ś1 K Ñ B1.5 Da D1 संभव — *Adhy. name* K2.4 माद्रीसुतोत्पत्ति, K3 Ñ1.2 B Da D2 पांडवोत्पत्ति, M3.5 नकुलसहदेवोत्पत्ति — *Adhy. no.* (figures, words or both) B1 122, Dn 123, D4 124, M 66 — *S'loka no.* Da1 Dn 31, M3 35 — *Aggregate s'loka no.* Dn2 4867

116

1 Ś1 Ko.1.3 D2.5 S om. उवाच (T2 G1.2.5 M3 om. the ref.) — ab) Ñ2 तदा (for तत). B6 G1 M3.5 पाडु पुत्रान् (by transp.). G3 पाडवांश्च (for पाण्डु· पञ्च) B6 महाबलान् (for °वने) — After 1ab, D5 ins. lines 4-44 of a (Southern) passage given in App. I (No. 67), ending with the colophon आदिपर्वणि ॥ २५ ॥ — c) Ś1 Da1 सर्वतो (for पर्व°) K3 B3.5 Dn D1.5 T2 G2.3.6 रम्ये (for रेमे) — d) K (except Ko) D5 °परिपालितान्, Ñ1 B1.3.5 Da D2.4 °बलशालिन, Ñ2 B6 Dn D1 °बलमाश्रित

2 a) K2.4 T1 G1 स, T2 G5 स (for सु) — b) S प्रवृत्ते म° — After 2ab, D5 S ins.

1245* पूर्णे चतुर्दशे वर्षे फल्गुनस्य च धीमत ।
तदा उत्तरफल्गुन्या प्रवृत्ते स्वस्तिवाचने ।

C 1 4868
B 1 125. 8
K 1 134 16

अन्यैश्च बहुभिर्वृक्षैः फलपुष्पसमृद्धिभिः ॥ ३
जलस्थानैश्च विविधैः पद्मिनीभिश्च शोभितम् ।
पाण्डोर्वनं तु संप्रेक्ष्य प्रजज्ञे हृदि मन्मथः ॥ ४
प्रहृष्टमनसं तत्र विहरन्तं यथामरम् ।
तं माद्र्यनुजगामैका वसनं बिभ्रती शुभम् ॥ ५
समीक्षमाणः स तु तां वयःस्थां तनुवाससम् ।
तस्य कामः प्रववृधे गहनेऽग्निरिवोत्थितः ॥ ६
रहस्यात्मसमां दृष्ट्वा राजा राजीवलोचनाम् ।
न शशाक नियन्तुं तं कामं कामबलात्कृतः ॥ ७
तत एनां बलाद्राजा निजग्राह रहोगताम् ।
वार्यमाणस्तया देव्या विस्फुरन्त्या यथाबलम् ॥ ८
स तु कामपरीतात्मा तं शापं नान्वबुध्यत ।
माद्रीं मैथुनधर्मेण गच्छमानो बलादिव ॥ ९
जीवितान्ताय कौरव्यो मन्मथस्य वशं गतः ।
शापजं भयमुत्सृज्य जगामैव बलात्प्रियाम् ॥ १०
तस्य कामात्मनो बुद्धिः साक्षात्कालेन मोहिता ।

रक्षणे विस्मृता कुन्ती व्यग्रा ब्राह्मणभोजने ।
पुरोहितेन सह सा ब्राह्मणान्पर्यवेषयत् ।
तस्मिन्काले समाहूय माद्रीं मदनमोहित ।

[(L 1) M8. 5 °नस्य महात्मन° — (L 2) G1. 2 4 तदा चोत्तर°, M8. 5 सदा सूत्तर° T2 G2 M8. 5 स्वस्तिवाचके — (L 3) D5 पांढोर् (for कुन्ती) — (L 4) D5 °हिते च सा कुती; T1 G3 6 M °हितेन सहिता]

— c) Ś1 Ko 1 भूतसमोदने; T1 मार° S काले — d) Ko 3 Ñ3 B1. 3 D4 S वने

3 a) Ko 4 D1 4 G4 पालाशैस् Ś1 तत्र (for चूतै) — Ñ2 B3. 6 Da D4. 5 S (except T1) ins after 3ab K4, after 3cd

1246* कर्णिकारैरशोकैश्च केशरैरतिमुक्तकैः ।

[K4 D4 केसरैर्, D5 बकुलैर्; S (except T1) मल्लिकैर्]

K4 Ñ2 Da D4 cont

1247* सदा कुरबकैश्चैव मत्तभ्रमरकूजितैः ।
चूतैर्मैञ्जिरिभिश्चैव पारिजातवनैरपि ।

After 1247*, K4 repeats 3cd, which is followed by

1248* परपुष्टोपसंघुष्टसंगीतैः षट्पदैरपि ।,

while D4 ins

1249* जम्बूदुस्वरसैहुण्डैर्वटैराम्रातकैर्धवैः ।
नीपार्जुनकदम्बैश्च बदरैर्नागकेसरैः ।
तमालैर्बिल्वकैस्तालैः पनसैर्वनकिंशुकैः ।
मत्तभ्रमरसंगीतकोकिलस्वनमिश्रितम् ।

After 1246*, D5 ins

1250* हिन्तालकदलीशालैः पनसैर्वनकिंशुकैः ।;

while S (except T1 G1) ins

1251* बकुलैस्तिलकैस्तालैः पनसैर्वनकिंशुकैः ।

[Cf line 3 of 1249*]

— b) Ś1 K (except Ko) B5 विविधैर्वृक्षैः Ñ2 अन्यैर्बहुविधैर्वृक्षैः — d) S लता(T1 G1. 3 सदा)पुष्पफलैर्वृत (T2 फलमूलसमृद्धिभिः)

4 a) Ś1 जलस्थायैश्च, Ko D5 जलाशयै°, K1 °जातै°; K2–4 °छायै°, D3 °स्थलै°; T1 G3 जन° K3 S बहुभि°. — After 4ab, Ñ2 B3 5 6 Da ins

1252* नानाविहगसंघुष्टं परपुष्टनिनादितम् ।

B5 cont.

1253* समीक्ष्य च ततस्तत्र रम्यं कुसुमितं द्रुमम् ।

— c) Ñ B6 Dn D1 तत्; T2 M5 च (for तु) B1 समीक्ष्य (m as in text) — After 4, S ins.

1254* मत्तभ्रमरसंगीतं कोकिलस्वनमिश्रितम् ।
गायमानैस्तु गन्धर्वैः पुरा नागपुरे यथा ।

[(L 1) T2 °स्वनमुत्तमं, T2 G4 °संयुतं; G1 °मीरितं]

5 a) Ś1 K1 2 4 स तु (for तत्र) — b) Ñ B D (except D5) विचरत — c) Ko D5 °नुगता चैका (D5 °स). — d) S वसने बिभ्रती (G1 वाससी) शुभे

6 a) Some MSS समीक्ष्य° Ko D5 °माणो माद्रीं ता; K1. 3 B1 D2 S (except G2 3) °माणस्य तु तां; Da °माण सतत — b) Ñ1 उपस्था K4 D1 Cd तनुवाससां; G3 तां सुवा°; M (except M5) °वाससीं — c) Dn D1 प्रववृते — d) Ś1 K1 B5 M3 5 °वोज्झित; Ñ3 °वार्जित; B6 D (except D2 4. 5) °वोद्भुत

7 a) Ñ B D (except D5) रहस्येका तु तां (Ñ3 गतां) — b) Ñ1 Da1 G3 °लोचन — c) Ko–2 स्व; K4 तु (for त) — d) K2 4 B3 D5 °बलार्दित; B5 Da Dn D1 °वशीकृत T1 कामबाणबला° — After 7, D4 (marg sec m) S ins

1255* अथ सोऽष्टादशे वर्षे ऋतौ माद्रीमलंकृताम् ।
आजुहाव तत पाण्डुः परीतात्मा यशस्विनीम् ।

8 a) Ś1 K1 तत्र चैनां; Ko Da1 D5 तत एतां; D2 ततोथ ता — b) T G रहोग(G3 °वि)त° Ko अभिगम्य महावने — c) Ś1 तथा, D3 G2 तदा (for तया)

9 b) Ko नान्वचिंतयत्; K1 Dn3 नानु°, B5 °पद्यत; D4 5 T1 G3 M6–8 नाव° — c) D5 मैथुनमार्गेण — d) Ñ2

संभ्रमध्येन्द्रियग्रामं प्रनष्टा सह चेतसा ॥ ११
स तथा सह संगम्य भार्यया कुरुनन्दन ।
पाण्डुः परमधर्मात्मा युयुजे कालधर्मणा ॥ १२
ततो माद्री समालिङ्ग्य राजानं गतचेतसम् ।
मुमोच दुःखजं शब्दं पुनः पुनरतीव ह ॥ १३
सह पुत्रैस्ततः कुन्ती माद्रीपुत्रौ च पाण्डवौ ।
आजग्मुः सहितास्तत्र यत्र राजा तथागतः ॥ १४
ततो माद्यब्रवीद्राजन्नार्ता कुन्तीमिदं वचः ।
एकैव त्वमिहागच्छ तिष्ठन्त्वत्रैव दारकाः ॥ १५
तच्छ्रुत्वा वचनं तस्यास्तत्रैवावार्य दारकान् ।
हताहमिति विक्रुश्य सहसोपजगाम ह ॥ १६
दृष्ट्वा पाण्डुं च माद्रीं च शयानौ धरणीतले ।
कुन्ती शोकपरीताङ्गी विललाप सुदुःखिता ॥ १७
रक्ष्यमाणो मया नित्यं वीरः सततमात्मवान् ।
कथं त्वमभ्यतिक्रान्तः शापं जानन्वनौकसः ॥ १८
ननु नाम त्वया माद्रि रक्षितव्यो जनाधिपः ।
सा कथं लोभितवती विजने त्वं नराधिपम् ॥ १९
कथं दीनस्य सततं त्वामासाद्य रहोगताम् ।
तं विचिन्तयतः शापं प्रहर्षः समजायत ॥ २०
धन्या त्वमसि बाह्लीकि मत्तो भाग्यतरा तथा ।
दृष्टवत्यसि यद्वक्त्रं प्रहृष्टस्य महीपतेः ॥ २१

माद्र्युवाच ।

विलोभ्यमानेन मया वार्यमाणेन चासकृत् ।
आत्मा न वारितोऽनेन सत्यं दिष्टं चिकीर्षुणा ॥ २२

C 1 4887
B 1 125 22
K 1 134 35

B D (except D5) सोन्वगच्छद्रुता°

10 ^a) Ś1 Ñ Dn D1 कौरव्य — ^d) Cf. 9^d Ñ1.2 B (except B5) D (except D5) विधिना सम्प्रचोदित

11 ^a) K0 धर्मात्मनो — ^b) Ñ1.2 T2 कामेन G2 चोदिता — ^d) Some MSS प्रणष्टा Ś1 B5 6 G3 4.5 तेजसा; D8 तेन सा (for चेत°)

12 ^b) K0 Ñ1 G4.6 M °सत्तम, K4 Ñ2 B D T1 °नंदन, T2 G1 5 °सत्तम; G2 °सत्तम; G3 °पुंगव — ^d) B6 (m as in text) Da1 D5 °कर्मणा, Cd as in text — After 12, D4 (marg sec m) S ins

1256* क्षणेनाभ्यपतद्राजा राजधानीं यमस्य वै ।

13 ^b) Ś1 K1 M3 °चेतन, Cd as in text — ^cd) D5 उवाच (for मुमो°) Ś1 K1 3 B3 च, K0 Dn D2 हि (for ह) ` चुक्रोश परमायस्ता (T1 °मा मत्ता, T2 G2-4 °मा यत्ता) चक्रवाकी यथा पतिं — After 13, D4 (marg sec m) S ins

1257* तं श्रुत्वा करुणं शब्दं सहसोत्पतितं तदा ।

14 ^a) K3 तत्र (for तत) K3 4 तत सह सुतैः कुंती — ^c) Ś1 आगता (for आज°)

15 ^ab) G2 transp राजन् and कुन्तीं B5 D2 G2 M6-8 आर्ता Ñ3 B6 (m as in text) S (except T1 G1 2) °मिदं तदा — ^d) S (except G2 4) तिष्ठता तत्र (T1 राज-) दा°

16 ^a) Ñ2 B3 Da D2 4 °न देव्यास G1 3 6 एतच्छ्रुत्वा वचस्तस्यास् — ^b) K0 2 Ñ2 B1m 6,D (except D2 5) वाधाय — ^d) Ś1 च, K3 Ñ3 त, S (except G3) ता (for ह) Ñ1 2 B D (except D5) सहसैवा(Da °व)जगाम सा (D4 ह)

17 ^a) K0 1 3 B1.5 D2 S (except M5-8) माद्रीं च पाण्डु (by transp)

18 Before 18, D4 ins कुन्त्युवाच, T1 G6 M कुंती. — ^b) Ñ1 D2 S धीर ; D4 वने — ^c) Ś1 स्वयमनुक्रात°, K0 2 B D5 M8 त्वामभ्यति°; K1 स्वय मति°; K3 Ñ Da Dn D1 त्वामत्यति°; K4 स्वया द्याप°, D2 M5 त्वामप्यति°; D4 त्वमद्य निष्क्रात , T1 G3.5 त्वमनति°, T2 स्व समति°, G1 च मत्यति°, G2 च समति°; G4 नु समति°, G6 त्वमत्यति° — ^d) Ñ1.2 B1m 3.5 D2 जानन्वने वसन्; Cd as in text.

19 ^a) Ś1 K1 त्वया राज्ञि — ^b) K0 Ñ2 B1 5 Dn2 D5 S नराधिप — ^c) Ś1 K1 सा नृप — ^d) Ś1 K1 B3 त, M (except M5) तु (for त्व) — After 19, S ins

1258* माद्री ।

विधिना चोदितस्यास्य मा दृष्ट्वा विजने वने ।
अचिन्तयित्वा तच्छाप प्रहर्षं समजायत ।

[(L 1) T1 G1 M5-8 °तस्याद्य — (L 2) Cf 20^cd. M6-8 त शाप]

20 Before 20, S ins कुंती (of 1258*) — ^ab) G6 कथ दीने वसते त्वामासाद्य च रहो°

21 ^a) K2 वाह्हेकि, K4 वाह्हीकि, B (except B6) Da वाह्हीकि, S याह्हीके — ^b) Ś1 K (except K4) B1 3 5 (m as in text) D2 T1 G6 मत्तः(K0 3 B5 G6 °त्तो)भाग्यतरा (B3m °वती), G3 मम भाग्य°, M महाभाग्यतरा (M3 °वती), Cd (?)मत्प्रभाग्यतरा B5 गुणै (m as in text),

C. 1 4688
B 1 125. 23
K 1 134 68

कुन्त्युवाच ।

अहं ज्येष्ठा धर्मपत्नी ज्येष्ठं धर्मफलं मम ।
अवश्यं भाविनो भावान्मा मां माद्रि निवर्तय ॥२३
अन्वेष्यामीह भर्तारमहं प्रेतवशं गतम् ।
उत्तिष्ठ त्वं विसृज्यैनमिमान्रक्षस्व दारकान् ॥ २४

माद्र्युवाच ।

अहमेवानुयास्यामि भर्तारमपलायिनम् ।
न हि तृप्तास्मि कामानां तज्ज्येष्ठा *अनुमन्यताम् ॥२५
मां चाभिगम्य क्षीणोऽयं कामाद्भरतसत्तमः ।
तमुच्छिन्द्यामस्य कामं कथं नु यमसादने ॥ २६
न चाप्यहं वर्तयन्ती निर्विशेषं सुतेषु ते ।
वृत्तिमार्ये चरिष्यामि स्पृशेदेनस्तथा हि माम् ॥२७
तस्मान्मे सुतयोः कुन्ति वर्तितव्यं स्वपुत्रवत् ।
मां हि कामयमानोऽयं राजा प्रेतवशं गतः ॥ २८
राज्ञः शरीरेण सह ममापीदं कलेवरम् ।
दग्धव्यं सुप्रतिच्छन्नमेतदार्ये प्रियं कुरु ॥ २९
दारकेष्वप्रमत्ता च भवेथाश्च हिता मम ।
अतोऽन्यन्न प्रपश्यामि संदेष्टव्यं हि किंचन ॥ ३०

वैशंपायन उवाच ।

इत्युक्त्वा तं चिताग्निस्थं धर्मपत्नी नरर्षभम् ।
मद्रराजात्मजा तूर्णमन्वारोहद्यशस्विनी ॥ ३१

इति श्रीमहाभारते आदिपर्वणि षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

D5 S भुवि (M8 छसि) (for तथा) Ñ8 सभाग्या च भृश मया — e) Ś1 K (except K8) D5 या वक्त्र, G4 M तद्व°

22 Ś1 K1 2 S om उवाच — D1 (hapl) om 22 and कुन्त्युवाच (in 23) — a) Ś1 K1 Cd विलोक्य°, T G अलोक्य° K2 4 Ñ1. 2 B D (except D5, D1 om) विलपन्त्या मया देवि — b) M (except M5) °माणस्त यासकृत् — c) K (except K1) D5 S धा(T1 दा)रित Da1 S (except G2) तेन; D5 येन (for अनेन) — d) K2–4 Cd दिष्ट सत्य (by transp), G3 सत्य दृष्ट, G4 गत दिष्ट Ñ3 सत्यमिष्ट चिकीर्षता — After 22, D4 (marg sec. m) S ins a passage of 61 lines given in App I (No 68)

23 D1 om the ref (of v 1. 22), Ś1 K1. 3 S om उवाच — b) K2 4 सह, Ñ1 2 B (except B1) Da D2 5 श्रेष्ठ (for ज्येष्ठ) G3 मत; G5 महत् (for मम) — c) G3 M (except M5) अवश्य Cd cites अभावात् (for भावात्) — d) Some MSS मा (for मां) T1 G2 6 मा माद्रि म, G1 3 माद्रि मा मा K1 2 4 B5 Da निवारय Ñ2 मा माद्रि विनिव°

24 a) Ś1 Ñ Da Dn D1 M3 5 अन्विष्यामीह, K0 4 D5 अनुयास्यामि, K2 ष्यामि हि — b) Da इह (for अह) K0 2 4 D5 प्रेतगतिं — c) G1 इम, G3 पुत (for एन) G6 M6–8 transp त्व and एन — d) K0 D5 एतान् K1 रक्ष सुदार°; K2 4 रक्ष कुमार°; Ñ2 B D (except D5) पालय दार°, G2 रक्षस्व बाल° — After 24, T G ins

1259* अवाप्य पुत्राँल्लब्धात्मा वीरपत्नीत्वमर्थये ।
वैशंपायन ।
मद्रराजसुता कुन्तीमिद वचनमब्रवीत् ।

25 Ś1 K1 S om उवाच — M6–8 transp 25[ab] and 25[cd], repeating 25[cd] after 25[ab] | — b) M अपराजित; Cd as in text — c) G1 न हि तृप्यामि — d) T G2. 3. 6 त्व ज्येष्ठा Ś1 K0. 1 3 Ñ3 D5 T G1 3–5 मेऽनुमन्यतां; K2 4 मानु°, G6 ह्यनु° Ñ1 G3 त्वज्येष्ठाम(G2 मो)नु°, Ñ2 B Da Dn D1. 2 4 ज्येष्ठा (B1 6 Da °ष्ठे, B1m °ष्ठा) मामनु°; M2. 5 देवी ज्येष्ठानु°, M6–8 तां (all inf lin त) ज्येष्ठामनु° (all inf lin चानु°)

26 c) B3 D5 S समुच्छिद्याम्, Cd as in text. — After 26, S ins

1260* मम हेतोर्गतो राजा दिव राजर्षिसत्तम ।
न चैव तादृशी बुद्धिर्यान्धवाश्च न तादृशाः ।
न चोत्सहे धारयितु प्राणान्भर्तृविनाकृता ।
तस्मात्तमनुयास्यामि यान्त वैवस्वतक्षयम् ।

[(L 1) G2 मम हेतोर्मृतो राजा यदय राजसत्तम.]

27 a) S वर्तेय न समा वृत्तिं — b) Ś1 K (except K0) निर्विशेषा (K2 3 °षां); S जात्वह च — cd) K2. 4 Dn D1 च (for हि) S तथा हि वर्तमाना मामधर्मे सस्पृशेन्महान् — After 27, M3 ins.

1261* त्व तु मत्सुतयोर्नित्य त्वत्सुतेषु समा सदा ।

28 a) B6 तस्मान्मत्पुत्रयो S देवि (for कुन्ति) — c) Ñ2 B1 Dn D1 च (for हि) — d) M3 भर्ता (for राजा) D5 प्रेतगतिं — After 28, S ins

1262* अन्वेष्यामि च भर्तारं व्रजन्त यमसादनम् ।

29 a) K0 2 4 D5 सह शरी° (by transp) — d) D5 एतत्कार्यं K0 2 4 Ñ3 B5 कुरु प्रिय (by transp).

30 a) T1 G त्व (for च) — b) Ś1 K1 भवेस्तद्धि; K2

११७

वैशंपायन उवाच ।
पाण्डोरवभृथं कृत्वा देवकल्पा महर्षयः ।
ततो मन्त्रमकुर्वन्त ते समेत्य तपस्विनः ॥ १
हित्वा राज्यं च राष्ट्रं च स महात्मा महातपाः ।
अस्मिन्स्थाने तपस्तप्तुं तापसाञ्शरणं गतः ॥ २
स जातमात्रान्पुत्रांश्च दारांश्च भवतामिह ।
प्रदायोपनिधिं राजा पाण्डुः स्वर्गमितो गतः ॥ ३
ते परस्परमामन्त्र्य सर्वभूतहिते रताः ।
पाण्डोः पुत्रान्पुरस्कृत्य नगरं नागसाह्वयम् ॥ ४
उदारमनसः सिद्धा गमने चक्रिरे मनः ।

C 1 4902
B 1 126 6
K 1 135 6

M8.5 भवेथास्त्व, T G भवेश्चामि Ś1 K (except K8) हित मम, M8 सदा मम; M5 अनिंदिते· — c) Ś1 K (except K8) D2 अतो नान्यत् (K0 D2 नान्य), D4 अतोन्यं न, G3 4 अन्योन्यं न — d) K2 Ñ1 B6 M6-8 कथचन; K2 प्रिय मम (for हि किं°) — After 30, D4 (marg sec. m) S ins a passage of 62 lines given in App I (No 69), while D5 ins

1263* तस्मास्तद्वचन श्रुत्वा कुन्ती शोकाग्निदीपिता ।
पपात सहसा भूमौ छिन्नमूल इव द्रुम ।
निश्चेष्टा पतिता भूमौ मोहेनैव चचाल सा ।
तस्मिन्क्षणे कृतस्नान महदम्बरसवृतम् ।
अलकारकृत पाण्डु शयान शयने शुभे । [5]
कुन्तीमुत्थाप्य माद्री तु मोहेनाविष्टचेतनाम् ।
एह्येहि कुन्ति मा रोदी दर्शयामि स्वकौतुकम् ।
पादयो पतिता कुन्ती पुनरुत्थाय भूमिपम् ।
रक्तचन्दनदिग्धाङ्ग महारजतवाससम् ।

31 All MSS. except Dn D2 5 om the ref — a) K2 4 तां (for त) S नमस्कृत्य पिता° — b) K D4 T1 G1 6 M °राजात्मजा (as in text), the rest °राजसुता — After 31, D4 (marg sec m) S ins

1264* आहताम्बरसवीतो भ्रातृभि सहितोऽनघ. ।
उदकं कृतवांस्तत्र पुरोहितमते स्थित ।
भर्तुस्तस्य कृत्यानि शतशृङ्गनिवासिन ।
तापसा विधिवच्चक्रुश्चारणा ऋषिभि सह ।

G1 cont

1265* तापसा विधिवत्कर्म कारयामासुरात्मजै ।
(of last line of 1264*)

Colophon. *Major parvan* T2 G2-6 M सभव° (for आदि°) — *Sub-parvan* Ś1 K0 1 4 Ñ B1 5 Da D1 5 T1 सभव — *Adhy name* K8 पाडो स्वर्लोकगमन; Ñ1.2 पाडूपरम°, Dn पांडोरुपरम, T2 G1 4 M पांडुस्वर्गारोहण (M5 पाडुमरण) — *Adhy no* (figures, words or both) B1 123, Dn 124, D4 125, S 67 (T1 116) — *S'loka no* Da1 23, Dn 31, M8 112 — *Aggregate s'loka no* Dn2 4898

66

117

1 Ś1 K1.3 D2 5 S om उवाच (M5 om the ref) — a) Ś1 K1 पांडोरेव दशां, K2 4 तत्पाडोर्निधन, Ñ1 2 B D (except D5) पांडोरुपरम, Cd as in text N दृष्ट्वा (for कृत्वा) — c) Ñ1 2 B D (except D5) ततो मन्त्रविद सर्वे — d) K2 4 यशस्विन, K8 महर्षय (for तप°). K0 Ñ8 समेत्य मुनयस्तदा, Ñ1 2 B D (except D5) मन्त्रयाचक्रिरे मिथ

2 Before 2, N ins तापसा (K0 ऋषय) ऊचु (K1 om ऊचु); M6-8 शुक — a) Ś1 K2 4 G8 transp राज्यं and राष्ट्र M भोगांश्च (for राष्ट्र च) — b) B5 6 (by transp) महात्मा स (B6 च) K0 Ñ1 2 B Dn D1 2 4 महायशा Da महात्मा सुमहायशा. — c) K1 T2 G5 6 तपस्तप्त, Ñ B D (except D5) G3 M °स्तप्त्वा

3 a) B3 G6 सजात° — b) G5 °श्च भरतर्षभ — c) K2 4 Ñ B (except B5) Dn D1 5 G3 4 प्रादा° — After 3, N (except Ś1 K1 2) ins

1266* तस्येमानात्मजान्देह भार्यां च सुमहात्मन ।
स्वराष्ट्रं गृह्य गच्छामो धर्म एष हि नः स्मृत ।,

while S ins

1267* तस्मात्कुरुत परीक्षध्वमिति होवाच धर्मवित् ।
शुक· परमकल्याणो गिरा समभिभाषत ।

[(L 2) G5 °णोंगिरा सम°; M °णो महर्षि सशितव्रत·]

4 Before 4, all MSS except M8 ins वैश° उ° (Ś1 K0 1 3 D2 5 S om उ°) — a) Ñ1 2 B Da D2 °मागम्य — b) Ñ1 2 B D (except D5) देवकल्पा महर्षय — After 4ab, T G ins

1268* धर्मं चैव पुरस्कृत्य श्रेष्ठा मतिमकुर्वत ।
कुरुक्षेत्रमित· कुन्तीं तां सपुत्रा नयामहे ।

C. 1. 4902 B. 1. 126. 6 K. 1. 135. 6

भीष्माय पाण्डवान्दातुं धृतराष्ट्राय चैव हि ॥ ५
तस्मिन्नेव क्षणे सर्वे तानादाय प्रतस्थिरे ।
पाण्डोर्दारांश्च पुत्रांश्च शरीरं चैव तापसाः ॥ ६
सुखिनी सा पुरा भूत्वा सततं पुत्रवत्सला ।
प्रपन्ना दीर्घमध्वानं संक्षिप्तं तदमन्यत ॥ ७
सा नदीर्घेण कालेन संप्राप्ता कुरुजाङ्गलम् ।
वर्धमानपुरद्वारमाससाद यशस्विनी ॥ ८
तं चारणसहस्राणां मुनीनामागमं तदा ।
श्रुत्वा नागपुरे नृणां विस्मयः समजायत ॥ ९
मुहूर्तोदित आदित्ये सर्वे धर्मपुरस्कृताः ।
सदारास्तापसान्द्रष्टुं निर्ययुः पुरवासिनः ॥ १०
स्त्रीसंघाः क्षत्रसंघाश्च यानसंघान्समास्थिताः ।
ब्राह्मणैः सह निर्जग्मुर्ब्राह्मणानां च योषितः ॥ ११
तथा विट्शूद्रसंघानां महान्व्यतिकरोऽभवत् ।
न कश्चिदकरोदीर्ष्यामभवन्धर्मबुद्धयः ॥ १२
तथा भीष्मः शांतनवः सोमदत्तोऽथ बाह्लिकः ।
प्रज्ञाचक्षुश्च राजर्षिः क्षत्ता च विदुरः स्वयम् ॥ १३
सा च सत्यवती देवी कौसल्या च यशस्विनी ।
राजदारैः परिवृता गान्धारी च विनिर्ययौ ॥ १४
धृतराष्ट्रस्य दायादा दुर्योधनपुरोगमाः ।
भूषिता भूषणैश्चित्रैः शतसंख्या विनिर्ययुः ॥ १५
तान्महर्षिगणान्सर्वाञ्शिरोभिरभिवाद्य च ।

After this, the sequence of T G is 5^{ab}, 6^{ab} (for the first time), 4^{cd} and 5^{cd} etc (G5 reads also 6^{cd} first time after 6^{ab}) — After 4^{ab}, M reads 6^{ab} (for the first time) — K3 om 4^{c}–6^{b} — ^{c}) K3 4 पांडुपुत्रान् G3 पुत्रान्पुरस्कृत्य ततो

5 K3 om 5 (of v 1 4) For sequence of T G of v 1 4 — ^{a}) N1 2 Da M सर्वे (for सिद्धा) T G इत्युक्त्वा ते (G5 एवमुक्त्वा) महात्मानो — ^{d}) K0 1, 2 Da2 D5 M तु (for हि)

6 K3 om. 6^{ab} (of v 1 4) — S repeats 6^{ab}, G2, 6^{cd} also (of v 1 4) — ^{b}) M1 5 (both second time) समादाय (M2 second time *sup lin* तानादाय) T1 G1 2 6 M (all first time) परीवार्योप(M1 °र्य प्र)तस्थिरे — ^{c}) Ś1 K1 2 4 D5 G4 पुत्रांश्च दारांश्च (by transp) — ^{d}) K (except K1) Ñ2 3 B1 D2 4 5 शरीरे चैव; Ñ1 B6 Da Dn D1 शरीरे ते च; B3 शरीरेणैव; M (except M1) परिवारांश्च — After 6, B5 ins

1269* आदाय प्रस्थिता सर्वे शतश्रृङ्गान्नगोत्तमात् ।

7 ^{a}) M6–8 या (for सा)! B6 तदा (for पुरा) Ś1 गृत्वा (for भूत्वा) — ^{c}) Ñ1 प्रपन्न; Dn1 T1 G6 °सन्ना — ^{d}) G2 सा क्षिप्र (for संक्षि°) Ś1 K (except K0) G1 तममन्यत

8 ^{a}) K0 2 3 B (except B5) Dn D1 4 5 M1 सा त्वदीर्घेण; Ñ2 D2 सा च दी°; T1 सा तु दी° — ^{b}) K0 प्रपन्ना (for संप्रा°) Some N MSS कुरुजाङ्गलं — After 8, Dn D1 2 4 ins

1270* ह्यारिण तापसा ऊचू राजानं च प्रकाशय ।
ते तु गत्वा क्षणेनैव सभायां विनिवेदिता ।

9 ^{a}) T1 G1 2 5 तत् (for तं) Ñ2 °सहस्राणि; T G °सहस्र चे, M °सहस्रेण; Nilp चारण्य°; Cd as in text — ^{b}) K3 Ñ1 D5 T2 G2 6 चागतं; Ñ3 चागमं; Da G3 4 5 आगतं; G1 च गतं; Cd आगमं (as in text) G3 4 तथा Ñ3 मुनींश्चैवागतांस्तदा; M मुनीनां (M3 5 ऋषीणां) सघमागतं — ^{c}) G3 तु नगरे; M7 गजपुरे — ^{d}) K3 Ñ1 B D (except D5) समपद्यत

10 ^{a}) M (except M5) मुहूर्ते चोदितादित्ये — ^{b}) Ś1 K1 3 Da1 D2 5 सर्वधर्म°; Dn D1 सर्वे याल°; S सर्वे भीष्मपुरोगमा (M °पुर सरा) — ^{c}) Ś1 K0 1 3 B2 6 D5 T G सदारांस्ताप° — K3 (? hapl) om 10^{d}–11^{a}

11 K3 om 11^{abc} (of v. 1 10) — ^{a}) K0 M क्षत्रसघानां — ^{b}) K0 Ñ1 B1 D4 यानसघ; K3 °घयान्; Ñ3 B3 5 6 Da Dn D1 5 यानसघ; Ñ3 D2 G1–3 °सघा°; G1 योधसघा Ñ1 B1 D2, 4 अवस्थिता T G2 4 समाश्रिता; G5 °हिता — ^{c}) K4 G2 सह सजग्मुः; T1 G3 सहिता ज°; T2 G4 सहसा ज° — ^{d}) T1 G1 2 6 ब्राह्मणाश्च सयो°; T2 G3 4 °णा. सहयो°; G5 °णाश्च समाहिता (cf. ^{b})

13 ^{a}) K3 4 M2 5 ततो भी° — ^{b}) K0 °दत्तश्च — ^{d}) Ś1 विदुरस्तथा

14 ^{a}) Ś1 K1 तु (for च) and दीना (for देवी) — ^{b}) Some N MSS कौशल्या T G देवी चांबालिकापि च (T1 °का अपि) — ^{d}) Dn D1 S (except M6–8) चापि निर्ययौ

15 ^{b}) S (except M2 5) °पुर.सरा — ^{c}) Ś1 K1 2 4 दिव्यै ; D5 मुख्यै (for चित्रै)

16 ^{a}) Ñ3 दिव्यान्; B3m 6 D (except D2 4) दृष्ट्वा (for सर्वान्) — ^{b}) Ñ3 अभिवाद्य Ś1 K Ñ2 D5 ते

उपोपविविशुः सर्वे कौरव्याः सपुरोहिताः ॥ १६
तथैव शिरसा भूमावभिवाद्य प्रणम्य च ।
उपोपविविशुः सर्वे पौरजानपदा अपि ॥ १७
तमकूजमिवाज्ञाय जनौघं सर्वशस्तदा ।
भीष्मो राज्यं च राष्ट्रं च महर्षिभ्यो न्यवेदयत् ॥ १८
तेषामथो वृद्धतमः प्रत्युत्थाय जटाजिनी ।
महर्षिमतमाज्ञाय महर्षिरिदमब्रवीत् ॥ १९
यः स कौरव्यदायादः पाण्डुर्नाम नराधिपः ।
कामभोगान्परित्यज्य शतशृङ्गमितो गतः ॥ २०
ब्रह्मचर्यव्रतस्थस्य तस्य दिव्येन हेतुना ।
साक्षाद्धर्मादयं पुत्रस्तस्य जातो युधिष्ठिरः ॥ २१
तथेमं बलिनां श्रेष्ठं तस्य राज्ञो महात्मनः ।
मातरिश्वा ददौ पुत्रं भीमं नाम महाबलम् ॥ २२
पुरुहूतादयं जज्ञे कुन्त्यां सत्यपराक्रमः ।

C. 1 4921
B. 1 126. 25
K. 1 131 31

(for च) — After 16^{ab}, S ins

1271* स्वागत वचन चोक्त्वा पाण्डोर्भवनमाविशन् ।
[M चोक्ता']

— ^{c})=17^{c} Ñ1.2 B Da D3 4 तत स(B8 प्र)वि°, G8 ते चोपवि° — Ś1 transp 16^{d} and 17^{d} — D5 (hapl.) om 16^{d}–17^{c}, K8 (hapl) om 16^{e}–17^{b} — ^{d}) D3 4 G6 कौरवा Da च (for स)

17 Ś1 transp 16^{d} and 17^{d}, K8 om 17^{ab}, D5 om 17^{abc} (cf v l 16) — ^{a}) Ñ1 तत्रैव Ko °सा सर्वे — ^{b}) Ś1 repeats 16^{b} for 17^{b} S (except G2) प्रसाद्य च Ko प्रणिपत्याभिवाद्य च — ^{c})=16^{c} — ^{d}) D5 °जानपदै° सह

18 Ñ1 om 18^{ab} — ^{a}) Ñ2 T2 G6 तमद्भुतम्, D2 °पूज्यम्, G8 तमात्मजम्, G5 °प्रजम् Ñ3 B Dn D1. 4 अभिज्ञाय Ko D5 कृतमौम(D5 °मौन)मिव ज्ञात्वा, T1 G3 4 अक्रूरमिव चाज्ञाय, G1 स्थीयतामित्यनुज्ञाय — ^{b}) K2–4 सर्वतस् K1 Da T G (except G1 8) M8(*inf lin* as in text) 8 तथा — After 18^{ab}, K4 Ñ B D (except D5) ins

1272* पूजयित्वा यथान्याय पाद्येनार्घ्येण च प्रभो ।

— Ñ3 reads 18^{cd} in marg — ^{c}) S1 G2 M6–8 transp राज्य and राष्ट्रं

19 Before 19, S ins वैश° — ^{a}) K8 तेषां मध्ये S तेषा वृद्धतम कश्चित् — ^{b}) Ko तदाजिनी — ^{c}) Ñ B D (except D5) ऋषीणां मतम् T1 G1 8 आस्थाय

20 Before 20, M ins ऋषि — ^{a}) Ko D5 योसौ (for य स) K2 4 Da1 D2 4 कौरव° — ^{b}) K1 जनाधिप , D4 महारथ — ^{c}) T G2 4–6 M6–8 हित्वा राज्य च राष्ट्र च (M6–8 राष्ट्राणि), G1 हित्वा राष्ट्र च भोगाश्च, G8 M8 5 हित्वा राष्ट्राणि राज्य च (cf 2^{a} and 1273* below) — After 20, D4 (marg *sec m*) S ins

1273* कामभोगान्परित्यज्य तपस्वी सबभूव ह ।
स यथोक्त तपस्तेपे तत्र मूलफलाशन ।
पत्नीभ्यां सह धर्मात्मा कचित्कालमतन्द्रित ।
तेन वृत्तसमाचारैस्तपसा च तपस्विन ।
तोपितास्तापसास्तत्र शतशृङ्गनिवासिन । [5]
स्वर्गलोक गन्तुकाम तापसा विनिवार्य तम् ।
उद्यत सह पत्नीभ्यां विप्रा वचनमब्रुवन् ।
अनपत्यस्य राजेन्द्र पुण्यलोका न सन्ति ते ।
तस्माद्धर्म च वायु च महेन्द्र च तथाश्विनौ ।
आराधयस्व राजेन्द्र पत्नीभ्या सह देवताः । [10]
तुष्टा पुत्रान्प्रयच्छन्ति ऋणमुक्तो भविष्यसि ।
तपसा दिव्यचक्षुष्ट्वात्पश्यामस्ते तथा सुतान् ।
अस्माक वचन श्रुत्वा देवानाराधयत्तदा ।

[(L 1) Prior half=20^{c} — (L 11) D4 प्रीता' पुत्रान् — (L 12) G8 5 दिव्यचक्षुर्भ्यां]

G1 cont

1274* कुन्ती सप्रेषयामास देवरन्यायधर्मतः ।
स्वानामन्यतमैर्नार्यं पुण्यैराख्यायिकैरपि ।
मुनेर्मन्त्रप्रभावेण शकराशाभियोगिन ।
आहूय धर्म वायु च महेन्द्र च तथाश्विनौ ।
असूत पुत्रान्कुन्ती च माद्री च द्वौ सुतावपि ।

21 ^{b}) D5 तेन दिव्ये° — ^{c}) T G2–6 M तस्माद्धर्माद् G1 युधिष्ठिरोय धर्मात्मा — ^{d}) K8 ज्येष्ठो, Ñ B D (except D5) M5 तत्र; T G2–6 M8 6–8 कुन्त्या (for तस्य) G1 धर्मात्कुन्त्यामजायत

22 ^{a}) K2–4 Da तथैव, Ñ B Dn D1. 2 4 5 M (except M5) तथैन; G1 तथास्या K3 4 G1 श्रेष्ठ — ^{d}) K8 भीमं भीमपराक्रमं, K8 भीमसेन महाबल, S भीम सत्ववतां वर

23 ^{b}) K1 Da1 D1 2 कुन्त्या Dn S कुन्त्यामेव धनजय (cf 1275*) After 23^{ab}, D4 (marg *sec m*) S ins

1275* अस्मिञ्जाते महेष्वासे देवा सेन्द्रास्तथाब्रुवन् ।
मत्प्रसादादय जात' कुन्त्यां सत्यपराक्रम ।
अजेयो युधि जेतारीन्देवतादीश्च संशय ।

[(L. 1) D4 T2 G1. 3–6 देवैरिंद्रस्तथाब्रवीत् (for the posterior half)]

G1 cont

1276* स लङ्घयित्वा हरिणा भुवो भारान्नियोजित. ।

C. 1. 4621 B. 1. 125. 25 K. 1. 135. 23

यस्य कीर्तिर्महेष्वासान्सर्वानभिभविष्यति ॥ २३
यौ तु माद्री महेष्वासावसूत कुरुसत्तमौ ।
अश्विभ्यां मनुजव्याघ्राविमौ तावपि तिष्ठतः ॥ २४
चरता धर्मनित्येन वनवासं यशस्विना ।
एष पैतामहो वंशः पाण्डुना पुनरुद्धृतः ॥ २५
पुत्राणां जन्म वृद्धिं च वैदिकाध्ययनानि च ।
पश्यतः सततं पाण्डोः शश्वत्प्रीतिरवर्धत ॥ २६
वर्तमानः सतां वृत्ते पुत्रलाभमवाप्य च ।
पितृलोकं गतः पाण्डुरितः सप्तदशेऽहनि ॥ २७
तं चितागतमाज्ञाय वैश्वानरमुखे हुतम् ।
प्रविष्टा पावकं माद्री हित्वा जीवितमात्मनः ॥ २८
सा गता सह तेनैव पतिलोकमनुव्रता ।
तस्यास्तस्य च यत्कार्यं क्रियतां तदनन्तरम् ॥ २९
इमे तयोः शरीरे द्वे सुताश्चेमे तयोर्वराः ।

नरो मामाविशत्कुन्ति विष्णोरर्धं नरं विदु ।
सोऽहं त्वामाविश भद्रे जातोऽहं फल्गुनाह्वय ।
तस्मादजय्यो भुवने चतुर्दशभिरप्यसौ ।
In D4 (the repetition of) 23^cd after 1277* has been scored out — c) K3 D4 (first time) T2 G4 M6-8 अस्य, D4 (second time) तस्य (for यस्य) — d) G2 सर्वान्वै प्रहरिष्यति — D4 (om line 6) ins (marg sec m) after the first occurrence of 23^cd S, after 23

1277* युधिष्ठिरो राजसूय भ्रातृवीर्यादवाप्स्यति ।
इन्द्रस्य वचन श्रुत्वा पाण्डु प्रीतिमवाप स ।
एष जेता मनुष्याश्च सर्वान्गन्धर्वराक्षसान् ।
एष दुर्योधन कीर्त्या भारतांश्च विजेष्यति ।
वीरस्यैकस्य विक्रान्तैर्धर्मपुत्रो युधिष्ठिर । [5]
यक्ष्यते राजसूयाद्यैर्धर्मं एवापर सदा ।
[(L. 1) D4 इष्ट्वा कीर्तिम्, G1 यस्य वीर्याद् — After line 1, M ins

1278* विजित्य नृपतीन्सर्वान्कृत्वा च करदान्प्रभु ।
स्वय भोक्ष्यति धर्मात्मा पृथिवीं सागराम्बराम् ।
— T1 G (except G3) read line 2 (of 1277*) after line 6 — After line 3, G1 ins

1279* सुरासुरोरगांश्चैव वीर्यादेकरथो जयेत् ।
— (L 5) G1 M8 5 वीरस्यैतस्य; G5 वीर्यैरेतस्य, M6-8 अस्य वीरस्य T2 G3 4 5 कुतीपुत्रो युधि°; G1 सर्वशत्रुभयकरै After line 5, G1 ins

1280* अजातशत्रुर्धर्मात्मा पृथ्व्यैश्वर्याभिपूजित ।
— (L 6) M राजसूयादीन् T1 G3 धर्मं एष वरस्सदा; G1 महतीं कीतिमाप्स्यति, M क्रतून्धर्मपरायण]

24 ab) Ś1 K1 या तु, G1 M (except M5) इमौ (M5 inf lin यौ तु as in text) M (except M5) माद्या and जातौ च (M5 inf lin respectively माद्री and असूत as in text) Ñ B D (except D5) पुरुषोत्तमौ (for कुरु°) — c) Ñ1. 2 B (except B5) Dn D1 पुरुषव्याघ्रौ — d) Ñ1 2 B D (except D5) पश्यत (for तिष्ठ°) M (except M5) जेतारो युधि शात्रवान् — After 24, D4 (marg sec m, om line 2) S ins

1281* नकुल सहदेवश्च तावप्यमिततेजसौ ।
पाण्डवौ नरशार्दूलाविमावप्यपराजितौ ।
[(L. 1) G1 उभावमित°, G3 °मितविक्रमौ — (L 2) T1 °विमौ चाप्य°, G1 °प्यपराजयौ; G3 °प्यमितौजसौ]

25 a) B5 D5 नित्यधर्मेण — b) Ś1 K (except K0) D5 महात्मना (K1 °न) (for यश°) — c) B2. 5 (both m as in text) Dn D1 4 नष्ट (for एष)

26 a) Ś1 K1 2 4 धर्मवृत्तिं; Dn1 धर्मवृद्धिं; T1 जन्म वृत्तिं, G2. 6 जन्मवृत्त — c) N पश्यत Ś1 K0 2 4 D1 5 G5 सततिं; K1 शयत — d) N परां प्रीतिमवाप्स्यय.

27 a) S °ता मार्गे — d) D5 स दशमेहनि

28 a) B1 6 D2 4 चितास्थितम् T2 G M2. 5 आसाद्य T1 ततश्चितां समासाद्य — b) G3 °नरहुते मखे

29 a) T1 G2. 6 M सगता — b) B5 भर्तृव्रतमनु°; G1 °लोकं पतिव्रता — c) K0 2 4 सत्कार; M3 यत्कृत्स — d) T1 G2. 4 5 M7 यदनतर — After 29, G1 ins.

1282* भीष्म च धृतराष्ट्र च विदुर च महामतिम् ।
S ins after 29 (G1, after 1282*)

1283* पृथा च शरण प्राप्ता पाण्डवांश्च यशस्विन ।
यथावदनुगृह्णन्तां धर्मो ह्येष सनातन ।
[(L 2) G1 पांडवान्परिगृह्णीध्व धर्मसत्यान्यशस्विन]
G1 cont

1284* एतेषां भरण भीष्म महान्धर्मस्तथैव च ।
क्षत्तुश्च धृतराष्ट्रस्य गान्धार्याश्च विशेषत ।;
while M5 cont

1285* इमे शरीरे च तयो पृथा च शरणागताम् ।
तस्य पुत्रांश्च धर्मज्ञान्सर्वान्सत्कर्तुमर्हथ ।
[(L. 1) Prior half = (var) 30^a With the posterior half of line 1 of 1283*]

30 a) K0 एते (for इमे) — b) Ś1 K2 4 Dn D1 5 पुत्रा (for सुता) G1 5 एते (for इमे) K1 तपोधना° (for तयो°) — c) M5 यथावदनु°

31 a) Ñ B (except B3) D (except D2 4 5) G1

क्रियाभिरनुगृह्णन्तां सह मात्रा परंतपाः ॥ ३०
प्रेतकार्ये च निर्वृत्ते पितृमेधं महायशाः ।
लभतां सर्वधर्मज्ञः पाण्डुः कुरुकुलोद्वहः ॥ ३१
एवमुक्त्वा कुरून्सर्वान्कुरूणामेव पश्यताम् ।
क्षणेनान्तर्हिताः सर्वे चारणा गुह्यकैः सह ॥ ३२
गन्धर्वनगराकारं तत्रैवान्तर्हितं पुनः ।
ऋषिसिद्धगणं दृष्ट्वा विस्मयं ते परं ययुः ॥ ३३

इति श्रीमहाभारते आदिपर्वणि सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥

११८

धृतराष्ट्र उवाच ।
पाण्डोर्विदुर सर्वाणि प्रेतकार्याणि कारय ।
राजवद्राजसिंहस्य माद्र्याश्चैव विशेषतः ॥ १
पशून्वासांसि रत्नानि धनानि विविधानि च ।
पाण्डोः प्रयच्छ माद्र्याश्च येभ्यो यावच्च वाञ्छितम् ॥ २
यथा च कुन्ती सत्कारं कुर्यान्माद्र्यास्तथा कुरु ।
यथा न वायुर्नादित्यः पश्येतां तां सुसंवृताम् ॥ ३
न शोच्यः पाण्डुरनघः प्रशस्यः स नराधिपः ।

C. 1 4933
B. 1 127 4
K. 1 136 4

°कार्ये निवृत्ते तु (G1 पि); G3 °कर्मणि निर्वृत्ते — b) S पितृमेधे च पांडवा — c) D4 S लभ(D4 °भ)तां सर्वदायाद्य — d) D4 S पांडो कुरुकुलोद्वहा

32 Before 32, Ś1 K0 1.3 D2 5 T G (except G3) ins वैश°; Dn D1 वैश° उ° — b) S कौरवाणा च प° — c) Ñ1 2 B D (except D5) तापसा (for चार°) M3.5 ऋपयश्चारणै सह

33 S transp 33ab and 33cd — a) K0 S °कारान् (T1 G3 °कारा; G6 as in text) — b) Ñ B (except B5) D (except D2) तथैव K0 T2 G2 4 5 M अंतर्हितान्, K2 T1 G1 3 6 °र्हिता, K3 Dn3 °र्हित T1 G3 M6-8 तत, T2 G1 2 4-6 M3 5 तदा (for पुन) — c) K0 Dn S (except T1 G6) °गणान् — d) Ś1 K1.2 4 D2 5 परम (for ते पर) K2 4 D5 गता (for ययु) K0 ते सर्वे विस्मय ययु — After 33, D4 (marg sec m) S ins

1286* कौरवा सहसोत्पत्य साधु साध्विति विस्मिता ।
[D4 °ध्विति चाब्रुवन्]

Colophon om in B1 3.6 *Major parvan* T2 G2-6 M3.5 7 सभव° (for आदि°) — *Sub-parvan* Ś1 K0-2 4 Ñ1.2 B5 Da Dn1 n3 D2 4 5 सभव — *Adhy name* K3 D1 पांडवाभि(D1 om भि)गमन, Ñ1 2 ऋषिसवाद, Ñ3 पुरप्रवेश, T2 G1 4 पाडवानां (G1 पांडव) नगरप्रवेश (G4 °वेशन) — *Adhy no* (figures, words or both) Dn1.n3 125, D4 126, S 68 (T1 117) — *S'loka no* Dn 35, M3 50 — *Aggregate s'loka no* Dn2 4933

118

1 Before धृत°, D5 ins

1287* वैशंपायन ।
कुरवश्च तदा सर्वे पाण्डो श्रुत्वा तथा विधिम् ।
भीष्मप्रभृतयो मात्रा जगृहुस्तान्सुतान्सह ।

— K1 S om. उवाच — d) M3.5 चापि (for चैव) Ś1 K यथा विधि (Ś1 -विधि, K1 विदि)

2 a) T1 वसु (for पशून्) B1.3 D2 4 वस्त्राणि, Da1 वासोपि K2 4 गा सुवर्णं च वासासि — b) Ś1 वासांसि (sup lin sec m as in text), B3 सर्वाणि Ś1 K0-2 4 विपुलानि च K3 D2 4 विविधा(K3 °पुला)नि धनानि च

3 a) Ś1 K1 कुती च (by transp) T1 कुत्यां, T2 G2 4 6 M3 5 कुत्या K3 D1 संस्कार, Ñ1 सत्कार्यं — b) Ś1 माद्या कुर्यात् (by transp) T2 G (except G1.3) तथैव च (for तथा कुरु) — c) S1 T2 M3 वायुरादित्य, G1 वायु सादित्य K2 4 Ñ3 यां न (Ñ3 यथा) वायुर्न चादित्य — d) Ś1 K सुमध्य(K1 °मुख्य)मां

4 a) Ś1 मा, Ñ B (except B1) Da D2 4 स (for न) G1 न शोच्या पाडुतनया (see below) — b) Ś1 K1 च (for स) G1 प्रशस्या पार्थिवात्मजा (see below) — After 4, G1 ins

1288* स पाण्डुश्च न शोच्य स्याप्रवर पुण्यकर्मणाम् ।

5 Ś1 K0 1 3 D5 S om उवाच (T1 om the ref) — a) K0 3 Ñ1 2 B1 3 Da D1 2 4 M तु, K2 4 तत्, T G स (for त) — b) K3 सह भीष्मे° (by transp) — c) Ś1 Ñ1 3 सत्कारया° — d) K3 °सत्कृ°; B6 Dn D1 °पूजि°; S

C. 1. 4635
B. 1. 127. 4
K. 1. 135. 4

यस्य पञ्च सुता वीरा जाताः सुरसुतोपमाः ॥ ४
वैशंपायन उवाच ।
विदुरस्तं तथेत्युक्त्वा भीष्मेण सह भारत ।
पाण्डुं संस्कारयामास देशे परमसंवृते ॥ ५
ततस्तु नगरात्तूर्णमाज्यहोमपुरस्कृताः ।
निर्हृताः पावका दीप्ताः पाण्डो राजपुरोहितैः ॥ ६
अथैनमार्तवैर्गन्धैर्माल्यैश्च विविधैर्वरैः ।
शिबिकां समलंचक्रुर्वाससाच्छाद्य सर्वशः ॥ ७
तां तथा शोभितां माल्यैर्वासोभिश्च महाधनैः ।
अमात्या ज्ञातयश्चैव सुहृदश्चोपतस्थिरे ॥ ८
नृसिंहं नरयुक्तेन परमालंकृतेन तम् ।
अवहन्यानमुख्येन सह माद्या सुसंवृतम् ॥ ९
पाण्डुरेणातपत्रेण चामरव्यजनेन च ।
सर्ववादित्रनादैश्च समलंचक्रिरे ततः ॥ १०
रत्नानि चाप्युपादाय बहूनि शतशो नराः ।
प्रददुः काङ्क्षमाणेभ्यः पाण्डोस्तत्रौर्ध्वदेहिकम् ॥ ११
अथ छत्राणि शुभ्राणि पाण्डुराणि बृहन्ति च ।
आजह्रुः कौरवस्यार्थे वासांसि रुचिराणि च ॥ १२
याजकैः शुक्लवासोभिर्हूयमाना हुताशनाः ।
अगच्छन्नग्रतस्तस्य दीप्यमानाः स्वलंकृताः ॥ १३
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव सहस्रशः ।
रुदन्तः शोकसंतप्ता अनुजग्मुर्नराधिपम् ॥ १४

°सम° (for °सवृ°)

6 a) T2 स्म (for तु) G1 ततो नागपुरात्तूर्णं — b) Ñ1.2 B D (except D5) M8 आज्य(D4 माल्य)गन्ध° — c) Ś1 निवृता, K4 निनि° (sic), Dn निर्ग°; T2 G8 नि (T2 नि)स्र°, M6-8 निर्वृ° — d) K2.4 Ñ1.2 B6 Dn राजन्पुरो° — After 6, G1 ins

1289* पलाशवृन्तकाष्ठैश्च कुशमुञ्जकयल्वजैः ।
सूत्रोक्तेन विधानेन शरीरे चक्रुरञ्जसा ।
अथ दर्भे तयोर्भूप कृत्वा प्रतिकृती तयो ।
शिबिकायामथारोप्य शोभितायामलंकृते ।

7 ab) Ś1 K1.8 Ñ1.2 Da2 G1.8 अथैनाम्; Ko अप्येनम्; M8 तथैनम् Ko D5 माल्यैर्गंधैश्च (by transp.), Ñ1 पुष्पैः सुगंधैः; Ñ2 B Da Dn D1.2.4 G1 पुष्पै(Dn2 °ष्पै)र्गंधैश्च (for गन्धैर्माल्यैश्च) K1 °र्तवैर्गंधपुष्पैर्धूपविलेपनैः — c) T1 G2 शिबिकास्यम् N (except Ś1 K1) G1 M ताम् (for सम्) Ko Ñ1.2 B D G1.8 अलंकृत्य — d) S वस्त्रै राच्छाद्य K1.2.4 सर्वत — After 7, G1 ins

1290* मुक्ताप्रवालमाणिक्यहेमस्रग्भिरलंकृताम् ।

8 a) T2 G1-6 त तथा K8 T2 G2.4-8 शोभित; T1 G8 शोभितैर् — b) Ko D5 S विविधैश्च K1 परतप; Ñ1.2 B (except B6) Da D2.4 महाद्युते — After 8ab, G1 ins

1291* दर्पणाशोकपुंनागमल्लिकाजातिचम्पकैः ।
नालिकेरफलैः पुष्पैः पूगीफलसुनार्चितैः ।

and thereafter repeats 8ab (the usual indication of interpolation). — c) Ñ1.2 Da D1 चैनं K1 सर्वे सम्भृतमभार — d) K1 त जना; M (except M5) याजका (for सुहृद) G1 चोपजीविन; G8 चायतस्थिरे

9 a) K1 B6 Da T1 Nilp नृसिंह (voc.), Arjp as in text G1 नरमुख्येन — b) K1 B6 D2 G1 च (for तम्) — c) B5 अहरन् (m as in text). — d) K1 माद्या चापि T G2.6 सुसम्भृत

10 a) S (except T1 G5.6) पांडरेण — b) G1 °व्यजनैरपि — c) K8 °शब्दैश्च

11 a) S तत सर्वाणि रत्नानि (G1 रम्याणि) — b) G1 नृप, G5 नृपा (for नरा) — d) Ś1 तत्रौर्ध्वदैहिक, Ko 2.4 G8 तत्रोर्ध्वदेहिक (K2.4 के), K1 तत्रौदिर्धौदक (sic), K8 D5 T1 तत्रो(T1 °त्रौ)र्ध्वदैहिके; Ñ B तस्यौर्ध्व, Da2 तस्योर्ध्व°; Dn D1.2.4 तस्यौर्ध्वदे(Dn2 °स्योर्ध्वदे)हिके; T2 G5.6 तत्रौर्ध्वदेहिके; G1 तत्रोर्ध्वदैहिक

12 a) T G अच्छिद्राणि च D2 यानानि, D5 सर्वाणि; T1 दिव्यानि, G1 कुमानि, Cd शुभ्रा° (as in text). — b) Ñ1.2 B1.8 D (except Da) चामराणि, B1m.5.6 S (except T1) पाड°, Cd as in text. D1 महांति च; S बहूनि च — c) T1 पाडवस्यार्थे — d) Ś1 K1 च धनानि; G8 विविधानि (for रुचि°)

13 a) K2 याज्ञिकैः, Cd as in text. Ko चित्र°; Dn2 शुभ्र° (for शुक्ल°) — c) K4 B2 Da1 D1.2 T2 G8 आगच्छन्, B6m अतिष्ठन् Ś1 Ko तत्र (for तस्य)

14 b) Ñ1.2 B5.6 Da विशोपत°, G1 परे च ये (for सह°) — c) K4 रुदत शो° — After 14c, G1 ins

1292* रुदन्तश्च तथा स्त्रिय ।
विकीर्णमूर्धजा सर्वे मूर्ध्नि विन्यस्तपाणय ।
उरस्ताड रुदन्त्यश्च स्त्रिय सर्वा अनुव्रता ।
एकवस्त्रधरा सर्वे निराभरणभूषिता ।
नोष्णीषिणो महाराज निरानन्दा भृशातुराः ।

अयमस्मानपाहाय दुःखे चाधाय शाश्वते ।
कृत्वानाथान्परो नाथः क्व यास्यति नराधिपः ॥ १५
क्रोशन्तः पाण्डवाः सर्वे भीष्मो विदुर एव च ।
रमणीये वनोद्देशे गङ्गातीरे समे शुभे ॥ १६
न्यासयामासुरथ तां शिविकां सत्यवादिनः ।
सभार्यस्य नृसिंहस्य पाण्डोरक्लिष्टकर्मणः ॥ १७
ततस्तस्य शरीरं तत्सर्वगन्धनिषेवितम् ।
शुचिकालीयकादिग्धं मुख्यस्नानाधिवासितम् ।
पर्यषिञ्चञ्जलेनाशु शातकुम्भमयैर्घटैः ॥ १८
चन्दनेन च मुख्येन शुक्लेन समलेपयन् ।
कालागुरुविमिश्रेण तथा तुङ्गरसेन च ॥ १९
अथैनं देशजैः शुक्लैर्वासोभिः समयोजयन् ।
आच्छन्नः स तु वासोभिर्जीवन्निव नरर्षभः ।
शुशुभे पुरुषव्याघ्रो महार्हशयनोचितः ॥ २०
याजकैरभ्यनुज्ञातं प्रेतकर्मणि निष्ठितैः ।
घृतावसिक्तं राजानं सह माद्र्या स्वलंकृतम् ॥ २१
तुङ्गपद्मकमिश्रेण चन्दनेन सुगन्धिना ।
अन्यैश्च विविधैर्गन्धैरनल्पैः समदाहयन् ॥ २२

C. 1 4954
B. 1 127 23
K. 1 136 26

पुरुषाश्च स्त्रिय सर्वा
— d) K0 स्त्वनुजग्मुर्, M (except M5) ह्यनु° T1 यथा नृप
15 b) Ś1 S दु ख and शाश्वत Ś1 K1 चादाय, G1 आधाय — c) K1 स नो नाथ, T2 G2 4-6 पुरो(T2 °रा)नाथ, G1 अनाथांश्च (for परो नाथ) Ñ1 2 B D कृत्वा चास्माननाथांस्त्व (Dn °श्च) — d) K2 4 क्षयं जातो, B (except B5) D (except Da1) T1 क्व यास्यसि K2 B D (except Da1 D1. 5) °धिप — After 15, G1 ins
1293* अनिधाय सुतान्राज्ये वने जातान्यशस्विन ।
अ**पुत्रसपत्ति क्व यास्यसि महीपते ।
(the last pāda repeats, with v 1, 15d)
16 a) G1 चापि (for सर्वे). — After 16ab, D4 (marg sec m) S ins
1294* बाह्लीक सोमदत्तश्च तथा भूरिश्रवा नृप ।
अन्योन्य वै समाश्लिष्य अनुजग्मु सहस्रश ।
[(L 2) D4 रुरुदुर्भृशदु खिता (for the posterior half)]
— d) Dn1 वने (for समे) G8 मनोरमे (for समे शुभे)
17 a) T G वाह(G1 °स)यामासु°, Cd as in text — b) G1 पाद्रुमाद्रियो (for सत्य°) — d) K8 पाण्डो राजर्षिधर्मिण — After 17, G1 ins
1295* आछिद्य वाससवीत देशशुद्धिं वितेनिरे ।
18 a) K0 B8 Dn D1 2 5 तु (for तत्) G1 ततस्तयो शरीरे ते — b) Ñ1 2 B D (except D5) °गधाधि(Dn1 ns D1 °गधवि)वासित, G1 °निषेविते — c) D4 T G2-6 M8 8 °कालेयका° G1 अनेन शुचिना शुद्धे — d) K1 मुख्य नानादिग्धा°, Ñ1 2 B D दिव्यचदनसेवित (B6 Dn D1 °रूपित, D5 पुण्यस्नानाधिवासित); G1 °वासिते
19 a) K8 Ñ B D (except D5) च शुक्लेन, G1 सुगधेन — b) K8 मुख्येन, B D (except D5) सर्वत. (for शुक्ले°) Ñ1 2 सर्वत समलकृत — c) K1 °विमुक्तेन, S (except G8) कालागरु° — d) T2 G (except G1 8) धातुरसेन Ś1 तु; K8 वै (for च)
20 a) G5 ते गजै (for देश°) Ś1 B5 D5 G1 शुभ्रै° — b) Ñ8 °पूजयन् — c) Ñ1 2 B D (except D5) स(D1 स)छन्न स, G1 आच्छन्नौ तौ — d) K0 भरतर्षभ, Ñ1. 2 B (except B5) D (except D5) नराधिप G1 सर्वालकार-शोभितौ — e) Ñ1 2 B D (except D5) शुशुभे स नरव्याघ्रो, G1 सजीवाविव राजेंद्र — f) G1 शुशुभाते तु पश्यता — After 20, D4 (marg sec m) S ins
1296* हयमेधाग्निना सर्वे याजका सपुरोहिता ।
वेदोक्तेन विधानेन क्रियाश्चक्रु समन्त्रकम् ।
[(L 1) D4 T2 M8 °मेधान्विता° M8 (inf lin) 5 समलकृता (for सपुरो°) — (L 2) D4 T1 G1. 2 M8 5 क्रियां चक्रु]
21 a) Ñ B D (except D5) °ज्ञाते; S (except G8) °ज्ञाता (M6-8 °ज्ञात) — b) K1 °कर्मसु, K4 G1 °कर्माणि K0 धिष्ठितै, K1 °त, K4 °कै, Ñ1 2 B D अनुष्ठिते (D1 °तै; D5 अधिष्ठितै.), Ñ8 G6 °ते, T2 निष्कृतै, G8 4 निर्वृतै, G5 °ता — c) M8 (inf lin) 6-8 °सिक्तेन तदा — d) G2 4 5 सम माद्र्या K2-4 परतप (for स्वल°)
22 a) Dn D1 °पद्म(Dn2 °पत्र)विमि°, M6-8 (by transp) पद्मतुगक° — b) G8 पद्मकेन (for चन्द°) T2 G5 सुगधित — After 22ab, D4 (marg sec m) S ins
1297* सरल देवदारु च गुग्गुलु लाक्षया सह ।
रक्तचन्दनकाष्ठैश्च हरिबेरैरुशीरजै ।
[(L 1) G8 सुरथ (for सर°) — (L 2) D4 G5 शृगिवेरै, T1 हरियीजै; G2 हरिवारै; G8 हरिकेशै, G4 हरिवीरै]
— c) D5 पुष्पैश्च वि° सर्वै — d) Ñ B Da D1. 2 4 वस्त्रैश्च, Dn T G2 4-6 विधिना, G8 M राजान (for अनल्पै.) Ñ1 सममादहन् G1 यज्ञियैश्चैव दारुभि — After 22, S ins
1298* दृतासुतैस्तथा वस्त्रै मावारैश्च महाधनै ।

C. 1 4955 B. 1 127 24 K. 1 130. 27

ततस्तयोः शरीरे ते दृष्ट्वा मोहवशं गता ।
हा हा पुत्रेति कौसल्या पपात सहसा भुवि ॥ २३
तां प्रेक्ष्य पतितामार्तां पौरजानपदो जनः ।
रुरोद सस्वनं सर्वो राजभक्त्या कृपान्वितः ॥ २४
क्लान्तानीवार्तनादेन सर्वाणि च विचुक्रुशुः ।
मानुषैः सह भूतानि तिर्यग्योनिगतान्यपि ॥ २५
तथा भीष्मः शांतनवो विदुरश्च महामतिः ।
सर्वशः कौरवाश्चैव प्राणदन्भृशदुःखिताः ॥ २६
ततो भीष्मोऽथ विदुरो राजा च सह बन्धुभिः ।
उदकं चक्रिरे तस्य सर्वाश्च कुरुयोषितः ॥ २७
कृतोदकांस्तानादाय पाण्डवाञ्शोककर्शितान् ।
सर्वाः प्रकृतयो राजञ्शोचन्त्यः पर्यवारयन् ॥ २८
यथैव पाण्डवा भूमौ सुषुपुः सह बान्धवैः ।
तथैव नागरा राजञ्शिश्यिरे ब्राह्मणादयः ॥ २९
तदनानन्दमस्वस्थमाकुमारमहृष्टवत् ।
बभूव पाण्डवैः सार्धं नगरं द्वादश क्षपाः ॥ ३०

इति श्रीमहाभारते आदिपर्वणि अष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥

घृतपूर्णस्तथा कुम्भै राजान समदाहयन् ।
[(L 1) G3 प्राधान्यैश्च, M6-8 प्रवरैश्च]

23 a) Ś1 शरीरेण Ñ B (except B3) D (except D5) द्वे (for ते) — b) K1 D1 गत ; K3-4 B6 Da D2 5 T1 G1-3 5 M6-8 °ता — K0 om from गता up to °पदो (in 24b) — c) Some MSS कौशल्या — d) K3 4 °त भुवि मूर्छिता

24 K0 om up to °पदो (of v l 23) — a) Ñ1 वीक्ष्य — b) D4 T2 G3 °पदा जना — c) D5 T G6 रुरुदु K0 D4 G1 M (M8 inf lin as in text) °स्वर ; T1 G3 सुस्वर ; T2 सु° D4 T G6 सर्वे, G3 4 °र्वा Ñ1.2 B Da Dn D1 3 4 G6 रुरोद दु ख(D4 शोक)सतप्तो — d) D5 T G6 कृपान्विता

25 a) Ñ1 2 B5 क्लांतानि (B3 °नां) चार्त° ; B6 Da क्लां(B6 क्लां)तानामार्त° ; Dn D1 कुल्याश्चैवार्त°, T1 क्लांता दीनार्त° ; G1 क्लाता ह्यार्त°, M (except M6) दीनानि चार्त° — b) Ñ1 2 B Da D2 4 तानि सर्वाणि चुक्रुशु ; G1 सर्वास्ताश्चुक्रुशु स्त्रिय — After 25, G1 ins

1299* सर्वाणि सहदु खानि रुरुदु सह तैर्जनै ।

26 Dn2 om 26 — a) Ś1 K (except K3) D4 ततो भी° — b) G1 महीपते (for महा°) — c) S ज्ञातय कौ — d) Ś1 K0 1 G3 5 M7 प्रणदन् ; K3 G2 प्र(G2 प्रा)रुदन् ; D4 प्रणेदुर् D2 प्राणदस सुदु° — After 26, S ins

1300* चुक्रुशु पाण्डवा सर्वे धृतराष्ट्रश्च भारत ।

27 a) Dn2 S (except M5 6) तथा (for ततो) G1 2 4 च (for अथ) — b) D4 द्रोणश्च (for राजा च) Ñ1 2 B1 5 Da D2 4 सोदरै ; Ñ3 B3 6 Dn D1 G2 3 पांडवै, T1 G4-6 M माधवै (for बन्धु°) G1 धृतराष्ट्र सबांधव° — T1 (hapl) om 27c-29b — c) T2 G2 4-6 सर्वे, G1 3 M पांडो (for तस्य) — d) T2 G2 4-6 पाण्डोश्च (for सर्वा°) K0 D5 पुरयोषित G1 माद्याश्चैव पृथक्पृथक् — After 27, Ś1 K (except K3) B5 6 D (except Da) ins

1301* चुक्रुशु पाण्डवा सर्वे भीष्म शांतनवस्तथा ।
विदुरो ज्ञातयश्चैव चक्रुश्चाप्युदकक्रियाम् ।;

while G1 ins

1302* एककुण्डे पृथक्चैव पिण्डांश्चैव पृथक्पृथक् ।
ददुर्धर्मोदक सर्वे सर्वाश्च कुरुयोषित ।

(the last pāda repeating 27d)

28 T1 om 28 (of v l 27) — a) G3 °कांस्तदादाय — b) A few MSS °कर्षितान् — K3 om 28cd — Ś1 K1 2 (hapl) om 28d-29c — d) K4 D2 G1 3 M5 6 शोचत Ñ1 B6 Da Dn D1 शोचमाना न्यवारयन्

29 Ś1 K1 2 om 29abc, T1 om 29ab (of v l. 27, 28) — a) T2 G (except G1 3) यथा च — b) K0 3 4 Ñ3 B5 m D5 शिशियरे ; S (T1 om) शेरते K3 सह कौरवै — c) K0 नागरा सर्वे — d) T1 G2 शेरते

30 a) Dn तद्गतानदम् B5 आत्मस्थम् ; D2 अन्विच्छन् (for अस्वस्थम्)

Colophon om in B1 3. *Major parvan* T2 G M सभव° (for आदि°) — *Sub-parvan* Ś1 K0-2 4 Ñ1 2 B5 Dn1 n2 D1 4 5 T1 सभव — *Adhy name* K3 G1 पांडुसस्कार ; Ñ1 2 पांडुदाह ; N3 प्रेतकर्म — *Adhy no* (figures, words or both) Dn1 n2 126, D4 127, S 69 (T1 118) — *S'loka no* Da1 31, Dn 32 (Dn1 33) M5 36 — *Aggregate s'loka no* Dn2 4965

११९

वैशंपायन उवाच ।
ततः क्षत्ता च राजा च भीष्मश्च सह बन्धुभिः ।
ददुः श्राद्धं तदा पाण्डोः स्वधामृतमयं तदा ॥ १
कुरूंश्च विप्रमुख्यांश्च भोजयित्वा सहस्रशः ।
रत्नौघान्द्विजमुख्येभ्यो दत्त्वा ग्रामवरानपि ॥ २
कृतशौचांस्ततस्तांस्तु पाण्डवान्भरतर्षभान् ।
नाचक्षुर्वेत्ति पन्थानं नाचक्षुर्विन्दते दिशः ।
नाधृतिर्भूतिमाप्नोति बुध्यस्वैवं प्रबोधितः ॥ २१
अनाप्तैर्दत्तमादत्ते नरः शस्त्रमलोहजम् ।
श्वाविच्छरणमासाद्य प्रमुच्येत हुताशनात् ॥ २२
चरन्मार्गान्विजानाति नक्षत्रैर्विन्दते दिशः ।
आत्मना चात्मनः पञ्च पीडयन्नानुपीड्यते ॥ २३
अनुशिष्टानुगत्वा च कृत्वा चैनान्प्रदक्षिणम् ।
पाण्डवानभ्यनुज्ञाय विदुरः प्रययौ गृहान् ॥ २४
निवृत्ते विदुरे चैव भीष्मे पौरजने तथा ।
अजातशत्रुमामन्त्र्य कुन्ती वचनमब्रवीत् ॥ २५
क्षत्ता यदब्रवीद्वाक्यं जनमध्येऽब्रुवन्निव ।
त्वया च तत्तथेत्युक्तो जानीमो न च तद्वयम् ॥ २६
यदि तच्छक्यमस्माभिः श्रोतुं न च सदोषवत् ।
श्रोतुमिच्छामि तत्सर्वं संवादं तव तस्य च ॥ २७

युधिष्ठिर उवाच ।

विषादग्नेश्च बोद्धव्यमिति मां विदुरोऽब्रवीत् ।
पन्थाश्च वो नाविदितः कश्चित्स्यादिति चाब्रवीत् ॥
जितेन्द्रियश्च वसुधां प्राप्स्यसीति च माब्रवीत् ।
विज्ञातमिति तत्सर्वमित्युक्तो विदुरो मया ॥ २९

वैशंपायन उवाच ।

अष्टमेऽहनि रोहिण्यां प्रयाताः फल्गुनस्य ते ।
वारणावतमासाद्य ददृशुर्नागरं जनम् ॥ ३०

इति श्रीमहाभारते आदिपर्वणि त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥

M₆₋₈ महाप्राज्ञ; G₁₋₃ ₆ M₅ °बुद्धि; Da (erroneously) Arjp महाप्राज्ञे (as in text), Arj (?) महाप्राज्ञ T₁ G₃ ₄ ₆ M दिष्टिवक्त्र; G₁ ₂ विलोपन — ᵉ) S न दहेते (T₁ °देति (T₁ G₁ ₄ नास्य घेति) T₂ G₂ पथान (cf. 21ᵃ).

21 ᵃ) T₁ G₁ ₂ °बुध्यति वै — Ś₁ K₁ T₂ G₂ (hapl.) om. 21ᶜ-23ᵇ. — ᶜ) K₀ M₃ भूतिम्, Ñ₁ V₁ D₂ G₃ बुद्धिम्; D₆ धृतिम् (for भूतिम्) — ᵈ) D₁ ₄ T₁ G₁ ₆ [illegible]; M (except M₈) एवम् (for एव)

22 Ś₁ K₁ T₂ G₂ om. 22 (cf. v. l. 21). M ins. युधिष्ठिर before 22ᵃᵇ, G₃ before 22ᶜᵈ — ᵃᵇ) S (T₁ G₁ ₂ ₋) नानाप्तैर्दत्तं, and धीर (G₃ धीम ; M₅ गिर) (for नर) — ᶜ) K₀ °च्छरणम्; K₃ ₄ P (except B₁) Da (erroneously) Arj C [illegible] °च्छरणम्; G₁ ₂ ₃ °शरणम्; Arj °च्छरणम् (as in text) — ᵈ) K₃ प्रमुच्येत पुन [illegible] (= विमुच्येत हुताशनात्); M₃ एवं [illegible] बुध्यस्व [illegible]

23 Ś₁ K₁ T₂ G₂ om. 23ᵃᵇ (cf. v. l. 21) — ᵃ) D₁ [illegible] — ᵇ) G₁ ₂ °श्च तथा G₄ [illegible] (for दिशः) — ᶜ) Ś₁ K₁ आत्मनात्मना (by transp.) — ᵈ) K₁ [illegible]; G₁ ₂ ₃ न [illegible]; M₃ ₄ [illegible]; C as in text — After 23, K₁ Ñ V₁ B D T₁ ins.:

1459* [illegible] धर्मात्मा युधिष्ठिर ।
विदुर विदुषां श्रेष्ठ [illegible] च पाण्डव ।

24 Before 24, K₀ [illegible]; K₃ ₄ B (except D₁) [illegible] — ᵃ) Ś₁ K₁ T₁ Da D₁ G₁ M₆₋₈ Cd अनुशिष्य; Ñ V₁ [illegible] Da D₁ ₂ ₄ विदुर Ñ V₁ B D (except D₁) T₁ अनुगम्यैतान् (V₁ °ता °न्) — ᵇ) Ñ V₁ B Da Dn D₁ ₃ ₄ चैव (B₁ °च); D₁ G₁ ₂ ₄ चैतान्; T₂ G₃ ₄ ₅ M पार्थान् — After 24ᵃᵇ, S (except G₁ ₂ ₃) ins.:

1460* अभिवाद्य तत कुन्तीं दत्त्वा पाण्डुमथिम्तयत् ।
[M₅ ₈ °वाद्य पुन G₁ ₄ दत्त्वा पाण्डोरधितयत्]

— ᶜ) T₁ G₁ ₂ समनुज्ञाय — ᵈ) Ś₁ K₁ D₁ ₃ G₂ गृह T₂ G₁ ₄ ₅ विदुर सन्यवर्तत; M विदुर मत्स्यपावृत

25 ᵃ) Ñ₁ ₂ V₁ B D (except D₁) T चापि (for चैव) — ᵇ) G₁ ₆ जनेपि च — ᶜ) Ñ₁ ₂ V₁ B Da D₁ S (except G₁ ₂ ₆) °शत्रुमासाद्य — ᵈ) T₂ G₁ ₄ ₅ कुन्ती वाक्यमथाब्रवीत्

26 Before 26, D₁ marg. sec. m. ins. पृथुवाच; T₁ G₁ ₂ M₆₋₈ कुन्ती — ᵇ) T₁ G₂ ब्रुवन्निव; Arj explains both अब्रुवन्निव and अब्रु, which latter is Dorp. — K₁ om. 26ᶜ-27ᵇ — ᶜ) K₀ Ñ₁ ₂ B D T₁ G₁ ₆ त्व; K₃ ते; Ñ₁ V₁ स (for तत्) D₁ °ध्युक्ते; G (except G₁ ₃) M₁ ₂ °युक्ता

27 K₁ om. 27ᵃᵇ (cf. v. l. 26), G₁ om. 27 — ᵃ) Ñ₁ B₁ ₂ Da₂ Dn D₁ यद्वि; B₃ Da₂ D₁ ₄ T₁ G₃ यद्दि — ᵇ) Ñ₁ V₁ B D (except D₁ ₃) T₁ श्रातुं (for श्रोतुं) B (except B₆) Da T₂ G₁ ₂ M₁ नैव च (B₁ न) दोष ; G₁ ₆ न च गुणेन — ᵈ) K₀ विवाद G₁ ₂ ₆ मम (for च)

28 Ś₁ K₁ S om. उवाच — ᵃ) Ñ₁ बोधव्यम् (for बोद्धव्यम) Ñ₁ V₁ B D (except D₁) गृहादग्निश्च बोद्धव्य — ᵇ) B [illegible] M₆₋₈ ना (for मां) — K₁ (hapl.) om.

१३४

वैशंपायन उवाच ।
ततः सर्वाः प्रकृतयो नगराद्वारणावतात् ।
सर्वमङ्गलसंयुक्ता यथाशास्त्रमतन्द्रिताः ॥ १
श्रुत्वागतान्पाण्डुपुत्रान्नानायानैः सहस्रशः ।
अभिजग्मुर्नरश्रेष्ठाञ्श्रुत्वैव परया मुदा ॥ २
ते समासाद्य कौन्तेयान्वारणावतका जनाः ।
कृत्वा जयाशिषः सर्वे परिवार्योपतस्थिरे ॥ ३
तैर्वृतः पुरुषव्याघ्रो धर्मराजो युधिष्ठिरः ।
विबभौ देवसंकाशो वज्रपाणिरिवामरैः ॥ ४
सत्कृतास्ते तु पौरैश्च पौरान्सत्कृत्य चानघाः ।
अलंकृतं जनाकीर्णं विविशुर्वारणावतम् ॥ ५
ते प्रविश्य पुरं वीरास्तूर्णं जग्मुरथो गृहान् ।
ब्राह्मणानां महीपाल रतानां स्वेषु कर्मसु ॥ ६
नगराधिकृतानां च गृहाणि रथिनां तथा ।
उपतस्थुर्नरश्रेष्ठा वैश्यशूद्रगृहानपि ॥ ७
अर्चिताश्च नरैः पौरैः पाण्डवा भरतर्षभाः ।
जग्मुरावसथं पश्चात्पुरोचनपुरस्कृताः ॥ ८
तेभ्यो भक्ष्यान्नपानानि शयनानि शुभानि च । C. 1 5776 B 1 146 9 K 1 158. 9

28^c–29^b — ^cd) K0 ते (for वो) K8 D5 वो न विदित ; T1 वेदितव्यस्ते, G1 विदित कार्यं Ś1 K0 2 4 Ñ8 °दिति पांडव (K4 °वः, Ñ8 °वै.), Ñ2 V1 B D °दिति धर्मधी (D1 °द्धर्मधी पुमान्); M6–8 °दिति सोऽब्रवीत् T2 G4.5 पथाश्च विदित शुद्ध° (G4 कार्यं ; G5 शुद्धि) कश्चि° G2 3 6 पथाश्च विदित° कश्चित्स्याच्छुद्ध (G6 °द्धिर्) इति चा°

29 K1 G3 om. 29^ab (of v 1 28) — ^b) Ñ3 B Dn D2 T2 G2 4 M8 (inf lin) 5 6 8 प्राप्स्यतीति V1 स मे°, B D T1 च मे°; G4 ममा° — ^c) G1.5 मे सर्वे — ^d) K8 Ñ8 B D (except D5) T G (except G5) प्रत्युक्तो

30 Ś1 K1–4 D2 5 S om उवाच (M6–8 om the ref) — Ś1 (hapl) om 30 with colophon. — ^a) K1 दशमेहनि — ^b) K Ñ V1 B D (except D1, D4 before corr) T1 G3 4 M8 5 फाल्गुन° (K1 फल्गुण°) K1 मे, D5 च, G3 तत्, M6–8 वै (for ते)

Colophon om in Ś1 (of v 1 30) — *Major parvan* T2 G M सभव° (for आदि°) — *Sub-parvan* Ñ V1 B3.6 Dn D2 4 जतुगृह; B1.5 Da जातुष, T1 सभव — *Adhy name* K0 4 वारणावतयात्रायां युधिष्ठिरप्रयोध° (K4 °ष्ठिरमतिबोधन), K2 D5 G1 वारणावत(K2 ins here रणे)यात्रा, K8 वारणावतप्रवेश , Ñ1 2 V1 वारणावत गमन, M जतुगृहदाहे (M8 om it) विदुरयुधिष्ठिरसंवाद — *Adhy no* (figures, words or both) B1 142, Dn8 144, D4 147, T1 140, T2 G1 5 6 91, G2 92, G3.4 M 90 — *S'loka no* Dn 34, M8 33. — *Aggregate s'loka no* . Dn2 5773.

134

1 Ś1 om the ref , K1–8 D5 S om उवाच — ^d) T2 G4 5 वस्त्रशस्त्रैर् (for यथाशास्त्रम्) S अलकृता B1m.5 Da D4 यथाशास्त्रविशारदा .

2 ^a) Da D4 श्रुत्वायातान्, M8 5 अभ्यागतान्. S (except T1) पाण्डवेयान् — ^c) T2 G °श्रेष्ठा — ^d) B1 तान्राजन्परया; T2 G1.4 5 सर्वे परमया.

3 ^c) K1 सर्वे प्रमुदिता दृष्टा — ^d) Ñ2 B D (except Dn8 D5) T1 परिवार्यावत°; T2 G M परिवव्रुर्युधिष्ठिर.

4 ^b) Ś1 K2 धर्मपुत्रो — ^c) K1 शुशुभे, M (except M5) बभौ स K1 भ्रातृसहितो — ^d) K8 °रिवापर .

5 ^a) Ś1 ते च, Ñ2 B Da Dn D1.2 4 T1 चैव, T2 G M (except M5) तत्र (for ते तु) Ś1 B1 3 तु, Ñ2 B5 6 Dn D1 T1 ते (for च) D5 °स्ते तथा पौरै — ^b) K2 ताश्च (for पौरान्) Ñ1 2 V1 B3 Dn D1 4 5 T1 चानघ (Dn8 पाण्डवा) — ^c) Ś1 K1 Da1 D5 G2 4 6 अलकृत

6 ^a) K4 Ñ V1 B Dn D1.2 4 G3 5 पुरीं — ^b) S (except T1) ययुर् — ^d) G4 युक्ताना M8 स्वेष्टकर्मसु

7 ^b) K (except K2) रथिनस् K2 (by corr) Ñ V1 Dn1 n2 D1 G3 5 6 M6–8 तदा — ^c) D4 (by corr) G3 °श्रेष्ठ V1 विविशु पुरुषव्याघ्रा — ^d) Ś1 Dn8 D5 T2 G5 M °गृहाण्यपि, Ñ2 B Da Dn1 n2 D1 2 4 T1 °कुलान्यपि.

8 ^a) K3 °रै सर्वै — ^b) G1 3 6 कौरवा, G2 पौर°. K D5 पुरुषर्षभा (K1 °भ), Ñ V1 B (except B1) Da Dn1.n2 D1.2 4 T1 G (except G5) °र्षभ — ^c) Ñ1 °श्च तस्मात् — ^d) Ñ2 B Dn D2 4 T1 °पुर सराः, Da D1 °पुरोगमा.

आननानि च मुख्यानि प्रददौ स पुरोचनः ॥ ९
तत्र ते सत्कृतास्तेन सुमहार्हपरिच्छदाः ।
उपास्यमानाः पुरुषैरूषुः पुरनिवासिभिः ॥ १०
दशरात्रोषितानां तु तत्र तेषां पुरोचनः ।
निवेदयामास गृहं शिवाख्यमशिवं तदा ॥ ११
तत्र ते पुरुषव्याघ्रा विविशुः सपरिच्छदाः ।
पुरोचनस्य वचनात्कैलासमिव गुह्यकाः ॥ १२
तत्त्वगारमभिप्रेक्ष्य सर्वधर्मविशारदः ।
उवाचाग्नेयमित्येवं भीमसेनं युधिष्ठिरः ।
जिघ्रन्सोम्य वसागन्धं सर्पिर्जतुविमिश्रितम् ॥ १३
कृतं हि व्यक्तमाग्नेयमिदं वेश्म परंतप ।
शणसर्जरसं व्यक्तमानीतं गृहकर्मणि ।
मुञ्जबल्वजवंशादि द्रव्यं सर्वं घृतोक्षितम् ॥ १४
शिल्पिभिः सुकृतं ह्याप्तैर्विनीतैर्वेश्मकर्मणि ।
विश्वस्तं मामयं पापो दग्धुकामः पुरोचनः ॥ १५
इमां तु तां महाबुद्धिर्विदुरो दृष्टवांस्तदा ।
आपदं तेन मां पार्थ स संबोधितवान्पुरा ॥ १६
ते वयं बोधितास्तेन बुद्धवन्तोऽशिवं गृहम् ।

---

9 a) K0.1 D1 M (except M1) भक्ष्याण° ; K3 भिक्षाण° ; Ñ1 B (except B1) [ऽ]न्न (Ñ1 B1 °न्न) मद्यपानानि ; Da1 Dn1 T1 मद्यानि पानानि ; D1 भक्ष्याणि भोज्यानि, D1 रत्नानि पानानि ; G1 [illegible] — b) K1 विविधानि तु G (except G1) शुभा(G1 °द्रा)नि शयनानि च — c) G1 M1-4 च (for स) — After 9, D1 reads 11cd

10 For 10ab, D1 reads 12ab — a) D1 [illegible] (for तेन) — b) T1 G1.2.3 °च्छदाः — G1 (hapl.) om. 10c–12b — cd) Ñ1 [illegible]

11 G1 om. 11 (cf. v. l. 10). — a) Ś1 K1.2 T1 G1.2 च (for तु) — b) B1 तेषां तत्र (by transp.) — D1 reads 11cd after 9 — c) K0 G1 M1 निवेशया° — d) G1 [illegible] Ś1 K0-3 तत्र ; K4 च तत्र ; D1 T1 G1.2 तदा

12 G1.2 om. 12ab (cf. v. l. 10), D1 reads 12ab for 10ab — a) Ś1 T1 G1.2 [illegible] ; K0 (by transp.) स तत्र — b) K1 [illegible] — D1 om. 12c–13b — d) T1 G1 [illegible]

13 [illegible] om. 13ab (cf. v. l. 12). — a) K0 G1.2 [illegible] — b) Ś1 K1 [illegible] — c) [illegible] (except G1.2) [illegible] — [illegible]

14 a) [illegible] — After 14ab, T G (except G1) ins.

1461* [illegible] ।

— a) T1 G (except G1.2) °रसोपेता — d) K0 D1 [illegible] ; Ñ1.2 V1 Da1 Dn1 D1 [illegible] ; T1 G (except G1.2) [illegible] G (except G1.2) [illegible] — D1 om. 14cd — c) Ñ1 [illegible] — d) D1 [illegible] ; S (except T1) [illegible] (for मुञ्ज) Ñ1 [illegible] ; Ñ1 [illegible] — After 14, T G (except G1) ins.

1462* [illegible] ।
[illegible] ।

15 a) Ñ1 G1 सुकृतैः ; T1 G1.2 M °कृतै(M1 °ते)ः ; G1 °हृदैः ; G1 [illegible] ; G1 [illegible] ; Cd as in text. Ñ1 [illegible] ; V1 [illegible] ; Ñ1 S (except T1) [illegible] ; D1 [illegible] ; D1 [illegible] — b) Ñ1 [illegible] ; S (except T1) विनीतैश्च (G1-3 °वेश्म) निर्मित — c) K0 [illegible] पापो ; D1 S (except T1) विश्वस्तानि(G1-3 M1 °मी)ह स पापो — After 15, N T1 ins.

1463* [illegible] ।

[=21cd. [illegible]]
Thereafter T1 reads 20c–21b, repeating these lines in their proper place

16 a) [illegible] (for इमां) [illegible] — b) Ñ1 Pt Dn1 [illegible] ; V1 D1 T1 G1.2 M [illegible] ; G1 [illegible] ; G1 विदुरो धर्मवित्तम — c) Ś1 K1 [illegible] ; K0.1.2 [illegible], D1 G1 M [illegible] ; D1 [illegible] ; T1 [illegible] — d) D1 [illegible] (for पुरा) [illegible] (T1

आचार्यैः सुकृतं गूढैर्दुर्योधनवशानुगैः ॥ १७

भीम उवाच ।

यदिदं गृहमाग्नेयं विहितं मन्यते भवान् ।
तत्रैव साधु गच्छामो यत्र पूर्वोषिता वयम् ॥ १८

युधिष्ठिर उवाच ।

इह यत्तैर्निराकारैर्वस्तव्यमिति रोचये ।
नष्टैरिव विचिन्वद्भिर्गतिमिष्टां ध्रुवामितः ॥ १९

यदि विन्देत चाकारमस्माकं हि पुरोचनः ।
शीघ्रकारी ततो भूत्वा प्रसह्यापि दहेत नः ॥ २०

नायं बिभेत्युपक्रोशादधर्माद्वा पुरोचनः ।
तथा हि वर्तते मन्दः सुयोधनमते स्थितः ॥ २१

अपि चेह प्रदग्धेषु भीष्मोऽस्मासु पितामहः ।
कोपं कुर्यात्किमर्थं वा कौरवान्कोपयेत सः ।
धर्म इत्येव कुप्येत तथान्ये कुरुपुंगवाः ॥ २२

C 1 5791
B 1 146 25
K. 1 159. 42

°वाम्पुरा) (G1 तदाह प्रतिबोधित°) — After 16, K8 ins

1464* आग्नेय रुचिर वेश्म कारितं दृश्यते शुभम् ।,

while G1 ins

1465* अस्माक भागधेयेन विदुरेण महात्मना ।

17 After 17^{a}, Ñ2 V1 B D (except D5) T1 ins

1466* नित्यमस्मद्धितैषिणा ।
पित्रा कनीयसा स्नेहात्

— ^{b}) Ś1 K1 Ñ1.2 V1 B D G3.6 बुद्धिमं(D5 G3.6 °व)तो ; M3.5 बुध्यतो न, M6-8 बुध्यामो न — ^{c}) K0 D5 शिल्पिभि°, K3 4 Ñ3 V1 B Da Dn D1 2 4 अनार्यैं (B5 Da °र्यैः) G5 सुहृद (for सुकृ°) K2 शूरै, K3.4 B3 Da मूढै°, G5 गधै — ^{d}) D1 ते न दुर्योधने वशाः — A passage of 32 lines given in App I (No 84) is ins. in G1.2 after 17, in T1 G4 after 18

18 Ś1 K1.2 4 Ñ1.2 V1 D (except D5) भीमसेन° Ś1 K1 S om उ°. — ^{a}) K1 3 Ñ V1 B (except B5) D (except Da1 D1) M6-8 यदीद — ^{b}) B1 (m as in text) G3.5 विदित K1 मन्यते विहित (by transp) — After 18^{ab}, K8 ins

1467* पुरोचनमिम दग्ध्वा गम्यते वारणावतान् ।

— ^{c}) V1 Dn तथैव — After 18, T1 G4 ins. a passage given in App I (No 84), cf. v 1 17

19 S1 K1 S om उवाच (G4 6 om the ref) — ^{a}) K0 4 Ñ1 V1 D1 5 T2 G4 यत्तैर्, Cd as in text. — ^{b}) Ś1 K0 1 4 अभि (for इति). G1 कृतोस्मासु वृकोदर — After 19^{ab}, G1 ins

1468* इति किं स्वयमेतावान्किमत परमापतत् ।
विचारयन्तो जाग्रन्त प्राणिभिर्हितकाङ्क्षिभिः ।
इहैव वस्तव्यमिति मन्मनो रोचतेऽनुज ।

— ^{c}) K4 Ñ2 B Dn D1 2 4 T1 अप्रमत्तैर्, Ñ1 नष्टैरभि°; V1 सुसैरभि°; D5 T2 G4-6 M तुष्टैरिव, G1 इष्टैरिह, G2 3 दुष्टैरिव, Cd as in text. — ^{d}) S गतिमन्या Kr दिवा गति (s10), K8 D1 T2 G2 4 5 M मघीमि व. (G5 *sup lin* न); K4 T1 G3 ध्रुवामिव, B1 D5 ध्रुवामिति, B5 पुरादित, G1 सुखप्रदा; G6 ध्रुवा मति — After 19, G1 ins.

1469* इत पर ते किं कुर्युर्जिज्ञासद्भिरभीतवत् ।

20 ^{a}) D5 विंदति, T1 विद्येत G (except G5) आकार (G3 कारण) यदि जानीयाद् — ^{b}) Ś1 K1 तु, K2 च; K8 Ñ3 V1 B D M6-8 स, T1 नु (for हि) — G6 om 20^{cd} — ^{c}) Ñ2 V1 B D T1 क्षिप्रकारी — ^{d}) K8 दहेत्स न, T2 G (G6 om) दहेत्तु न, M3.5 दहेत स K2 प्रसह्य विदह्येत्तत, M6-8 प्रदह्यादपि हेतुत

21 ^{a}) Ś1 K1 Cd उपाक्रोशाद्, V1 अनु° M नैव बिभ्य(M3 5 नैप बिभ्र)त्यनुक्रो° — ^{b}) Ś1 नाधर्माद्वा, K4 G (except G2 5) अधर्माच्च, M अधर्मात्मा — Ñ1 2 V1 om 21^{cd} — ^{c}) Ś1 M5 तथापि, D5 T2 G5 स तथा, G1-4.6 तथा च B3 5 मूढ (for मन्द) — ^{d}) Ś1 K (except K4) Ñ3 B3 D (except Da) T1 सुयोधनवशे, T2 G M दुर्योधनमते (M5 °वशे)

22 ^{a}) Ś1 K Ñ1 V1 अपि चापीह (K3 चात्र वि); Ñ3 अग्निना इ प्र; B5 6 D2.4 5 अथवापीह, Dn T1 अपि चाय प्र, G (except G5) अपि चास्मासु — ^{b}) K3 [ऽ]स्माक, G (except G5) कुरु (for ऽस्मासु) — K2 om 22^{cd} — ^{c}) Ñ1 कोप कृत्वा, T1 G (except G5) न कुप्येत. — ^{d}) Ñ V1 B D (except D5) कोपयीत स ; T2 G5 कोपयेतस ; G1-4.6 M कोपये(G3 °य)त्स स (G2 °त्तर) — After 22^{cd}, K3 4 Ñ V1 Dn D1 5 S ins

1470* अथवापीह दग्धेषु भीष्मोऽस्माक पितामह ।

[Cf 22^{ab} V1 अथवा नेह K3 4 Dn3 [ऽ]स्मासु S तथा (T1 मात्रा) हि (T2 G2 4 5 पि; G1 -म्र) सह दग्धेषु विदुर सपि°]

— ^{e}) V1 B D (except D5) कुप्येरन् K0 4 D2 4 T1 अ(T1 न)धर्म इति कु°, T2 G1.3-6 धर्मो नेहे(G3 न ही)ति कु°, G2 द्रोण कृपश्च वाह्लीका ; M धर्मो नेत्येव कु° — ^{f}) Ñ2 V1 B D (except D5) T1 ये चान्ये — After 22, G (except G4) ins.

वयं तु यदि दाहस्य बिभ्यतः प्रद्रवेम हि ।
स्पशैर्नो घातयेत्सर्वान्राज्यलुब्धः सुयोधनः ॥ २३

अपदस्थान्पदे तिष्ठन्नपक्षान्पक्षसंस्थितः ।
हीनकोशान्महाकोशः प्रयोगैर्घातयेद्ध्रुवम् ॥ २४

तदस्माभिरिमं पापं तं च पापं सुयोधनम् ।
वञ्चयद्भिर्निवस्तव्यं छन्नवासं क्वचित्क्वचित् ॥ २५

ते वयं मृगयाशीलाश्चराम वसुधामिमाम् ।
तथा नो विदिता मार्गा भविष्यन्ति पलायताम् ॥ २६

भौमं च बिलमद्यैव करवाम सुसंवृतम् ।
गूढोच्छ्वसान्न नस्तत्र हुताशः संप्रधक्ष्यति ॥ २७

वसतोऽत्र यथा चास्मान्न बुध्येत पुरोचनः ।
पौरो वापि जनः कश्चित्तथा कार्यमतन्द्रितैः ॥ २८

इति श्रीमहाभारते आदिपर्वणि चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥

1471* [illegible] ।
[illegible] ।
[(L. 1) G₃ [illegible]; G₁ [illegible] G₁ °[illegible].. — (L. 2) C₂ [illegible].. Posterior half = 22]

23 ᵃ) T₁ G [illegible] (G₃ [illegible]) — ᵇ) K₄ G₃ ₄ M₁₋₃ [illegible] K (except K₁) D₂ ₃ ₅ S (except T₁ M₃ ₅) [illegible]° — ᶜ) Ś₁ K₁ [illegible]; K₃ [illegible]; K₄ [illegible], [illegible]; D₁ [illegible]; D₅ [illegible]; G₃ ₄ [illegible]; Cd as in text. Ñ₃ ₃ D₂ D₃ [illegible] (for नो घात°) Ś₁ K (except K₄) D₅ [illegible] (for सर्वान्) [illegible] — ᵈ) G₁ [illegible]

24 ᵃ) [illegible]; K₃ Ñ₂ ₃ T₁ G₃₋₄ M °[illegible] — ᵇ) A few MSS. [illegible] (for [illegible]) — ᶜ) Ś₁ [illegible]; [illegible]; [illegible]; [illegible], [illegible]; D₃ [illegible]; G₁ [illegible]; M [illegible] (for [illegible]) G₁ [illegible]

25 ᵃ) [illegible] — ᵇ) K₃ [illegible]; T₁ G₃₋₄ [illegible] (except [illegible]) [illegible] — ᶜ) K₁ [illegible], [illegible] D (except D₂) T₁ [illegible]°; T₂ G₃ ₄ [illegible] ([illegible])

26 ᵃ) G₃ ₄ [illegible] (G₄ °[illegible]) [illegible] — ᵇ) K₀ ₃ ₄ [illegible]; Ñ₂ [illegible]; T₁ G₄ [illegible] T₂ G₃ ₅ [illegible] — ᶜ) [illegible]; G₁ [illegible]; G₄ [illegible] — ᵈ) K₄ [illegible]

27 ᵃ) G₁ [illegible] — ᵇ) K₄ T G (except G₁) [illegible], [illegible] — ᶜ) [illegible]; G₂ ₃ [illegible]; T₁ M [illegible]; G₃ ₅ [illegible]; [illegible] (v. l.) Cd as in text. G₁ M [illegible] [illegible]; T₂ G₃ [illegible] — ᵈ) [illegible] ([illegible])

28 ᵃ) D₁ [illegible]; G (except G₁) [illegible] Ś₁ K (except K₄ [illegible]) — ᵇ) D₂ [illegible] — ᵈ) Ñ₂ ₃ V₁ [ऽ]रि या (by transp.), M₃ [illegible] K₀ पौराश्चापि तथा कार्यं पक्षाय पशुसपृते..

Colophon: *Major parvan*: T₁ G M सभा° (for आदि°). — *Sub-parvan*: Ñ V₁ B₂ ₃ D₂ D₃ ₃ as D₃ जतुगृह; B₂ ₃ जातुष; T₁ सभा. — *Adhy. name*: Ś₁ K₂ ₃ ₄ D₂ M₃ जतुगृहदाह; K₀ युधिष्ठिरवाक्य; Ñ₂ ₃ V₁ भीमसेनयुधिष्ठिरसंवाद; M₃ युधिष्ठिरभीमसेनसंवाद. — *Adhy. no.* (figures, words or both): B₁ 143, D₃₃ 145, D₃ₘ 148, T₁ 141, T₂ G₃ ₄ 92, G₁ ₂ 93, G₃ ₄ M 91. — *Śloka no.*: D₃ M₃ 30. — *Aggregate śloka no.*: D₃₃ 5802.

135

1 Ś₁ K₁₋₃ D₂ ₃ S om. उवाच. — ᵃ) M₃ सुहृदस्य (for विदुर°). K₀ ₃ [illegible]. K₃ (hapl.) om. 1ᵇ-2ᵃ. — ᵇ) D₁ [illegible]; T₂ G₃ ₄ [illegible] (by transp.). Ś₁ K₀ ₄ [illegible]; K₃ [illegible]; Ñ₃ B D T₁ G₃ [illegible].. V₁ [illegible] (for [illegible]) — ᶜ) K₀ [illegible] (for विधि°).

2 K₃ om. 2ᵃ (cf. v. l. 1). Before 2, M (except M₃) ins. [illegible]. — ᵃ) K₃ M (except M₃) [illegible]. K₃ [illegible] (for [illegible]) — ᵇ) Ñ₂ D₃ °[illegible] — ᶜ) G₁ [illegible], G₃ [illegible] (for [illegible]).

3 Ś₁ K₂ ₄ M₂ (hapl.) om. 3. — ᵃ) D₁ T₁ G₂ ₃ M₁₋₃ [illegible] — ᵇ) K₀ Ñ₂ ₃ V₁ B₂ ₃ D₃ D₂ ₃ M₃₋₅ [illegible]; K₃ [illegible], B₁ [illegible]. G₁ [illegible]; M₂ ₃ [illegible] T₂ G₃₋₄ [illegible] (T₂ G₃ ₄ °[illegible]; G₁ [illegible]) [illegible] (cf. 6ᵃᵇ). — For 3ᵃᵇ, K₃ subst. [illegible] — For ᶜᵈ, T₁ G₁ ₂ read 6ᶜᵈ.

4 G₃ ₄ om. 4ᵃ-5ᵇ. — ᵃ) T G₁ [illegible] Ś₁ K₁ [illegible] — ᵇ) [illegible] T₂ G₁ ₂ ₃ [illegible] K₃ [illegible]; K₄ Ñ₂ B₁ D₃ [illegible]; D₁ [illegible]; T₁ G₁ ₂ ₃ [illegible] (for [illegible]) G₁ [illegible] — ᶜ) K₀ ₄ M [illegible]; G (G₂ ₃ om.)

१३५

वैशंपायन उवाच ।
विदुरस्य सुहृत्कश्चित्खनकः कुशलः क्वचित् ।
विविक्ते पाण्डवान्राजन्निदं वचनमब्रवीत् ॥ १
प्रहितो विदुरेणास्मि खनकः कुशलो भृशम् ।
पाण्डवानां प्रियं कार्यमिति किं करवाणि वः ॥ २
प्रच्छन्नं विदुरेणोक्तः श्रेयस्त्वमिह पाण्डवान् ।
प्रतिपादय विश्वासादिति किं करवाणि वः ॥ ३
कृष्णपक्षे चतुर्दश्यां रात्रावस्य पुरोचनः ।
भवनस्य तव द्वारि प्रदास्यति हुताशनम् ॥ ४
मात्रा सह प्रदग्धव्याः पाण्डवाः पुरुषर्षभाः ।
इति व्यवसितं पार्थ धार्तराष्ट्रस्य मे श्रुतम् ॥ ५
किंचिच्च विदुरेणोक्तो म्लेच्छवाचासि पाण्डव ।
त्वया च तत्तथेत्युक्तमेतद्विश्वासकारणम् ॥ ६
उवाच तं सत्यधृतिः कुन्तीपुत्रो युधिष्ठिरः ।
अभिजानामि सौम्य त्वां सुहृदं विदुरस्य वै ॥ ७
शुचिमाप्तं प्रियं चैव सदा च दृढभक्तिकम् ।
न विद्यते कवेः किंचिदभिज्ञानप्रयोजनम् ॥ ८
यथा नः स तथा नस्त्वं निर्विशेषा वयं त्वयि ।
भवतः स्म यथा तस्य पालयास्मान्यथा कविः ॥ ९
इदं शरणमाग्नेयं मदर्थमिति मे मतिः ।
पुरोचनेन विहितं धार्तराष्ट्रस्य शासनात् ॥ १०
स पापः कोशवांश्चैव ससहायश्च दुर्मतिः ।
अस्मानपि च दुष्टात्मा नित्यकालं प्रबाधते ॥ ११
स भवान्मोक्षयत्वस्मान्यत्नेनास्माद्धुताशनात् ।
अस्मास्विह हि दग्धेषु सकामः स्यात्सुयोधनः ॥ १२
समृद्धमायुधागारमिदं तस्य दुरात्मनः ।

C 1 5810
B. 1 147 13
K 1. 159 12

निशि (for तव)

5 $G_{3,6}$ om 5 (cf. v l 4) — ^{b}) K_3 भरतर्षभा, $D_{4\ 5}$ °र्षभ — ^{c}) $Ñ_2$ B D T_1 तस्य (for पार्थ) — ^{d}) K_3 $Ñ_2$ B D दुर्मते (for मे श्रुतम्)

6 T_2 G_{3-6} om 6^{ab} (cf. v l 4), G_2 om 6 — ^{a}) K_3 तेनासि, $Ñ_{1\ 3}$ कच्चिच्च; M किंचिरव (M_3 प्रच्छन्न) D_5 ऽप्युक्तं — ^{b}) $Ñ_1$ V_1 B_6 °भाषासि; D_5 प्रच्छन्न चासि, Cd as in text K_3 छन्न किंचिद्वच पथि, G_1 पांडवो म्लेच्छभाषया — T_2 $G_{4\ 5}$ (om it here) read 6^{cd} for 3^{cd}, cf. v l 4. — ^{c}) $K_{0\ 2}$ $Ñ_1$ तथा वित्त (for तथे°) D_5 तथेति च त्वया ज्ञात — ^{d}) Da_1 इति (for एतद्) K_3 विश्वासकारक, $Ñ_1$ T_2 G_6 M आश्वासकारक ($Ñ_1$ °ण)

7 Before 7, T_2 G ins वैश° — ^{a}) D_5 तथावृत्त (for सत्य°). — After 7^{ab}, $M_{7\ 8}$ ins. युधिष्ठिर.. — ^{c}) G_3 अनुजानामि — ^{d}) K_2 हि; M च (for वै).

8 ^{a}) G_1 स्निग्धमाप्त, $G_{3\ 6}$ प्रथमाप्त T_2 G भक्तं (for चैव). — ^{b}) $Ś_1$ प्रियभक्तिक, K_0 T_1 M °भक्तिन, $Ñ_1$ °रक्षिण T_2 G सदा (G_3 तथा) प्रियहितैषिण ($G_{1,2}$ °तैपिण; G_3 °ते रत) — ^{c}) $Ś_1$ कवि कश्चिद्, K_3 कथ भीति, G_3 [ऽ]त्र व· किंचिद् Cd cites कवे (as in text) — ^{d}) $K_{0\ 2}$ $Ñ_2$ B_3 Dn D_1 T_1 $G_{5\ 6}$ अविज्ञात (G_6 °न) प्रयो°; K_3 किमिह स्याद्यथोचित, D_5 T_2 G_{1-4} $M_{3,5}$ अभिज्ञान (D_3 G_4 °त) प्रयो°.

9 ^{a}) $K_{0\ 4}$ स न (by transp), Ñ V_1 B D T_1 तस्य $K_{0\ 4}$ त्व च, K_2 च त्व; T_2 G असि त्व (G_1 आह त्वा, G_3 अपि त्व) (for नस्त्व) — ^{b}) K_3 निर्विशका K_4 G_2 त्वया; T_2 G_6 त्विति — ^{c}) $Ś_1$ K_1 G_3 स्म°, K_0 $G_{2\ 4}$ तु, $Ñ_1$ अस्माद्, $Ñ_2$ V_1 B D (except D_5) T_1 च (for स्म) T_2 $G_{2\ 4.5}$ य(G_6 त)थातस्व — ^{d}) $Ñ_1$ पारयास्मान्

10 ^{b}) D_5 G_5 श्रुत, T_2 श्रुति (for मति.) — ^{d}) G (except $G_{3\ 5}$) धृतराष्ट्रस्य

11 ^{a}) Ñ V_1 B Da कोपवान्, D_4 $G_{2\ 3\ 6}$ M कोपवान् Da चापि (for चैव) — ^{b}) K_0 सहामात्य, $Ñ_1$ सुसहाय T_1 तु; M_8 सु (for च) — ^{c}) $Ñ_3$ एव (for अपि) $Ñ_2$ B D (except D_5) T_1 पापात्मा K_3 वय च कोशरहिता — ^{d}) K_3 तेनास्मान्स; B_3 नित्यमेव (m as in text), D_5 नित्य चैव

12 ^{a}) K_3 G_1 मोचयन्नस्माद्, T_2 G_{4-6} मोचयस्वस्माद्; G_2 मोचयित्वास्माद्, G_3 मोचयेदस्माद् — ^{b}) K_3 जतुवेश्म हुता°, S (except T_1) ऽस्पष्टा($M_{3\ 5}$ ऽल्यणा)द्वै हुता° — ^{c}) $K_{0\ 4}$ अस्मास्वपि K_2 T_1 वि°; K_3 नि, T_2 G (except $G_{3\ 5}$) च; M_5 अरि°; M_{6-8} अभि- (for हि) — ^{d}) K_3 कृतार्थ स्यात्

13 ^{b}) K_0 $M_{3\ 5}$ महात्मन — ^{c}) Ñ B_3 Dn G (except $G_{3\ 5}$) M_5 वप्रात, D_5 दुष्प्राप्त, Cd as in text. — ^{a}) K_3 $Ñ_{2\ 3}$ V_1 B D $G_{3,6}$ M आश्रित्य (for °श्लिष्य).

यस्मात्ते निश्चयस्तस्मात्क्षिप्रमिदं कृतं महत् ॥ १३

इदं तदशुभं नूनं तस्य कर्म चिकीर्षितम् ।
प्रागेव विदुरो वेद तेनास्मानन्वबोधयत् ॥ १४

सेयमापदनुप्राप्ता क्षत्ता यां दृष्टवान्पुरा ।
पुरोचनस्याविदितानस्मांस्त्वं विप्रमोचय ॥ १५

स तथेति प्रतिश्रुत्य खनको यत्नमास्थितः ।
परिखामुत्किरन्नाम चकार सुमहद्बिलम् ॥ १६

चक्रे च वेश्मनस्तस्य मध्ये नातिमहन्मुखम् ।
कपाटयुक्तमज्ञातं समं भूम्या च भारत ॥ १७

पुरोचनभयाच्चैव व्यदधात्संवृतं मुखम् ।
स तत्र च गृहद्वारि वसत्यशुभधीः सदा ॥ १८

तत्र ते सायुधाः सर्वे वसन्ति स्म क्षपां नृप ।
दिवा चरन्ति मृगयां पाण्डवेया वनाद्वनम् ॥ १९

विश्वस्तवदविश्वस्ता वञ्चयन्तः पुरोचनम् ।
अतुष्टास्तुष्टवद्राजन्नूषुः परमदुःखिताः ॥ २०

न चैनानन्वबुध्यन्त नरा नगरवासिनः ।
अन्यत्र विदुरामात्यात्तस्मात्खनकसत्तमात् ॥ २१

इति श्रीमहाभारते आदिपर्वणि पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

१३६

वैशंपायन उवाच ।
तांस्तु दृष्ट्वा सुमनसः परिसंवत्सरोपितान् ।
विश्वस्तानिव संलक्ष्य हर्षं चक्रे पुरोचनः ॥ १
पुरोचने तथा हृष्टे कौन्तेयोऽथ युधिष्ठिरः ।
भीमसेनार्जुनौ चैव यमौ चोवाच धर्मवित् ॥ २
अस्मानयं सुविश्वस्तान्वेत्ति पापः पुरोचनः ।
वञ्चितोऽयं नृशंसात्मा कालं मन्ये पलायने ॥ ३
आयुधागारमादीप्य दग्ध्वा चैव पुरोचनम् ।
षट् प्राणिनो निधायेह द्रवामोऽनभिलक्षिताः ॥ ४
अथ दानापदेशेन कुन्ती ब्राह्मणभोजनम् ।
चक्रे निशि महद्राजन्नाजग्मुस्तत्र योषितः ॥ ५
ता विहृत्य यथाकामं भुक्त्वा पीत्वा च भारत ।
जग्मुर्निशि गृहानेव समनुज्ञाप्य माधवीम् ॥ ६
निषादी पञ्चपुत्रा तु तस्मिन्भोज्ये यदृच्छया ।
अन्नार्थिनी समभ्यागात्सपुत्रा कालचोदिता ॥ ७
सा पीत्वा मदिरां मत्ता सपुत्रा मदविह्वला ।
सह सर्वैः सुतै राजंस्तस्मिन्नेव निवेशने ।
सुष्वाप विगतज्ञाना मृतकल्पा नराधिप ॥ ८
अथ प्रवाते तुमुले निशि सुप्ते जने विभो ।
तदुपादीपयद्भीमः शेते यत्र पुरोचनः ॥ ९

C 1 5828
B 1 148. 10
K. 1 160. 14

चिन्तयामास मतिमान्धर्मपुत्रो युधिष्ठिर ।

2 T2 G5 (hapl) om 2ᵃ-3ᵇ — ᵃ) Ñ2 तुष्टे (for हृष्टे) G1 °चनेथ सहृष्टे — ᵇ) D5 [ऽ]पि (for ऽथ) — ᶜ) B6 D (except D4 5) T1 M5 चोभौ, G3.6 तौ च (for चैव) — ᵈ) Ś1 चैव च; K1 वैवाच (sic), Ñ3 V1 B1 6 D (except D4 5) T1 प्रोवाच, M चैवाह (M2 °थ) (for चोवा°)

3 T2 G5 om 3ᵃᵇ (of v 1.2) — ᵃ) K2 सुविश्रब्धान् — Before 3ᶜᵈ, G5 ins युधिष्ठिर° — ᶜ) T2 G वंचकोय D5 भृश सोस्मान् — ᵈ) G1 काल मेने च लघने

4 ᵃ) V1 सायुधागारम्, T G (except G3) जातुषागारम् K3 आश्रित्य, Ñ1 अप्येद् — ᵇ) G1 M (except M5) चैन (for चैव) — ᶜ) Ś1 K3 D5 G1 2 M3 5 विधाये(G1 2 °ये)ह; K0 2 4 Ñ1 3 वधायेह, B5 निधायात्र — ᵈ) Ñ1 प्रयामो; G4 5 द्रवाम Dn3 T2 G [ऽ]नुप(G3 नूप)लक्षिता, M नोपल° D5 भजामो नाभिलक्षिता

5 Before 5, T2 G (except G6) ins वैश° — ᵃ) Dn3 धर्मराजनिदेशेन — ᶜ) M चक्रे च सु (M5 तत्र) Ś1 Ñ3 महाराजन्, K3 तदा राजन्, Ñ2 V1 B D (except D5) T1 G5 M5 महाराज (B1 3 महाबाहो) — ᵈ) Ś1 K तेन यो°.

6 ᵃ) D5 यथाकाल — ᵇ) D5 भुक्त्वा भोज्य यदृच्छया, T1 श्रुत्वा भारतसत्तम, G1 भुक्त्वा पीत्वा तथैव च — ᶜ) Ñ1 गृहानेत्य, T2 G °ण्येव — ᵈ) K0 Arj (comm) यादवीं, D3 (erroneously) Arjp Cd as in text Dn3 समस्ता स्ताश्च योषित. — After 6, S ins (T1 in reverse order)

1474* पुरोचनप्रणिहिता पृथा स्म किल सेवते ।
निषादी दुष्टहृदया नित्यमन्तरचारिणी ।

[(L. 1) T1 परिसे°, G6 खलु से° G3 पृथां समुपसेवते]

7 After 7ᵃᵇ, S (except G3) ins

1475* पुराभ्यासकृतस्नेहा सखी कुन्त्याः समा सुतैः ।
आनीय मधुमूलानि फलानि विविधानि च ।

[(L 1) T1 समाहिता, T2 G2 4-6 सम सुतै G1 कुंत्याश्च सह सा सुतै]

— ᵈ) K0 2 4 D5 °नोदिता. — After 7, T G ins

1476* पापा च पञ्चपुत्रा सा पृथाया सखिमानिनी ।

[T2 G5 सख्यमानिनी G1 °पुत्रा च सा पृथायाः सखी मता]

8 ᵃ) D5 S तत्र — ᶜ) G3.6 सा हि सर्वै — ᶠ) Ñ2 B (except B6) D1 मृतकल्पेव चा(Ñ2 सा)भवत्

9 ᵃ) Ś1 वाते तु, K4 Ñ1.2 B1.3 प्रयाते; B6 T1 G2 °भाते; D2 °जाते (of v 1 10), Cd as in text K2 3 सुमले, K4 Ñ1 2 B (except B6) दिवसे; Cd as in text — ᵇ) K0 2 4 B5 D2 S सुप्त Ñ2 V1 B D (except D2) तदा, T1 तथा (for विभो) — ᶜ) T2 G2 4.5 अदीपयद्भीमसेन ; M तनूनपाद्भयाद्भीम — ᵈ) K0 यत्र शेते (by transp) — After 9, K4 Ñ V1 B D T1 ins

1477* ततो जतुगृहद्वार दीपयामास पाण्डव ।
समन्ततो ददौ पश्चादग्निं तत्र निवेशने ।
ज्ञात्वा तु तद्गृह सर्वमादीप्तं पाण्डुनन्दनाः ।
सुरङ्गां (!) विविशुस्तूर्णं मात्रा सार्धमरिंदमाः ।

[(L 3) Dn3 दीप्त सर्वत (for सर्वमादीप्त) — (L 4) Ñ1.3 V1 Dn सुरुंगा — For T1 see below]

— On the other hand, S (G1 om line 1, for T1 see

ततः प्रतापः सुमहाञ्शब्दश्चैव विभावसोः ।
प्रादुरासीत्तदा तेन बुबुधे स जनव्रजः ॥ १०

पौरा ऊचुः ।

दुर्योधनप्रयुक्तेन पापेनाकृतबुद्धिना ।
गृहमात्मविनाशाय कारितं दाहितं च यत् ॥ ११
अहो धिग्धृतराष्ट्रस्य बुद्धिर्नातिसमञ्जसी ।
यः शुचीन्पाण्डवान्बालान्दाहयामास मन्त्रिणा ॥१२
दिष्ट्या त्विदानीं पापात्मा दग्धोऽयमतिदुर्मतिः ।
अनागसः सुविश्वस्तान्यो ददाह नरोत्तमान् ॥ १३

वैशंपायन उवाच ।

एवं ते विलपन्ति स्म वारणावतका जनाः ।
परिवार्य गृहं तच्च तस्थू रात्रौ समन्ततः ॥ १४
पाण्डवाश्चापि ते राजन्मात्रा सह सुदुःखिताः ।
बिलेन तेन निर्गत्य जग्मुर्गूढमलक्षिताः ॥ १५
तेन निद्रोपरोधेन साध्वसेन च पाण्डवाः ।
न शेकुः सहसा गन्तुं सह मात्रा परंतपाः ॥ १६
भीमसेनस्तु राजेन्द्र भीमवेगपराक्रमः ।
जगाम भ्रातृनादाय सर्वान्मातरमेव च ॥ १७
स्कन्धमारोप्य जननीं यमावङ्केन वीर्यवान् ।
पार्थौ गृहीत्वा पाणिभ्यां भ्रातरौ सुमहाबलौ ॥१८
तरसा पादपान्भञ्जन्महीं पद्भ्यां विदारयन् ।
स जगामाशु तेजस्वी वातरंहा वृकोदरः ॥ १९

इति श्रीमहाभारते आदिपर्वणि षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥

१३७

वैशंपायन उवाच ।
अथ रात्र्यां व्यतीतायामशेषो नागरो जनः ।
तत्राजगाम त्वरितो दिदृक्षुः पाण्डुनन्दनान् ॥ १
निर्वापयन्तो ज्वलनं ते जना ददृशुस्ततः ।
जातुषं तद्गृहं दग्धममात्यं च पुरोचनम् ॥ २
नूनं दुर्योधनेनेदं विहितं पापकर्मणा ।
पाण्डवानां विनाशाय इत्येवं चुक्रुशुर्जनाः ॥ ३
विदिते धृतराष्ट्रस्य धार्तराष्ट्रो न संशयः ।
दग्धवान्पाण्डुदायादान्न ह्येनं प्रतिषिद्धवान् ॥ ४
नूनं शांतनवो भीष्मो न धर्ममनुवर्तते ।
द्रोणश्च विदुरश्चैव कृपश्चान्ये च कौरवाः ॥ ५
ते वयं धृतराष्ट्रस्य प्रेषयामो दुरात्मनः ।
संवृत्तस्ते परः कामः पाण्डवान्दग्धवानसि ॥ ६
ततो व्यपोहमानास्ते पाण्डवार्थे हुताशनम् ।

C. 1 5662
B. 1 150. 7
K. 1 102. 9

---

latter om lines 1–3) ins after 18 G1, after 19[ab]

1483* बिलेन योजन दूर गत्वा सिद्धपदे शुभे ।
निश्चेरुर्वटमूले ते निद्रामुद्रितलोचना ।
बिलान्निर्गत्य सहसा भ्रातृन्मातरमेव च ।
गङ्गातीरवन प्राप्य वहन्प्रायात्स मारुति. ।,

G1 thereafter *repeating* 19[ab] — [c]) Ñ1 अथ; Da G2 सु॰ (for आशु) K2.4 जगामाशु (K4 ॰थ) स ते॰ — [d]) Ś1 K4 Dn2 n8 G1 ॰रहो — After 19, G1 ins

1484* अव्यक्तवनमार्गं सन्भञ्जन्गुल्मलतागुरून् ।

Colophon *Major parvan* T2 G M संभव॰ (for आदि॰) — *Sub-parvan* Ś1 K Ñ8 Da2 D1 5 M8.5 जतुगृह(D1 om गृह)दाह (K8 ॰हदीपन), Ñ1 2 V1 Da1 Dn1 n2 T1 जतुगृह, B D2 4 जातुप — *Adhy name* Ko 4 भीमसेनविक्रम — *Adhy no* (figures, words or both) B1 145, Dn8 147, D4m 150, T1 143, T2 G5 6 94, G1 2 95, G3 4 M 93 — *S'loka no* Dn M8 22 — *Aggregate s'loka no* Dn2 5843

☞ After adhy 136, K4 Ñ V1 B D M ins an additional adhy given in App I (No 85), T G ins this passage (*without* the colophon) after 1 137 17 (*repeating* at the end 17[cd]), but Cd (like Ś1 Ko–8) ignores the adhy *completely*

[The details of the colophon (om in D5) of this *additional* adhy are as follows *Major parvan* M सभव॰ (for आदि॰) — *Sub-parvan* Ñ1 2 V1 Dn D1 2 जतुगृह, Ñ8 Da M5–8 जतुगृहदाह; B D4 जातुप — *Adhy name* Ñ1 2 V1 गगोत्तरण — *Adhy no* (figures, words or both) B1 146, Dn8 148, D4m 151, M 94 — *S'loka no* Dn1 n2 M8 14. — *Aggregate s'loka no* Dn2 5857]

137

1 Ś1 K1 8 D2 S (except G3) om उवाच (G4 om the ref) — [a]) B5 रात्र्यामती॰ — [b]) Ko 4 स सर्वो; K2 सशेषो, Ñ8 सर्वशो, S (except T1 G8) सशोको (for अशेषो)

2 [a]) M6–8 निर्वाण॰ — [b]) K4 G1 तदा (for जना) K1 Ñ8 S तदा (G1 जना, T1 as in text)

3 Before 3, B6 ins पौरा ऊचु — [a]) G5 एव (for इद) — [b]) K8 कारित (for विहि॰) — [cd]) G4 विनाशार्थे, M7 विवासाय Ś1 K2 4 Ñ V1 B (B5 marg) D (except D5) T1 M ॰शायेत्येव ते (Ś1 च, K4 तद्) (for ॰शाय इत्येव)

4 [a]) D2 विदितो, S (except T1) ॰त — [b]) M6–8 धार्तराष्ट्रैर् — [c]) M6–8 पाडवान् (for दग्धवान्) K2 पाड्डतनयान्, T2 G पाडवान्बालान् Ś1 दग्धान्पाडवदायादान् — [d]) B6 Da T1 एव, D5 एते; T2 G एतत् (for एन)

5 [a]) Ñ1.3 M8 5 ॰नवो धीमान्, Ñ2 V1 B D (except D5) T1 ॰नवोपीह — [b]) Ś1 K [ऽ]प्यधर्मम् (K8 अधर्मम्) — [cd]) Ś1 द्रोणश्चैव कृपश्चैव Ś1 विदुरोन्ये च कौरवा ; K8 कृपश्चान्येपि बांधवा — After 5, G1 2 ins

1485* नावेक्षन्ते हत धर्मं धर्मज्ञा अप्यहो विधे ।
श्रुतवन्तोऽपि विद्वासो धनवद्वशगा अहो ।
साधूननाथान्धर्मिष्ठान्सत्यव्रतपरायणान् ।
नावेक्षन्ते महान्तोऽपि दैव तेषां परायणम् ।

6 [a]) T2 G धृतराष्ट्राय — [b]) D5 M प्रेषयाम T2 G दुरात्मने — After 6[ab], K8 reads 9[cd] (v 1 अग्निनिर्दग्धान्), repeating it in its proper place — [c]) Ko 2 सभृतस्ते, G6 ॰स ते S1 महान्काम , G5.6 परं कामं. K1 समवृत्तो महाकाम

7 [a]) G1.2 ततो व्यपोह्य॰, G8 तवाप्यपोह॰, Cd as in text — [b]) K4 दह्यमाना हुताशने — [d]) K2.4 D1

निषादीं ददृशुर्दग्धां पञ्चपुत्रामनागसम् ॥ ७
खनकेन तु तेनैव वेश्म शोधयता बिलम् ।
पांसुभिः प्रत्यपिहितं पुरुषैस्तैरलक्षितम् ॥ ८
ततस्ते प्रेषयामासुर्धृतराष्ट्रस्य नागराः ।
पाण्डवानग्निना दग्धानमात्यं च पुरोचनम् ॥ ९
श्रुत्वा तु धृतराष्ट्रस्तद्राजा सुमहदप्रियम् ।
विनाशं पाण्डुपुत्राणां विललाप सुदुःखितः ॥ १०
अद्य पाण्डुर्मृतो राजा भ्राता मम सुदुर्लभः ।
तेषु वीरेषु दग्धेषु मात्रा सह विशेषतः ॥ ११
गच्छन्तु पुरुषाः शीघ्रं नगरं वारणावतम् ।
सत्कारयन्तु तान्वीरान्कुन्तिराजसुतां च ताम् ॥१२
कारयन्तु च कुल्यानि शुभ्राणि च महान्ति च ।
ये च तत्र मृतास्तेषां सुहृदोऽर्चन्तु तानपि ॥ १३
एवंगते मया शक्यं यद्यत्कारयितुं हितम् ।
पाण्डवानां च कुन्त्याश्च तत्सर्वं क्रियतां धनैः ॥१४
एवमुक्त्वा ततश्चक्रे ज्ञातिभिः परिवारितः ।
उदकं पाण्डुपुत्राणां धृतराष्ट्रोऽम्बिकासुतः ॥ १५
शुशुचुः कौरवाः सर्वे भृशं शोकपरायणाः ।

विदुरस्त्वल्पशश्चक्रे शोकं वेद परं हि सः ॥ १६
पाण्डवाश्चापि निर्गत्य नगराद्वारणावतात् ।
जवेन प्रययू राजन्दक्षिणां दिशमाश्रिताः ॥ १७
विज्ञाय निशि पन्थानं नक्षत्रैर्दक्षिणामुखाः ।
यतमाना वनं राजन्गहनं प्रतिपेदिरे ॥ १८
ततः श्रान्ताः पिपासार्ता निद्रान्धाः पाण्डुनन्दनाः ।
पुनरूचुर्महावीर्यं भीमसेनमिदं वचः ॥ १९
इतः कष्टतरं किं नु यद्वयं गहने वने ।
दिशश्च न प्रजानीमो गन्तुं चैव न शक्नुमः ॥ २०
तं च पापं न जानीमो यदि दग्धः पुरोचनः ।
कथं नु विप्रमुच्येम भयादस्मादलक्षिताः ॥ २१
पुनरस्मानुपादाय तथैव व्रज भारत ।
त्वं हि नो बलवानेको यथा सततगस्तथा ॥ २२
इत्युक्तो धर्मराजेन भीमसेनो महाबलः ।
आदाय कुन्तीं भ्रातॄंश्च जगामाशु महाबलः ॥ २३ C 1. 5881 B 1. 150. 26 K. 1. 161. 23

इति श्रीमहाभारते आदिपर्वणि सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥

इत्येव बहु भाषन्तो रुरुदुर्नागरा भृशम् ।]
— ^{cd}) T2 G °स्त्वल्पशोक च (G3 4 °कश्च) चक्रे T2 G2-6 M8 5 वेद हि तत्परं, G1 M6-8 वेद हित पर — After 16, S (except G1 2) ins a passage given in App I (No 86)

17 ^{a}) K3 om च Ś1 K1 निष्क्रम्य, K0 2 4 Ñ1 3 D5 G3 6 M8 °गैम्य — After 17^{ab}, K4 Ñ V1 B D (except D5) ins

1494* नदीं गङ्गामनुप्राप्ता मातृषष्ठा महाबला ।
दाशाना भुजवेगेन नद्याः स्रोतोजवेन च ।
वायुना चानुकूलेन तूर्णं पारमवाप्नुवन् ।

[(L. 1) K4 °मनुप्राप्य मात्रा सह परंतपा (cf. 1 136 16^{d}) — (L 2) B5 पचानां (m दाशानां); Da D1 दासानां K4 भुजवीर्येण]
— ^{cd}) K4 T G repeat 17^{cd} (K4 with v l) T2 G वीरा (for राजन्) G1.2 °मास्थिता K4 (first time) त्यक्त्वा नाव ययु पार्था (for °) Ñ2 3 V1 B D (except D5) ततो नाव परित्यज्य प्रययुर्दक्षिणां दिश — After 17, T G ins a passage given in App I (No 85), followed by a *repetition* of 17^{cd}, of the note at the end of the previous adhy

18 ^{a}) Ś1 K (except K4) Ñ1 D5 M निदाघे, T G (except G1 2) विहाय (for विज्ञा°) T निद्रां (for निशि) — ^{b}) K1 T2 G3 6 °मुखै Ñ2 3 V1 B D T1 नक्षत्रगणसूचित (D5 नार्विदन्दक्षिणामुखा) — K2 om 18^{c}–19^{b} — ^{c}) T2 G5 6 गाहमाना, G3 जानमाना G1 2 वनाद्वन तदा राजन् — ^{d}) G4 गह्वर, M6-8 गतु न (for गह°)

19 K2 om 19^{ab} (of v l 18) — ^{a}) T2 G4 5 तत्र श्राताः, G1 (by transp) श्रातास्तत. — ^{b}) Ñ1.3 निद्रार्ता, T2 G4.5 प्रस्थिता°, G3 निषण्णा ; G6 M नि सृता G1 2 क्षुधिता भयकातरा° — ^{d}) K0 D5 °सेनमरिंदम

20 ^{a}) K0 4 D2 T2 G1-6 अत., Ñ1 D5 इदं (for इत) K2 3 Ñ V1 Da1 Dn D1 G1 2 किं तु, K4 किंचिद्, D5 वीर — ^{c}) B D T1 विजानीमो Ś1 K1 दिशश्चैव न जा°, G3 देशान्वय प्रजा° — ^{d}) G1 2 चैते (for चैव)

21 ^{b}) Ś1 K1 यदि दग्ध प्ररोचन, G1 2 दग्धो (G2 दह्यो) वा न पुरो° — ^{c}) Ś1 न, K1-3 Ñ2 V1 B (except B5) D (except Da2) T1 M7 तु, K4 Ñ1 च (for नु) Ś1 प्रतिमुच्येम, K4 विप्रमुच्येरस — ^{d}) Ñ1.3 वयम् (for भयाद्)

22 ^{a}) T2 G शीघ्रम् (G3 भ्रातान्) (for पुनर्) — ^{b}) G1.2 त्वरावान् (for तथै°) — ^{d}) G3 अस्माभ्रातुमिहार्हसि

23 ^{ab}) K3 °क्तो भीमसेनस्तु धर्मराजेन सद्वल — ^{c}) Ś1 K1 2 4 पृष्ठमारोप्य बलवान् — ^{d}) B3 महाजव , G1 2 स पावनि.· K1 जगाम भरतर्षभ; K3 D5 M5 जगाम सु (M8 5 स)महा°

Colophon *Major parvan* T2 G M संभव° (for आदि°) — *Sub-parvan* Ś1 K0-2 4 Ñ3 Da D3 M5 जतुगृहदाह; Ñ1 2 V1 B6 Dn1 n2 D1 2 T1 जतुगृह (T1 *int lin.* संभव), B1 5 जातुप — *Adhy name* K0 4 वनप्रवेश ; K3 पाडवपलायन, Ñ1 3 V1 पाडववनप्रवेश , M6-8 वनगमन — *Adhy no* (figures, words or both) B1 147, Dn3 149, D4m 152, T1 146, T2 G5 6 M 96, G1 2 97, G3.4 95 — *S'loka no* Dn 26, M8 7 — *Aggregate s'loka no* Dn2 5883

138

1 Ś1 K1 3 D2 5 S om उवाच The sequence of 1-2 in K4 is 1^{cd}, 2^{cd}, 1^{ab}, 2^{ab} — ^{a}) Ś1 K तस्य विक्रमतस्तूर्णम्, Ñ2 V1 B D G3 तेन विक्रममाणेन (D5

१३८

वैशंपायन उवाच ।
तेन विक्रमता तूर्णमूरुवेगसमीरितम् ।
प्रववावनिलो राजञ्शुचिशुक्रागमे यथा ॥ १
स मृद्नन्पुष्पितांश्चैव फलितांश्च वनस्पतीन् ।
आरुजन्दारुगुल्मांश्च पथस्तस्य समीपजान् ॥ २
तथा वृक्षान्भञ्जमानो जगामामितविक्रमः ।
तस्य वेगेन पाण्डूनां मूर्छेव समजायत ॥ ३
असकृच्चापि संतीर्य दूरपारं भुजप्लवैः ।
पथि प्रच्छन्नमासेदुर्धार्तराष्ट्रभयात्तदा ॥ ४
कृच्छ्रेण मातरं त्वेकां सुकुमारीं यशस्विनीम् ।
अवहत्तत्र पृष्ठेन रोधःसु विषमेषु च ॥ ५
आगमंस्ते वनोद्देशमल्पमूलफलोदकम् ।
क्रूरपक्षिमृगं घोरं सायाह्ने भरतर्षभाः ॥ ६
घोरा समभवत्संध्या दारुणा मृगपक्षिणः ।

अप्रकाशा दिशः सर्वा वातैरासन्ननार्तवैः ॥ ७
ते श्रमेण च कौरव्यास्तृष्णया च प्रपीडिताः ।
नाशक्नुवंस्तदा गन्तुं निद्रया च प्रवृद्धया ॥ ८
ततो भीमो वनं घोरं प्रविश्य विजनं महत् ।
न्यग्रोधं विपुलच्छायं रमणीयमुपाद्रवत् ॥ ९
तत्र निक्षिप्य तान्सर्वानुवाच भरतर्षभः ।
पानीयं मृगयामीह विश्रमध्वमिति प्रभो ॥ १०
एते रुवन्ति मधुरं सारसा जलचारिणः ।
ध्रुवमत्र जलस्थायो महानिति मतिर्मम ॥ ११
अनुज्ञातः स गच्छेति भ्रात्रा ज्येष्ठेन भारत ।
जगाम तत्र यत्र स्म रुवन्ति जलचारिणः ॥ १२
स तत्र पीत्वा पानीयं स्नात्वा च भरतर्षभ ।
उत्तरीयेण पानीयमाजहार तदा नृप ॥ १३
गव्यूतिमात्रादागत्य त्वरितो मातरं प्रति । C 1 5901 B 1 151 20 K 1 163. 25

---

of v 1. 8 also]

8 ^{a}) G3 ते क्रमेण G3 M6-8 तु (for च) D5 T2 G3-6 कौंतेयास् Ñ1 तेन श्रमेण कौ°, G1. 2 श्रमेण महता चैव — ^{b}) K0 Dn3 T2 G3 5 6 M3 5 तृषया G1 2 क्षुत्तृष्णाभ्यां च पीडिता — ^{c}) K2 4 तथा, T2 G (except G3) ततो. — ^{d}) G1 2 सु- (for च) K3 चाल्पनल्पया (for च प्र°) — After 8, T2 G ins 1501* — G1. 2 4 cont

1502* अतीव गहन घोर दुर्विज्ञेयपथ क्वचित् ।

— K4 Ñ2 3 V1 B D T1 (om lines 5–6) M ins after 8 T2 G3. 5 6, after 1501* G1 2 4, after 1502*

1503* न्यविशन्त हि ते सर्वे निरास्वादे महावने ।
ततस्तृषापरिक्षामा कुन्ती पुत्रानथाब्रवीत् ।
माता सती पाण्डवाना पञ्चाना मध्यत स्थिता ।
तृष्णया हि परीतास्मि पुत्रान्भृशमथाब्रवीत् ।
तच्छ्रुत्वा भीमसेनस्य मातृस्नेहात्प्रजल्पितम् । [5]
कारुण्येन मनस्तप्त गमनायोपचक्रमे ।

[(L 1) D5 तत , G3 वने; M तदा (for हि ते) T2 G4-6 M तत्र (for सर्वे) K4 प्राविशस्तत्र ते सर्वे, G1 2 तत्र ते प्राविशन्घोरे G3 वने तदा (for महा°) — T2 G ins after line 1 T1, after line 4

1504* रात्र्यामेव गतास्तूर्णं चतुर्विंशतियोजनम् ।

— (L 2) Ñ3 Dn D1 G1 °परिक्लाता, T2 G2-6 M °म्लाना T2 G M कुंती वचनमब्रवीत् — (L 4) Cf line 2 above. Dn1 G3 6 तृषया S (except T1) परितप्ता(G5 °वीता)स्मि (G1. 2 °ह्) K4 पुत्रका भृशमत्र वै, S अ(T1 ह्य; M वि)नाथेव (G3 अकाले च) महावने — After line 4, T1 ins 1504*, while T2 G ins

1505* हृत परमह शक्ता न गन्तु च पदात्पदम् ।
शयिष्ये वृक्षमूलेऽत्र धार्तराष्ट्रा हरन्तु माम् ।
शृणु भीम वचो मह्य तव बाहुबलात्पुर ।
स्थातु न शक्ता कौरव्या किं बिभेषि वृथा सुत ।

— (L 5) D1 °सेनश्च; D5 T2 G °सेनस्तु (G1 2 °न स) D5 मातुर्दु खेन दु खित , T2 G मातृवाक्यप्रकपित., M मातृवाक्यमुदीरित — (L. 6) D5 परीतात्मा, T2 G मनश्चक्रे (for मनस्तप्त) T2 G4-6 गमनायाथ सत्वर, G1 2 गमनाय वृकोदर ; M दु खेन च विशेषत — After line 6, G1 2 4 ins

1506* अन्येऽरयो न मे सन्ति भीमसेनादृते भुवि ।
धार्तराष्ट्राद्वृथा भीरो न मा स्वप्तुमिहेच्छसि ।
भीमपृष्ठस्थिता चेत्थ दूयमानेन चेतसा ।
साश्रुध्वनि रुदन्ती सा निद्रावशमुपागता ।]

9 T1 om 9^{ab} — ^{b}) D5 G3 विपिनं म° — ^{d}) K3 उपाश्रयत्, Ñ1 °वहत्, Ñ2 3 V1 B D ददर्श ह

10 ^{b}) K0 स नरर्षभ , K1 2 B5 6 S (except T G5 M5) °र्षभ — ^{cd}) T2 G °य मृगये यावत्तावद्विश्रम्यतामिह

11 ^{a}) Ñ2 B1 ब्रुवति G5 रुचिर — ^{b}) M6-8 वनचारिण — ^{c}) K2 Cd (before corr) जलच्छायो, K3 जलाधारो; Ñ2 जल स्थायि, Ñ1 V1 B (except B6) D T G जल(G4 °ला)स्थान — ^{d}) Ñ1 2 V1 B (except B6) D (except Da) T1 महच्चेति, T2 G अर्ह(G3 भव)तीति M भविष्यति न संशय

12 ^{a}) K0 2 च, M5 तु (for स) — ^{c}) Dn3 G4 M5 यत्र तत्र स्म (by transp), T1 तत्र यत्तस्मात्, G5 तत्र तत्र स्म D1 स जगाम वनात्तस्मात् — ^{d}) Ñ1 V1 B D T1 M3 सारसा; Ñ2 द्रवति M6-8 वनचारिण

13 ^{a}) G1 2 तत्र पीत्वा च पा° — ^{b}) K0 1 B1 Da1 Dn3 D1 T G3 6 M3 5 °र्षभ , K2 पुरुषर्षभ ; G1 विगतश्रम G2 स्नात्वा भूत्वा गतक्लम — After 13^{ab}, V1 B (except B1) D (except D1) T1 ins

1507* तेषामर्थे च जग्राह भ्रातॄणां भ्रातृवत्सल ।

T1 ins after 1507* M, after 13^{ab} T2 G, after 13^{cd}

1508* पङ्कजानामनेकैश्च पत्रैर्बद्ध्वा जलाशयान् ।

— ^{d}) Ñ3 स जहार K0 3 m S परतप , Ñ1 3 नरोत्तम°; D5 स भारत K2 जहार भरतर्षभ, N2 V1 B D T1 आनयामास भारत

14 ^{a}) K0 Ñ3 G1 गव्यूतिमात्रम्, G2 °मार्गाद् K (except K4) Ñ1 3 T2 G2 4-6 M आगम्य — ^{b}) G2 त्वरया — After 14^{ab}, N (Ś1 K1 hapl om the

स सुप्तां मातरं दृष्ट्वा भ्रातॄंश्च वसुधातले ।
भृशं दुःखपरीतात्मा विललाप वृकोदरः ॥ १४
शयनेषु परार्ध्येषु ये पुरा वारणावते ।
नाधिजग्मुस्तदा निद्रां तेऽद्य सुप्ता महीतले ॥ १५
स्वसारं वसुदेवस्य शत्रुसंघावमर्दिनः ।
कुन्तिभोजसुतां कुन्तीं सर्वलक्षणपूजिताम् ॥ १६
स्नुषां विचित्रवीर्यस्य भार्यां पाण्डोर्महात्मनः ।
प्रासादशयनां नित्यं पुण्डरीकान्तरप्रभाम् ॥ १७
सुकुमारतरां स्त्रीणां महार्हशयनोचिताम् ।
शयानां पश्यताद्येह पृथिव्यामतथोचिताम् ॥ १८
धर्मादिन्द्राच्च वायोश्च सुषुवे या सुतानिमान् ।
सेयं भूमौ परिश्रान्ता शेते ह्यद्यातथोचिता ॥ १९
किं नु दुःखतरं शक्यं मया द्रष्टुमतः परम् ।
योऽहमद्य नरव्याघ्रान्सुप्तान्पश्यामि भूतले ॥ २०
त्रिषु लोकेषु यद्राज्यं धर्मविद्योऽर्हते नृपः ।
सोऽयं भूमौ परिश्रान्तः शेते प्राकृतवत्कथम् ॥ २१
अयं नीलाम्बुदश्यामो नरेष्वप्रतिमो भुवि ।
शेते प्राकृतवद्भूमावतो दुःखतरं नु किम् ॥ २२

अश्विनाविव देवानां याविमौ रूपसंपदा ।
तौ प्राकृतवदद्येमौ प्रसुप्तौ धरणीतले ॥ २३
ज्ञातयो यस्य नैव स्युर्विषमाः कुलपांसनाः ।
स जीवेत्सुसुखं लोके ग्रामे द्रुम इवैकजः ॥ २४
एको वृक्षो हि यो ग्रामे भवेत्पर्णफलान्वितः ।
चैत्यो भवति निर्ज्ञातिरर्चनीयः सुपूजितः ॥ २५
येषां च बहवः शूरा ज्ञातयो धर्मसंश्रिताः ।
ते जीवन्ति सुखं लोके भवन्ति च निरामयाः ॥ २६
बलवन्तः समृद्धार्था मित्रबान्धवनन्दनाः ।
जीवन्त्यन्योन्यमाश्रित्य द्रुमाः काननजा इव ॥ २७
वयं तु धृतराष्ट्रेण सपुत्रेण दुरात्मना ।
विवासिता न दग्धाश्च कथंचित्तस्य शासनात् ॥ २८
तस्मान्मुक्ता वयं दाहादिमं वृक्षमुपाश्रिताः ।
कां दिशं प्रतिपत्स्यामः प्राप्ताः क्लेशमनुत्तमम् ॥ २९
नातिदूरे च नगरं वनादस्माद्धि लक्षये ।
जागर्तव्ये स्वपन्तीमे हन्त जागर्म्यहं स्वयम् ॥ ३०
पास्यन्तीमे जलं पश्चात्प्रतिबुद्धा जितक्लमाः ।
इति भीमो व्यवस्यैव जजागार स्वयं तदा ॥ ३१

C. 1. 5928
B. 1. 151. 45
K. 1. 163. 54

इति श्रीमहाभारते आदिपर्वणि अष्टत्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥ समाप्तं जतुगृहदाहपर्व ॥

---

om 22ᵈ-23ᵉ — ᵈ) Ñ2 V1 B D (except D5) T1 ततो (for अतो) K0 भुवि, G1.2 नु मे — After 22, T G (except G5) ins

1513* इमौ नीलोत्पलश्यामौ नरेष्वप्रतिमौ भुवि ।
(cf 22ᵃᵇ and v l)

23 G5 om. 23ᵃᵇᶜ (cf v l 22) — ᵃ) G3 अपि (for इव) — ᵇ) T2 G3.4 6 M अ(G3 M6 7 आ)श्विनौ; G1 2 अन्वितौ (for याविमौ) — ᶜ) Ñ1 °वदद्यैतौ, K3 प्राकृताविवाद्येमौ, D5 T2 G3.4 6 M तु (G3 च) प्राकृतवत् चेमौ (D5 भीमौ; T2 G3 भूमौ; G4 6 चोमौ, M8 ह्रीमौ) G1 2 माद्रेयौ सुकुमाराङ्गौ — ᵈ) G1 शयाते; G2 शेरते (for प्रसु°) — After 23, T2 (wrongly) reads 20-21, having (hapl.) om them in their proper place.

24 ᵃ) K3 4 जीवेद्धिसु(K4 °मु)ख, Ñ2 V1 B D T1 जीवेत सुख (D3 जीवेत्सुखस-), T2 G M जीवेत्सुखितो — ᵈ) Ś1 Ñ V1 B Dn D1.2 4 T1 G3 8 ग्रामद्रुमः; K1 ग्रामे वृक्ष Ś1 K1 D2 इवैकक°; K3 Ñ3 इवौकस , Cd as in text.

25 ᵃ) Ś1 K1 एकवृक्षेपि, K0 4 Ñ1 2 एकवृक्षो हि, D3 एको हि वृक्षो — ᵇ) K0 Ñ2 D5 G1 2 पुष्प°, Ñ1 पूर्ण°; D4 फल्गु° (for पर्ण°) G3 फलेस्पत्रफला° — D1 om 25ᶜᵈ — ᵈ) B5 वचनीय.; T2 G1 2.4 5 अभ्यनीनै G1 स पूजित , M6-8 तथैव स

26 ᵇ) K0 °समता , K3 °सहिता , K4 °सस्थिता , Ñ2 V1 B D T1 °माश्रिता , T2 G M °वत्सला — ᶜ) T2 G3-6 चिर (for सुख)

27 ᵃ) Ñ3 सुसिद्धार्था. — ᵇ) G1.2 M पितृ° — ᶜ) K0 D5 आसाद्य (for आश्रित्य) — ᵈ) G1.2 वंशा. (for द्रुमा.) K3 वनभवा इव.

28 ᵇ) G1.2 दुष्पुत्रेण — After 28ᵃᵇ, T1 G1.2 4 ins

1514* राज्यलुब्धेन मूर्खेण दुर्मन्त्रिसहितेन च ।
दुष्टेनाधर्मशीलेन स्वार्थनिष्ठैकबुद्धिना ।

— ᶜ) Ñ1 G6 च (for न) M तु (for च) — ᵈ) K3 हि पुरोदिता., Ñ2 V1 B D (except D5) T1 दैवसंश्रयात् (for तस्य शा°) T2 G M क्षत्तुर्बुद्धिपराक्रमात्

29 ᵈ) Ś1 क्लेशं प्राप्ता (by transp) — After 29, K4 Ñ V1 B D T1 ins :

1515* सकामो भव दुर्बुद्धे धार्तराष्ट्राल्पदर्शन ।
नून देवा प्रसन्नास्ते नानुज्ञां मे युधिष्ठिर' ।
प्रयच्छति वधे तुभ्यं तेन जीवसि दुर्मते ।
नन्वद्य ससुतामात्य सकर्णानुजसौबलम् ।
गत्वा क्रोधसमाविष्ट प्रेषयिष्ये यमक्षयम् । [5]
किं नु शक्यं मया कर्तुं यत्ते न क्रुध्यते नृप ।
धर्मात्मा पाण्डवश्रेष्ठ पापाचार युधिष्ठिर ।
एवमुक्त्वा महाबाहु क्रोधसदीप्तमानस ।
कर करेण निष्पिष्य निःश्वसन्दीनमानस. ।
पुनर्दीनमना भूत्वा शान्तार्चिरिव पावक । [10]
भ्रातॄन्महीतले सुप्तानवैक्षत वृकोदर ।
विश्वस्तानिव सविष्टान्पृथग्जनसमानिव ।

[(L. 2) K4 B1.3 5 D5 नाज्ञा मम युधि°. — (L. 4) B (except B3) न त्वाद्य B5 D3 D4 त्वा सहामात्य. — (L 8) K4 D3 क्रोधसदीप्त(K4 °रक्त)लोचन — (L 9) K4 Ñ3 B1 3m 5 D2 संस्पृश्य; Ñ1 2 B3 संपिष्य K4 दीनमातुर , Ñ1 2 D1.4 T1 दीप्तमानस , B5 दीप्तलोचन°]

30 ᵃ) V1 B1.5 Dn D1 °दूरेण, B5 G6 °दूरेति — ᵇ) Ś1 K1 च, Ñ वि-; G3 तु (for हि) D5 G1-3 लक्ष्यते — ᶜ) B (except B3) D3 D1 4 जागृतव्ये. — ᵈ) Ñ1.3 जागर्म्येतामहं क्षपा

76

१३९

वैशंपायन उवाच ।

तत्र तेषु शयानेषु हिडिम्बो नाम राक्षसः ।
अविदूरे वनात्तस्माच्छालवृक्षमुपाश्रितः ॥ १
क्रूरो मानुषमांसादो महावीर्यो महाबलः ।
विरूपरूपः पिङ्गाक्षः करालो घोरदर्शनः ।
पिशितेप्सुः क्षुधार्तस्तानपश्यत यदृच्छया ॥ २
ऊर्ध्वाङ्गुलिः स कण्डूयन्धुन्वन्रूक्षाञ्शिरोरुहान् ।
जृम्भमाणो महावक्त्रः पुनः पुनरवेक्ष्य च ॥ ३
दुष्टो मानुषमांसादो महाकायो महाबलः ।
आघ्राय मानुषं गन्धं भगिनीमिदमब्रवीत् ॥ ४
उपपन्नश्चिरस्याद्य भक्षो मम मनःप्रियः ।
स्नेहस्रवान्प्रस्रवति जिह्वा पर्येति मे मुखम् ॥ ५
अष्टौ दंष्ट्राः सुतीक्ष्णाग्राश्चिरस्यापातदुःसहाः ।
देहेषु मज्जयिष्यामि स्निग्धेषु पिशितेषु च ॥ ६

आक्रम्य मानुषं कण्ठमाच्छिद्य धमनीमपि ।
उष्णं नवं प्रपास्यामि फेनिलं रुधिरं बहु ॥ ७
गच्छ जानीहि के त्वेते शेरते वनमाश्रिताः ।
मानुषो बलवान्गन्धो घ्राणं तर्पयतीव मे ॥ ८
हत्वैतान्मानुषान्सर्वानानयस्व ममान्तिकम् ।
अस्मद्विषयसुप्तेभ्यो नैतेभ्यो भयमस्ति ते ॥ ९
एषां मांसानि संस्कृत्य मानुषाणां यथेष्टतः ।
भक्षयिष्याव सहितौ कुरु तूर्णं वचो मम ॥ १०
भ्रातुर्वचनमाज्ञाय त्वरमाणेव राक्षसी ।
जगाम तत्र यत्र स्म पाण्डवा भरतर्षभ ॥ ११
ददर्श तत्र गत्वा सा पाण्डवान्पृथया सह ।
शयानान्भीमसेनं च जाग्रतं त्वपराजितम् ॥ १२
दृष्ट्वैव भीमसेनं सा शालस्कन्धमिवोद्गतम् ।
राक्षसी कामयामास रूपेणाप्रतिमं भुवि ॥ १३
अयं श्यामो महाबाहुः सिंहस्कन्धो महाद्युतिः ।
कम्बुग्रीवः पुष्कराक्षो भर्ता युक्तो भवेन्मम ॥ १४
नाहं भ्रातृवचो जातु कुर्यां क्रूरोपसंहितम् ।
पतिस्नेहोऽतिबलवान्न तथा भ्रातृसौहृदम् ॥ १५

C. 1 5944
B. 1 152. 19
K. 1 164. 23

Ñ1 स्नेहेपु पि°

7 G3 om 7 (cf. v. l. 6) — a) K0 D5 आछिद्य (for आक्रम्य) Ñ1 मूर्ध्नि, Ñ3 मूर्ध्नि, G1.2 कर्णं — b) Ś1 K0.2.4 D5 उच्छिद्य K3 G1 M6-8 धमनीरपि, Cd as in text — c) D5 नारं (for नव) — d) K4 D2 मुहु°.

8 G3 om 8ab (cf. v. l. 6) — a) B1.6 G5 Cd तु (for तु) — b) K3 वृक्षमाश्रिता

9 a) Ñ1 इह, M6-8 गत्वा (for हत्वा). Ñ3 इमान्; T2 G M6-8 तान् T2 G एतान् (for सर्वान्) — b) Ś1 K1 D2 आनयेह, K4 °येति, T2 G °याशु, M °येथा Ś1 K1 मदतिक K0.2.3 Ñ1.3 D5 आनयेहांतिक मम — D5 om 9c-10b — d) Ś1 न तेभ्यो, K0 न ह्येभ्यो, K4 ह्यन्येभ्यो, B3 मैतेभ्यो B3 G1.2 भयमस्तु Ś1 K (except K3) Cd नौ

10 D5 om 10ab (cf. v. l. 9) — a) K3 M तेषां; T2 G ततो Ś1 K1-4 M6-8 सत्कृत्य, M8 चोत्कृत्य. K0 सत्कृत्य मासानि; Ñ2 V1 B D (D5 om.) T1 उत्कृत्य मांसानि — b) T2 G मानुषाणि K3 विशेषतः; Ñ2 यथेप्सित — c) Ś1 सुखिनौ (for सहि°) T G सहितौ भक्षयिष्याव — d) T2 G कुरु क्षिप्रं — After 10, K4 Ñ V1 B D (except D5) S (T2 G M om line 1) ins

1517* भक्षयित्वा च मासानि मानुषाणा प्रकामत ।
नृत्याव सहितावावां दत्ततालावनेकश ।
एवमुक्त्वा हिडिम्बा तु हिडिम्बेन तदा वने ।

[(L 2) Ñ3 B5 Da2 Dn1.n3 D1.2.4 नृत्याव T2 G M ततस्तुष्टौ प्रनृत्याव प्रगीतौ करतालकौ — (L 3) Before line 3, S ins वैश° K4 Ñ3 D4 S (except T1) एवमुक्ता हिडिंबेन हिडिंबा (G1-3 M °बी) राक्षसी तदा (K4 Ñ3 D4 तु तदा वने)]

— S cont.

1518* आप्लुत्याप्लुत्य च तरूनगच्छत्पाण्डवान्प्रति ।

11 M om. 11 — b) K0 G6 त्वरमाणैव, K3 D5 T G4.5 °णा च — c) K1 यत्र यत्र (sup lin as in text), B1.3 T2 G1.2.4.5 (by transp) यत्र तत्र — d) Ś1 K2.3 Ñ1.3 भरतर्षभा., K0 पुरुषर्षभा.; D5 पृथया सह T2 G शेरते पाण्डवा वने.

12 a) K0 गत्वा सा तत्र, Ñ1.2 V1 B6 Dn D1.5 T1 G6 तत्र सा गत्वा; T2 G4.5 सा तत्र गत्वा (by transp), G3 तान्तत्रगतान् G1.2 गत्वा सा ददृशे तत्र — K4 (hapl.) om 12b-13a — d) K1 T2 G3-6 M च (for तु) K0.2.3 Dn1 G2 जाग्रतमपरा° — After 12, T2 G ins

1519* उपास्यमानान्भीमेन रूपयौवनशालिना ।
सुकुमारांश्च पार्थांश्च व्यायामेन च कर्शितान् ।
दुःखेन सम्प्रयुक्तांश्च सहज्येष्ठान्प्रमाथिनः ।
रौद्री सती राजपुत्रान्दर्शनीयप्रदर्शनम् ।

[(L. 1) G1.2 भीमेन पालिताश्चैव (for the prior half) — (L 2) G3 सुकुमारान्सुरूपांश्च — (L. 4) G3.4 रौद्रा सती]

13 K4 om 13a (cf. v. l. 12) — b) Ś1 K1 S सालस्कधमि° (G1 °स्कधोपमद्युतिं); Ñ2 V1 B D शालपोतमि°. — G1 om 13c-14b — d) G2 स्वरूपेप्रतिमं भुवि — After 13, S (except G1) ins

1520* अन्तर्गतेन मनसा चिन्तयामास राक्षसी ।

14 G1 om 14ab (cf. v. l. 13) — a) B6 गौर श्या° — b) Ś1 K1.2 सा(K2 श्या)लस्कधो — d) K3 युक्तो भर्ता (by transp). — After 14, M (which om 15-16) ins. line 2 of 1521* (cf. v. l. 16)

15 M om 15-16 — a) T G1.2 भ्रातुर्वचो, G6 भ्रातुर्वंशे — b) Ñ3 क्रूरोपबृंहितं, T2 G क्रूरमसांप्रत — c) T2 G पतिहेतुर् K1 अपि, K2.3 Ñ1.3 B (except B5) Da1 D2.4 T2 G हि (for अति) — d) Ś1 K1 पुनर् (for तथा) K3 N3 G5 °सगतं, T2 G1-4.6 °संगम. (G4m

[illegible]मिव [illegible] भवेद्भ्रातुर्ममैव च ।
[illegible]त्वा तु मोदिष्ये शाश्वतीः समाः ॥ १६
सा कामरूपिणी रूपं कृत्वा मानुषमुत्तमम् ।
उपतस्थे महाबाहुं भीमसेनं शनैः शनैः ॥ १७
विलज्जमानेव लता दिव्याभरणभूषिता ।
स्मितपूर्वमिदं वाक्यं भीमसेनमथाब्रवीत् ॥ १८
कुतस्त्वमसि संप्राप्तः कश्चासि पुरुषर्षभ ।
क इमे शेरते चेह पुरुषा देवरूपिणः ॥ १९
केयं च बृहती श्यामा सुकुमारी तवानघ ।
शेते वनमिदं प्राप्य विश्वस्ता स्वगृहे यथा ॥ २०
नेदं जानाति गहनं वनं राक्षससेवितम् ।
वसति ह्यत्र पापात्मा हिडिम्बो नाम राक्षसः ॥ २१
तेनाहं प्रेषिता भ्रात्रा दुष्टभावेन रक्षसा ।
बिभक्षयिषता मांसं युष्माकममरोपम ॥ २२
साहं त्वामभिसंप्रेक्ष्य देवगर्भसमप्रभम् ।
नान्यं भर्तारमिच्छामि सत्यमेतद्ब्रवीमि ते ॥ २३
एतद्विज्ञाय धर्मज्ञ युक्तं मयि समाचर ।
कामोपहतचित्ताङ्गीं भजमानां भजस्व माम् ॥ २४
त्रास्येऽहं त्वां महाबाहो राक्षसात्पुरुषादकात् ।
वत्स्यावो गिरिदुर्गेषु भर्ता भव ममानघ ॥ २५

---

as in text)

16 M om 16 (cf v. l. 15). — [illegible]) K [illegible] D [illegible] T [illegible] G [illegible] (for [illegible]) Ś1 [illegible] K [illegible] [illegible] D [illegible] G [illegible] (G [illegible], G [illegible]) [illegible] (G [illegible]) — [illegible]) D [illegible] (for [illegible] respectively). T G [illegible] (for [illegible]) G [illegible] (G [illegible]; G [illegible]) — [illegible]) D [illegible] G [illegible]. — T G ins. after 16 M (om. line 1), after 14

1521* हिडिम्बी तु [illegible] ।
[illegible] राक्षस [illegible] मानुषं [illegible] ।

17 Before 17, T G ins. [illegible]. — [illegible]) [illegible] (G [illegible]); cf. 1521* — [illegible]) Ś1 K [illegible] (except T1) [illegible] — [illegible]) [illegible]. — After 17, S ins. [illegible]:

1522* [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥ [5]
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥ [10]

[illegible] T G [illegible]. — (L. 2) [illegible] — (L. 3) G [illegible] — (L. 4) G [illegible] — (L. 5) G [illegible] (for [illegible]). — (L. 8) T G [illegible] T [illegible]; G [illegible]; G [illegible]; G [illegible]. — (L. 9) G [illegible] T [illegible] — (L. 10) T [illegible].]

18 S repeats 18ab, cf. 1522* — [illegible]) K [illegible]; M [illegible] K [illegible] D [illegible]; K [illegible]; Ś1 D [illegible]; [illegible] (for [illegible]) Ś1 V1 D [illegible]; D [illegible]; T G [illegible] — [illegible]) T G [illegible]

19 Before 19, M ins. हिडिम्बा — [illegible]) K [illegible]; G [illegible] — [illegible]) G [illegible] (by transp.) — [illegible]) Ś1 K [illegible]

20 [illegible]) Ś1 [illegible]; Ś1 [illegible] Ś1 V1 B D (except D1) T G [illegible] (for [illegible]) — [illegible]) K (except K1) D M [illegible] (K D [illegible]); G [illegible]. — [illegible]) G [illegible] — [illegible]) K [illegible]; D [illegible] G [illegible]

21 [illegible]) K [illegible]; G [illegible] [illegible] K [illegible]; T G [illegible] M [illegible]; G [illegible] — [illegible]) K [illegible] D [illegible]; G [illegible] [illegible] — [illegible]) [illegible] (as in text) हिडिम्बो and हिडम्बो.

22 [illegible]) [illegible] (as in text) [illegible] D [illegible] — [illegible]) [illegible] G [illegible] — [illegible]) [illegible] K [illegible] D [illegible] M (except M1) [illegible] ([illegible])

23 [illegible]) [illegible]; T G [illegible] (for [illegible]) [illegible] G [illegible] (for [illegible]) — [illegible]) [illegible] (for [illegible]) G [illegible]

24 [illegible]) [illegible] — [illegible]) [illegible] (for [illegible]) — [illegible]) D [illegible]; T G [illegible]

25 [illegible]) [illegible] Ś1 V1 B (except [illegible]) D [illegible]; [illegible]; G [illegible] as in text [illegible] (for [illegible])

अन्तरिक्षचरा ह्यस्मि कामतो विचरामि च ।
अतुलामाप्नुहि प्रीतिं तत्र तत्र मया सह ॥ २६
भीम उवाच ।
मातरं भ्रातरं ज्येष्ठं कनिष्ठानपरानिमान् ।
परित्यजेत को न्वद्य प्रभवन्निव राक्षसि ॥ २७
को हि सुप्तानिमान्भ्रातॄन्दत्त्वा राक्षसभोजनम् ।
मातरं च नरो गच्छेत्कामार्त इव मद्विधः ॥ २८
राक्षस्युवाच ।
यत्ते प्रियं तत्करिष्ये सर्वानेतान्प्रबोधय ।
मोक्षयिष्यामि वः कामं राक्षसात्पुरुषादकात् ॥ २९
भीम उवाच ।
सुखसुप्तान्वने भ्रातॄन्मातरं चैव राक्षसि ।
न भयाद्बोधयिष्यामि भ्रातुस्तव दुरात्मनः ॥ ३०
न हि मे राक्षसा भीरु सोढुं शक्ताः पराक्रमम् ।
न मनुष्या न गन्धर्वा न यक्षाश्चारुलोचने ॥ ३१
गच्छ वा तिष्ठ वा भद्रे यद्वापीच्छसि तत्कुरु ।
तं वा प्रेषय तन्वङ्गि भ्रातरं पुरुषादकम् ॥ ३२

C. 1 5961
B. 1. 152. 30
K. 1. 164. 50

इति श्रीमहाभारते आदिपर्वणि एकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥

— ^{b})=29^{d} — ^{c}) K (except K3) Ñ1 G1.2 वत्स्यामो; M °मि T2 G (except G4) °श्रृंगेषु — ^{d}) T2 G5 भर्ता त्वं मम चानघ — After 25, T G ins

1523* इच्छामि वीर भद्रं ते मा मा प्राणान्विहासिषुः ।
त्वया ह्यहं परित्यक्ता न जीवेयमरिंदम ।

[(L. 1) G6 मम प्राणान् G1 विहास्यसि T1 मा प्राणान्भो विहासिषु — (L. 2) G1 त्वयास्म्यहं]

26 ^{a}) Ñ1.2 V1 B D (except D5) T1 °चरी (for °चरा) S (except T1 G3) चास्मि — ^{b}) K2.4 D5 अहं (for च) S (except T1) कामरूपधरापि च — ^{c}) D5 अचलां Ś1 K1.2.4 Da1 D5 प्राप्नुहि

27 Ś1 K1 भीमसेन ; Ñ V1 B1 D (except Da) भीमसेन उ°, S भीम° — Ś1 K1 (hapl.) om 27^{a}–29^{d} and भीम उ° (before 30) — After the ref., S ins

1524* एष ज्येष्ठो मम भ्राता नान्यः परमको गुरुः ।
अनिविष्टश्च त नाहं परिविद्यां कथंचन ।

[(L. 1) T2 परमतो गुरुः — (L. 2) G1 अनिर्दिष्टश्च, G2 अनिर्विण्ण°, G3 अविनष्ट°, G6 अभिमिष्ट° G5 अनिष्ट कथन नाहं G1.2.4.5 परिवेत्ता; G3 °विता]

— ^{b}) Ñ2 B Da D2.4 अपरानपि; T2 G1.2 अपराजितान्, Ñ1.3 कनीय(Ñ3 °या)सोपरानिमान्, V1 Dn1.n2 D1 सुखसुप्तान्कथं त्विमान् — ^{c}) K3 G1.2 M परित्यजति, T2 G3–6 °त्यजेद्धि — ^{d}) K3 प्रमादादिह, Ñ V1 Dn D1.4 T1 प्रभवन्निह, T2 G M भयादपि च

28 Ś1 K1 Da om 28 (of v. 1. 27) — ^{a}) G1.2 सुखसुप्तान् K (K1 om) Ñ1.3 वने भ्रातॄन् — ^{c}) M5 तथा गच्छेत् — ^{d}) Ñ1.3 कामार्थमिव (Ñ3 °ह) त(Ñ3 म)द्विध — S ins after 28 (M om all but line 1)

1525* राक्षसी ।
एक त्वा मोक्षयिष्यामि सह मात्रा परंतप ।
सोदरानुत्सृजैतांस्त्वमारोह जघनं मम ।
भीमः ।
नाहं जीवितुमाशंसे भ्रातॄनुत्सृज्य राक्षसि ।
यथागतं व्रजैका त्वं विप्रियं मे प्रभाषसे ।

[(L. 1) M6–8 अहं त्वा — (L. 4) T1 G1.2.6 यथाश्रद्धं व्रजैका हि]

29 Ś1 K1 M om 29 (of v. 1. 27) — T1 G1.2 राक्षसी, T2 G3–6 हिडिंबी (all om उवाच) — ^{a}) T2 G न तेप्रियं चिकीर्षामि — ^{b}) K2 G5 विबो°, K4 निबोध मे — ^{c}) Ñ2 V1 B D (except D2.5) T1 अहं (for च) — ^{d})=25^{b}

30 K0.2 Ñ1.2 V1 B1 Dn2 n3 D4.5 भीमसेन उ°, T G भीमः (om. उ°), Ś1 K1.4 M om the ref. (of v. 1. 27) — T2 G transp. 30^{ab} and 30^{cd}. — ^{a}) S (except T1) इमान् (for वने) — ^{b}) M राक्षसात् — After 30^{ab}, M ins भीम° — ^{c}) G3 न भिया

31 ^{b}) T2 G शक्ता सोढुं (by transp.) — ^{d}) D2 चारुहासिनि

32 ^{d}) S राक्षस

Colophon om in B1. — *Major parvan* T2 G M संभव° (for आदि°) — *Sub-parvan* Ś1 K1.3 Ñ V1 B3.5.6 Da Dn1.n2 D1.2.4.5 T2 हिडिंबवध — *Adhy name* K0 हैडयागम°, K4 हिडयागमन, Ñ1.2 V1 T1 भीमहिडिंबा(T1 °राक्षस)संवाद, G3 हिडिंबिसंवाद, G1 हिडिंबप्रयोग — *Adhy no* (figures, words or both) Dn2 151, D1m 154, T1 148, T2 G.6 M 98, G1.2 99, G3.4 97 — *S'loka no* Dn 34 (Dn3 37), M5 33

१४०

वैशंपायन उवाच ।
तां विदित्वा चिरगतां हिडिम्बो राक्षसेश्वरः ।
अवतीर्य द्रुमात्तस्मादाजगामाथ पाण्डवान् ॥ १
लोहिताक्षो महाबाहुरूर्ध्वकेशो महाबलः ।
मेघसंघातवर्ष्मा च तीक्ष्णदंष्ट्रोज्ज्वलाननः ॥ २
तमापतन्तं दृष्ट्वैव तथा विकृतदर्शनम् ।
हिडिम्बोवाच वित्रस्ता भीमसेनमिदं वचः ॥ ३
आपतत्येष दुष्टात्मा संक्रुद्धः पुरुषादकः ।
त्वामहं भ्रातृभिः सार्धं यद्ब्रवीमि तथा कुरु ॥ ४
अहं कामगमा वीर रक्षोबलसमन्विता ।
आरुहेमां मम श्रोणीं नेष्यामि त्वां विहायसा ॥ ५
प्रबोधयैनान्संसुप्तान्मातरं च परंतप ।
सर्वानेव गमिष्यामि गृहीत्वा वो विहायसा ॥ ६
भीम उवाच ।
मा भैस्त्वं विपुलश्रोणि नैष कश्चिन्मयि स्थिते ।
अहमेनं हनिष्यामि प्रेक्षन्त्यास्ते सुमध्यमे ॥ ७
नायं प्रतिबलो भीरु राक्षसापसदो मम ।
सोढुं युधि परिस्पन्दमथवा सर्वराक्षसाः ॥ ८

140

1 [illegible] om. उवाच — [illegible] Ś1 K1 T1 G1 [illegible] (cf. 1. 139. 1), G1 राक्षसेश्वरः — [illegible] Ś1 [illegible] — [illegible] Ś1 V1 B1 Da De [illegible] (for अथ)
2 [illegible] Ś1 V1 B (except B1) [illegible] T1 [illegible] — [illegible] — [illegible] Ś1 V1 B D [illegible] — After 2 [illegible]
[illegible]
[illegible]
3 [illegible] — After [illegible] G1 ins.
[illegible]
4 [illegible]

5 G1 om. 5 (cf. v. 1. 3). — [illegible]) K0 Ś1 [illegible]; K1 [illegible]; T1 G (G1 om.) [illegible] (for वीर) — [illegible]) S (except T1, G1 om.) आरोहेमां Ś1 [illegible] — [illegible]) K0 Ś1 D1 [illegible] Dn D1 M1 विहायसा
6 K1 M (Lapl.) om. 6, G1 om. 6 (cf. v. 1. 3). — [illegible]) B (except B1) D1 [illegible] (for [illegible]) T1 G (G1 om.) [illegible] (for [illegible]) — [illegible]) T1 G (G1 [illegible]) [illegible] — [illegible]) Ś1 [illegible]; K1 Ś1 [illegible]; G1 [illegible] K1 [illegible] — [illegible]) D1 [illegible] Ś1 विहायसा; Ś1 B (except B1) Da D1 T1 [illegible] T1 G (G1 om.) [illegible]
7 G1 om. 7 (cf. v. 1. 3) Ś1 K1 [illegible]; K1 D1 [illegible] — [illegible]) Ś1 K1 [illegible] Ś1 [illegible] K1 V1 D1 D1 T1 [illegible] — [illegible]) K0 [illegible] D1 T G1 [illegible] — After 7[illegible], Ś1 K Ś1 B1 D1 Da Dn ins.
[illegible] इति मे [illegible] मतिः ।
[illegible]
— On [illegible] Dn ins. after 7[illegible]
[illegible]
— [illegible]) G1 [illegible] — [illegible]) K1 T1 G (G1 om.) [illegible] M1 [illegible] (cf. 8[illegible]).
8 G1 om. 8 (cf. v. 1. 3). — [illegible]) K1 D1 [illegible] D1 [illegible] (D1 [illegible]), M1 [illegible] — [illegible]) D1 S (G1 om.) [illegible] — [illegible]) D1 [illegible] Ś1

पश्य बाहू सुवृत्तौ मे हस्तिहस्तनिभाविमौ ।
ऊरू परिघसंकाशौ संहतं चाप्युरो मम ॥ ९
विक्रमं मे यथेन्द्रस्य साद्य द्रक्ष्यसि शोभने ।
मावमंस्थाः पृथुश्रोणि मत्वा मामिह मानुषम् ॥ १०

हिडिम्बोवाच ।

नावमन्ये नरव्याघ्र त्वामहं देवरूपिणम् ।
दृष्टापदानस्तु मया मानुषेष्वेव राक्षसः ॥ ११

वैशंपायन उवाच ।

तथा संजल्पतस्तस्य भीमसेनस्य भारत ।
वाचः शुश्राव ताः क्रुद्धो राक्षसः पुरुषादकः ॥ १२
अवेक्षमाणस्तस्याश्च हिडिम्बो मानुषं वपुः ।
स्रग्दामपूरितशिखं समग्रेन्दुनिभाननम् ॥ १३
सुभ्रूनासाक्षिकेशान्तं सुकुमारनखत्वचम् ।
सर्वाभरणसंयुक्तं सुसूक्ष्माम्बरवाससम् ॥ १४
तां तथा मानुषं रूपं बिभ्रतीं सुमनोहरम् ।
पुंस्कामां शङ्कमानश्च चुक्रोध पुरुषादकः ॥ १५
संक्रुद्धो राक्षसस्तस्या भगिन्याः कुरुसत्तम ।
उत्फाल्य विपुले नेत्रे ततस्तामिदमब्रवीत् ॥ १६
को हि मे भोक्तुकामस्य विघ्नं चरति दुर्मतिः ।
न बिभेषि हिडिम्बे किं मत्कोपाद्विप्रमोहिता ॥१७
धिक्त्वामसति पुंस्कामे मम विप्रियकारिणि ।
पूर्वेषां राक्षसेन्द्राणां सर्वेषामयशस्करि ॥ १८

C 1 5979
B 1 153. 18
K 1. 163. 20

D5 M शक्त°; T2 G4. 5 मम (for युधि) M5 पर हतुं — d) T G (G3 om) अशक्ता° (for अथवा)

9 G3 om 9 (of v 1 3) — a) Ñ1 विवृत्तौ. — b) K0 Ñ1 3 °निभावुभौ; K3 °हस्तोपमाविमौ, S (except T1, G3 om) °हस्तोपमौ शुभौ (G2 शुभे; G4 भुजौ) — d) Ñ3 सघातं K1 2 Ñ V1 B D (except D5) T1 M महत् (for मम)

10 G3 om 10 (of v 1 3) — a) D5 G1. 2 M महेंद्रस्य — b) K3 D1 साक्षाद्; S (except T1, G3 om.) यथा (for साद्य) — d) Ñ3 °ह मानवं

11 G3 om 11 (of v 1 3) K0 1. 3 हिडिंबा; T2 G (G3 om) M हिडिंबी (M5 राक्षसी); K4 T1 om. the ref — a) G5 नरश्रेष्ठ — b) K3 मत्वा त्वा देव° — c) K0 दृष्टा युवानस्तु; K2 B5m D1. 5 दृष्ट्वावदासस् (B5m °नास्, D1 °नस्; D5 °नं) तु; K3 दृष्ट्वावदानासु; K4 V1 B1m 5 6 Dn D2 4 दृष्टप्रभाव(B5. 6 °वा)स्तु, Ñ B1. 3 दृष्टा(Ñ3 °ष्ट्वा)वदानं (B1 3 °नस्) तु; Da S (G3 om) °प(Da T1 °व)दानास्तु — d) K3 अथ; K4 B3m Da D1 T G (G3 om) इह (for एव) K3 B3 6 Da S (G3 om) राक्षसा K0 राक्षसश्चैव मानवा

12 G3 om 12 (of v 1 3) Ś1 K1 D2 S om उवाच (G2 om the ref) — a) Ñ3 D2 5 T2 G1 4–6 M तथा Ñ3 सजल्पमानस्य — c) G1. 2 4 M3 वच° T2 G (G3 om) श्रुत्वा तत°, M3 श्रुत्वाम्ययात्; M5–8 श्रुत्वा च (M5 तु) ता K4 तद् (for ता°) Ś1 K0 2. 3 Ñ1 क्षुद्रो, K4 रक्षो (for क्रुद्धो) — d) G1 पुरुपाकृति

13 G3 om 13 (of v 1 3), G6 om 13^{a}–15^{b}. — c) K0 D5 निरीक्षमाणस् K2 M3 तस्यास्तु, K4 D5 तस्याशु — K0 om. 13^{c}–15^{a} — c) D5 M °शिखां; T2 G1 2 5 °भूपित(G5 °पण)शिखां — d) K4 सपूर्णेंदु°, D5 °शुभाननां, S (except T1, G3 6 om) °निभानना

14 K0 G3. 6 om 14 (of v 1 3, 13) — a) D5 T2 G1 2 4 5 M3. 5 8 °केशांता — c) K1 °पूर्णं, K3 °पक्ष, S (except T1, G3 6 om) °युक्तां — d) Ś1 K1 Ñ1 सुसूक्ष्मातर°, K2–4 B5 D5 °क्ष्मोत्तर°, Ñ3 सुसूक्ष्मं तनु°; S (except T1, G3. 6 om) °धारिणीं

15 G3 om 15, G6 om 15^{ab}, K0 om 15^{a} (of v. 1 3, 13) — a) S (except T1, G3. 6 om) भगिनीं (for तां तथा) Ñ2 °प कल्पं — b) T2 G1 2. 5 M5–8 °हरां, M3 °रमां — After 15^{ab}, S (except T1 G3. 6) ins

1530* स ददर्शाग्रतस्तस्य भीमस्य पुरुपादक° ।

— d) G2 चुक्रोश; G6 °कोप S (except T1, G3 om) स निशाचर

16 G3 om 16 (of v 1 3) — a) T2 G4. 5 M3 तत्र, G2 M5 तस्य; M6–8 त च (for तस्या) — b) T2 G4 5 M तां (M6–8 तान्) दृष्ट्वा; (for भगि°) Ś1 भरतर्षभ, K2 3 पुरुपादक (for कुरु°) — c) S (G3 om) विस्फार्य, Cd उत्फाल्य (as in text) K3 विकटे नें° — d) K0 D5 M भगिनीं; Ñ3 ततस्तान्, G1. 2 हिडिंबा (G2 °बीं)

17 Cf. v 1 2 and 1527* — G3 om 17 (cf. v 1. 3). Before 17, M3 6–8 ins हिडिंब — a) T1 G1. 2 6 M3 कस्मान्मे — b) T1 G1 2 M दुर्मते K0 4 विघ्नं कर्तुमिहेच्छति — c) T2 G2 4 5 हिडिंबि K3 T2 G4. 5 त्व; M मां (for किं) — d) T G4–6 कामाद्वै, G1. 2 केन

यानिमानाश्रिताकार्षीरप्रियं सुमहन्मम ।
एष तानद्य वै सर्वान्हनिष्यामि त्वया सह ॥ १९
एवमुक्त्वा हिडिम्बां स हिडिम्बो लोहितेक्षणः ।
वधायाभिपपातैनां दन्तैर्दन्तानुपस्पृशन् ॥ २०
तमापतन्तं संप्रेक्ष्य भीमः प्रहरतां वरः ।
भर्त्सयामास तेजस्वी तिष्ठ तिष्ठेति चाब्रवीत् ॥ २१

इति श्रीमहाभारते आदिपर्वणि चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥

१४१

वैशंपायन उवाच ।
भीमसेनस्तु तं दृष्ट्वा राक्षसं प्रहसन्निव ।
भगिनीं प्रति संक्रुद्धमिदं वचनमब्रवीत् ॥ १
किं ते हिडिम्ब एतैर्वा सुखसुप्तैः प्रबोधितैः ।
मामासादय दुर्बुद्धे तरसा त्वं नराशन ॥ २
मय्येव प्रहरेहि त्वं न स्त्रियं हन्तुमर्हसि ।
विशेषतोऽनपकृते परेणापकृते सति ॥ ३
न हीयं स्ववशा बाला कामयत्यद्य मामिह ।
चोदितैषा ह्यनङ्गेन शरीरान्तरचारिणा ।
भगिनी तव दुर्बुद्धे राक्षसानां यशोहर ॥ ४
त्वन्नियोगेन चैवेयं रूपं मम समीक्ष्य च ।
कामयत्यद्य मां भीरुर्नैषा दूषयते कुलम् ॥ ५

अनङ्गेन कृते दोषे नेमां त्वमिह राक्षस ।
मयि तिष्ठति दुष्टात्मन्न स्त्रियं हन्तुमर्हसि ॥ ६
समागच्छ मया सार्धमेकेनैको नराशन ।
अहमेव नयिष्यामि त्वामद्य यमसादनम् ॥ ७
अद्य ते तलनिष्पिष्टं शिरो राक्षस दीर्यताम् ।
कुञ्जरस्येव पादेन विनिष्पिष्टं बलीयसः ॥ ८
अद्य गात्राणि क्रव्यादाः श्येना गोमायवश्च ते ।
कर्षन्तु भुवि संहृष्टा निहतस्य मया मृधे ॥ ९
क्षणेनाद्य करिष्येऽहमिदं वनमकण्टकम् ।
पुरस्ताद्दूषितं नित्यं त्वया भक्षयता नरान् ॥ १०
अद्य त्वां भगिनी पाप कृष्यमाणं मया भुवि ।
द्रक्षत्यद्रिप्रतीकाशं सिंहेनेव महाद्विपम् ॥ ११
निराबाधास्त्वयि हते मया राक्षसपांसन ।
वनमेतच्चरिष्यन्ति पुरुषा वनचारिणः ॥ १२

हिडिम्ब उवाच ।

गर्जितेन वृथा किं ते कत्थितेन च मानुष ।
कृत्वैतत्कर्मणा सर्वं कत्थेथा मा चिरं कृथाः ॥ १३
बलिनं मन्यसे यच्च आत्मानमपराक्रमम् ।
ज्ञास्यस्यद्य समागम्य मयात्मानं बलाधिकम् ॥ १४
न तावदेतान्हिंसिष्ये स्वपन्त्वेते यथासुखम् । C 1 5997 B 1 153. 36 K 1 165. 38

कामयत्यवशा भीरु — d) V1 B6 D (except D5) T1 तव (D4 तुभ्य) नैपापराध्यति (of v 1 2)

6 G3 om 6 (of v 1 3) — a) K0 4 Ñ1 कृतो दोषो — b) K0 न मां; Ñ2 B1 नैनां K4 Ñ2 V1 B D (except D5) T1 गर्हितुमर्हसि (for त्वमिह रा°) — After 6ab, G1 2 ins

1532* हन्तुमर्हसि दुर्बुद्धे शूरश्रेत्सहर स्मरम् ।
— D4 om 6cd — d) =3b Ś1 K1 त्वं स्त्रिय, Ñ1 8 स्त्रियं वै (for न स्त्रिय) G1 2 यदि मां हतुमिच्छसि — After 6, G1 2 ins

1533* मदर्थं कामबाणार्तां त्वामहं हन्मि राक्षस ।

7 a) Ñ2 V1 B D (except D5) T1 G2 3 सगच्छस्व मया Ś1 K1 साकं (for सार्धं) — c) V1 Dn अहमेको Ś1 D1 हनिष्यामि, K1 3 Ñ1 B5 D4 M हि नेष्यामि, D5 Nil (comm) गमिष्यामि, T2 G3-6 तु नेष्यामि, Dn (erroneously) Nilp as in text G1, 2 एकोहमेव नेष्यामि.

8 a) Ñ2 V1 B D (except D5) T1 अथ मद्दलनि°; G3 तत्ते तलविनि° — b) M3 5 दीर्यते, M6-8 शीर्यते G1, 2 शिरस्ते राक्षसाधम — After 8ab, G1 2 ins

1534* शतधा भेदमायाति पूर्णकुम्भ इवाश्मनि ।
— cd) G5 om 8cd S (except T1, G6 om) °स्येव निष्पिष्ट सिंहेनेव (T2 °नातिः G1 5 M3, 5 °न हि) बलीयसा

9 a) K0 D5 गृध्राद्या, Ñ1 चक्रांगा; Ñ2 sm V1 B D (except D5) T1 ते कका, Ñ3 वक्रांगा, T2 G M गृध्राश्च (for क्रव्यादा) K1 क्रव्यादा अद्य गात्राणि — b) D5 श्वानो, S वला (M5 श्याला; T1 श्येना as in text) Ś1 K Ñ3 च ते (as in text), D5 च ये, the rest तथा — c) G3 भक्षतु K2 तव (for भुवि) Ñ1 3 समहृष्टास्ते (Ñ3 °ष्टा वै), Ñ2 B1, 3 5 भृशसहृष्टा, B6 Dn D2 4 सुभृश हृष्टा (for भुवि सहृष्टा) K0 कर्षयतु सुसहृष्टा — d) Ś1 B3 महामृधे, G3 मया रणे, G5 मया वने

10 a) S (except T1 G2) करिष्यामि — b) Ñ2 V1 B D (except D5) T1 वनमराक्षसं T2 G M वन निहत कटक — c) Ñ2 V1 B D (except D5) T1 पुरा यद्दूषित. K3 नून; M6-8 तस्य

11 a) K1 D5 T2 G M पापं, Ñ2 V1 B Dn Dn D1 2, 4 T1 रक्ष — b) Ñ2 V1 B D (except D5) T1 मयासकृत् — c) Ś1 K0 4 Ñ3 D5 द्रक्ष्यते° — d) K1 महागज

12 M om 12 — a) T2 G (except G6) निराबाध — b) Ñ2 °पांसुल — c) K0 वनमेते, K4 सुखमेतच्

13 K0 3 राक्षस उ°, T1 G1, 2 M5 हिडिंब, T2 G3-6 M3, 6-8 राक्षस — K1 om 13a-14b — a) G1 2 गर्जनेन T2 G भृशं किं ते — b) G1 2 6 M6-8 कत्थनेन, Cd as in text T2 G मानव — After 13ab, M3 ins

1535* शारदस्येव मेघस्य गर्जित निष्फल हि ते ।
— c) Ñ1 स्वस्कृते कर्मणा Ś1 K0 2 4 D5 पूर्वं, D2 सार्धं (for सर्वं) — d) Ñ2 B6 D4 कत्थ मा, M कत्थ्यता (for कत्थे°) G1, 3 वृथा (for कृथा) K0 D5 कथय त्वं नराधिप (D5 °धम)

14 K1 om 14ab (of v 1 13), B5 om 14a-17b — a) K2 Ñ1 यत्त्वम्, D5 S यस्माद् (G3 यन्माम्, T1 यच्च as in text) — b) Ś1 K0 3 Ñ2 3 V1 B3 Dn D1 T1 ins अपि between the two halves of the line (to avoid the hiatus) Ś1 च पराक्रमः, K0 त्व न मासभुक्, K2 D2 स्वपराक्रमात् (D2 °क्रम), K4 Ñ V1 B3 Dn D1 4 सपरा°; B1 5 Da सुपरा°, M3 अपराजित G2 आत्मनस्तु पराक्रम — c) T2 G (except G3) ज्ञास्यसे K3 त्व (for अद्य) D5 समागत्य, T2 G मयागम्य (G1 2 °स्य) — d) T2 G बलहीन ततो भुवि

15 B5 om 15 (cf v 1 14) — a) M6-8 एतान्

एष त्वामेव दुर्बुद्धे निहन्म्यद्याप्रियंवदम् ॥ १५
पीत्वा तवासृग्गात्रेभ्यस्ततः पश्चादिमानपि ।
हनिष्यामि ततः पश्चादिमां विप्रियकारिणीम् ॥ १६

वैशंपायन उवाच ।

एवमुक्त्वा ततो बाहुं प्रगृह्य पुरुषादकः ।
अभ्यधावत संक्रुद्धो भीमसेनमरिंदमम् ॥ १७
तस्याभिपततस्तूर्णं भीमो भीमपराक्रमः ।
वेगेन प्रहृतं बाहुं निजग्राह हसन्निव ॥ १८
निगृह्य तं बलाद्भीमो विस्फुरन्तं चकर्ष ह ।
तस्माद्देशाद्धनूंष्यष्टौ सिंहः क्षुद्रमृगं यथा ॥ १९
ततः स राक्षसः क्रुद्धः पाण्डवेन बलाद्धृतः ।
भीमसेनं समालिङ्ग्य व्यनदद्भैरवं रवम् ॥ २०
पुनर्भीमो बलादेनं विचकर्ष महाबलः ।
मा शब्दः सुखसुप्तानां भ्रातॄणां मे भवेदिति ॥ २१
अन्योन्यं तौ समासाद्य विचकर्षतुरोजसा ।
राक्षसो भीमसेनश्च विक्रमं चक्रतुः परम् ॥ २२

बभञ्जतुर्महावृक्षाँल्लताश्चाकर्षतुस्ततः ।
मत्ताविव सुसंरब्धौ वारणौ षष्टिहायनौ ॥ २३

तयोः शब्देन महता विबुद्धास्ते नरर्षभाः ।
सह मात्रा तु ददृशुर्हिडिम्बामग्रतः स्थिताम् ॥ २४

इति श्रीमहाभारते आदिपर्वणि एकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

१४२

वैशंपायन उवाच ।
प्रबुद्धास्ते हिडिम्बाया रूपं दृष्ट्वातिमानुषम् ।
विस्मिताः पुरुषव्याघ्रा बभूवुः पृथया सह ॥ १
ततः कुन्ती समीक्ष्यैनां विस्मिता रूपसंपदा ।
उवाच मधुरं वाक्यं सान्त्वपूर्वमिदं शनैः ॥ २
कस्य त्वं सुरगर्भाभे का चासि वरवर्णिनि ।
केन कार्येण सुश्रोणि कुतश्चागमनं तव ॥ ३
यदि वास्य वनस्यासि देवता यदि वाप्सराः ।
आचक्ष्व मम तत्सर्वं किमर्थं चेह तिष्ठसि ॥ ४
हिडिम्बोवाच ।
यदेतत्पश्यसि वनं नीलमेघनिभं महत् ।
निवासो राक्षसस्यैतद्धिडिम्बस्य ममैव च ॥ ५

C 1 6011
B 1 154. 5
K 1 160. 5

सु-) सक्रुद्धौ — ^{d}) K0 T2 G (G3 4 om) मातगौ (for वारणौ) T2 G1 2 M (except M5) षाष्टि°. — T G1.2 4 5 (om lines 8–12) 6 ins after 23 G3 (om lines 1, 11, 12), after 22

1538* पादपानुद्धरन्तौ तावूरुवेगेन वेगितौ ।
स्फोटयन्तौ लताजालान्यूरुभ्यां गृह्य सर्वश. ।
वित्रासयन्तौ तौ शब्दै सर्वतो मृगपक्षिण· ।
बलेन बलिनौ मत्तावन्योन्यवधकाङ्क्षिणौ ।
भीमराक्षसयोर्युद्ध तदावर्तत दारुणम् । [5]
ऊरुबाहुपरिक्लेशात्कर्षन्तावितरेतरम् ।
उत्कर्षन्तौ विकर्षन्तौ प्रकर्षन्तौ परस्परम् ।
तत शब्देन महता गर्जन्तौ तौ परस्परम् ।
पाषाणसघातनिभै प्रहारैरभिजघ्नतु ।
अन्योन्य तौ समालिङ्ग्य विकर्षन्तौ परस्परम् । [10]
बाहुयुद्धमभूद्घोर बलिवासवयोरिव ।
युद्धसरम्भनिर्गच्छत्फूत्काररवनिस्वनम् ।

[(L 5) T1 तदा तु दारुण युद्धं चक्रतुर्भीमराक्षसौ — After line 5, G1 2 4 ins.

1539* पुरा देवासुरे युद्धे वृत्रवासवयोरिव ।

— (L. 7) Cf 1 142 12^{ab} T G3–6 उत्कर्षण विकर्षण-मपकर्षणमेव च — (L 8) Cf 1 142 12^{ab}. G1.2 तौ शब्देन विना राजन् (for the prior half) — (L 9) G1.2 °सघट्टनिभै — (L 12) T2 G4.6 °फूत्काराराव°.]

24 ^{b}) Dn3 M3.5 प्रबुद्धास् G1 2 पाडुसभवा (for ते नर°) — ^{c}) K2 3 Ñ1 V1 B D T1 च, Ñ2 हि; Ñ3 T2 G अथ (for तु) M सह मात्रा ददृशिरे — ^{d}) G1–3 हिडिंबीं Ñ3 तु स्थितामिति, T1 अग्रचेष्टिता; G1 2 पुरत स्थितां

Colophon om in Ñ2 D1 — *Major parvan* T2 G M सभव° (for आदि°) — *Sub-parvan* Ś1 K0–3 Ñ1 3 V1 B1 5 6 Da Dn D2 4 T1 M3 6–8 हि.डिंबवध — *Adhy name* K4 D5 भीमसेनहिडिंबयोर् (D5 °डिंब) युद्ध. — *Adhy no* (figures, words or both) B1 T1 149; Dn3 152, D4m 155, T2 G5 6 M 100, G1 2 101, G3 4 99 — *S'loka no* Dn 45, M3 25 — *Aggregate s'loka no* Dn2 5994

142

1 Ś1 K1 3 D5 S om उवाच; D1 om the ref — ^{a}) K1 विबुद्धास्ते — ^{b}) T2 G रूपमालोक्य शोभनं — ^{c}) G1 2 °ता रूपसपत्त्या (of 2^{b})

2 ^{a}) G3 समेत्य (for समीक्ष्य) — ^{d}) K2 3 D4 G1 वच ; K4 यथा (for शनै)

3 Before 3, K0 D5 ins कुती उ°, K3 4 D1 (marg. sec m) कुत्युवाच, M (except M5) कुती — ^{b}) K0 2 Ñ1 2 V1 B Dn D2 G1 M5 वा (for च) — ^{c}) Ñ3 V1 B D (except D5) T1 समाख्या, G6 सुभगे (for सुश्रो°)

4 ^{a}) Ś1 K3 चास्य, K0 M6 7 चापि; K1 Ñ1 T2 G (except G3) M3 वासि, K4 N2 3 M5 चासि; M8 नापि. Ś1 K1–4 V1 Dn D1 T1 °स्य त्व, K0 Ñ B D5 T2 G M °स्यास्य (G3 °च) — ^{b}) A few MSS °प्सरा — ^{c}) M भद्रे (for मम) — ^{d}) K0 2 om च

5 K1 3 Ñ3 S om उवाच — ^{b}) G1.2 °मेघसमप्रभं. — ^{c}) K0 4 Ñ3 D5 M इह; K1–3 Ñ1 2 V1 B D1 2 Dn2 n3 D1 3.4 T1 एप, Da1 Dn1 एष; G4 इति (for एतद्) — ^{d})

तत्र मां कामयानस्य भगिनीं विद्धि भामिनि ।
भ्रात्रा संप्रेषितामार्ये त्वां सपुत्रां जिघांसता ॥ ६
क्रूरबुद्धेरहं तस्य वचनादागता इह ।
दृष्ट्वा हेमप्रभं तव पुत्रं महौजसम् ॥ ७
ततोऽहं सर्वभूतानां भावे विचरता शुभे ।
चोदिता तव पुत्रस्य मन्मथेन वशानुगा ॥ ८
ततो वृतो मया भर्ता तव पुत्रो महाबलः ।
अपनेतुं च यतितो न चैव शकितो मया ॥ ९
चिरायमाणां मां ज्ञात्वा ततः स पुरुषादकः ।
स्वयमेवागतो हन्तुमिमान्सर्वांस्तवात्मजान् ॥ १०
स तेन मम कान्तेन तव पुत्रेण धीमता ।
बलादितो विनिष्पिष्य व्यपकृष्टो महात्मना ॥ ११
विकर्षन्तौ महावेगौ गर्जमानौ परस्परम् ।
पश्यध्वं युधि विक्रान्तावेतौ तौ नरराक्षसौ ॥ १२

वैशंपायन उवाच ।

तस्याः श्रुत्वैव वचनमुत्पपात युधिष्ठिरः ।
अर्जुनो नकुलश्चैव सहदेवश्च वीर्यवान् ॥ १३
तौ ते ददृशुरासक्तौ विकर्षन्तौ परस्परम् ।
काङ्क्षमाणौ जयं चैव सिंहाविव रणोत्कटौ ॥ १४
तावन्योन्यं समाश्लिष्य विकर्षन्तौ परस्परम् ।
दावाग्निधूमसदृशं चक्रतुः पार्थिवं रजः ॥ १५
वसुधारेणुसंवीतौ वसुधाधरसंनिभौ ।

विभ्राजेतां यथा शैलौ नीहारेणाभिसंवृतौ ॥ १६
राक्षसेन तथा भीमं क्लिश्यमानं निरीक्ष्य तु ।
उवाचेदं वचः पार्थः प्रहसञ्शनकैरिव ॥ १७
भीम मा भैर्महाबाहो न त्वां बुध्यामहे वयम् ।
समेतं भीमरूपेण प्रसुप्ताः श्रमकर्शिताः ॥ १८
साहाय्येऽस्मि स्थितः पार्थ योधयिष्यामि राक्षसम् ।
नकुलः सहदेवश्च मातरं गोपयिष्यतः ॥ १९

भीम उवाच ।

उदासीनो निरीक्षस्व न कार्यः संभ्रमस्त्वया ।
न जात्वयं पुनर्जीवेन्मद्बाह्वन्तरमागतः ॥ २०

अर्जुन उवाच ।

किमनेन चिरं भीम जीवता पापरक्षसा ।
गन्तव्यं न चिरं स्थातुमिह शक्यमरिंदम ॥ २१
पुरा संरज्यते प्राची पुरा संध्या प्रवर्तते ।
रौद्रे मुहूर्ते रक्षांसि प्रबलानि भवन्ति च ॥ २२
त्वरस्व भीम मा क्रीड जहि रक्षो विभीषणम् ।
पुरा विकुरुते मायां भुजयोः सारमर्पय ॥ २३

वैशंपायन उवाच ।

अर्जुनेनैवमुक्तस्तु भीमो भीमस्य रक्षसः ।
उत्क्षिप्याभ्रामयद्देहं तूर्णं गुणशताधिकम् ॥ २४

C 1 6031
B 1 154 25
K 1 160 31

1541* ते पश्यन्तो महद्युद्धं सर्वे व्यथितचेतसः ।
[G1.2 transp ते and पश्यत]

17 a) K1 ततो, K4 Ñ1 2 V1 Dn D1 M8 तदा, T2 G बलाद् — b) K4 कृष्यमाणौ, T2 क्लिष्य°; G3 पीड्य°. K0 2 समीक्ष्य V1 B Dn D1 T G च, D2 इ; M त (for तु) — After 17ab, T G ins

1542* चिरप्रयुद्धौ तौ दृष्ट्वा त्वयोन्यवधकाङ्क्षया ।
[G1 चिरयुद्धौ कृतौ द°, G6 °द्धौ दृष्ट्वा च T1 G2.4 च (for तु) G6 om तु G1 2 °कांक्षिणौ]

— c) B (B1 marg) Da D2 तत° (for वच) K3 उवाच वचनं पा° — d) K1 तदा (for इव) T2 G प्रहसन्निव भारत

18 Before 18, D4 (marg sec m) ins अर्जुन उ°, G1 M अर्जुन — a) Ñ3 transp भीम and मा भैर् G1.2 M भीम (for मा भैर्) — b) Some MSS त्वा (for त्वां) — d) Ñ2 V1 B D (except D5) T1 रक्षसा (for प्रसु°) Ś1 K2 4 Ñ V1 B Da Dn1 n2 D1 °कर्पिता. (B5 6 °त), K1 °कल्पिता°, D4 °कर्शित, G1 °निर्जिता.

19 a) K0 T1 M8 सहाये, K1 2 4 T2 G (except G4) सहायो G (except G1 5) पार्श्वे (for पार्थ) — b) Ñ2 V1 B D (except D5) T1 पातयि°; G1.3 यो वधिष्या° — c) M यमौ च राजा कौंतेयो — d) Ś1 पालयिष्य°

20 K1 S om उवाच Ś1 Da1 भीमसेन (for भीम उ°) — d) T2 G मद्भुजातरम् M आश्रित (for आग°) K0 Da D5 मम याह्वतरे स्थित (Da °तर गत) — After 20, T G (T2 G3 5 6 om lines 1-2) ins

1543* भुजयोरन्तरं प्राप्तो भीमसेनस्य राक्षसः ।
असुक्त्वा पार्थ वीर्येण मृतो मा भूदिति ध्वनि ।
अयमस्मान्न नो हन्याज्जातु वै पार्थ राक्षसः ।
जीवन्त न प्रमोक्ष्यामि मा भैषीर्भरतर्षभ ।

[(L 2) G1.2 असृत्वा — (L 4) T2 G4 हि (for प्र)]

21 Ś1 K1 S om उवाच — After अर्जुन., T G ins.

1544* पूर्वरात्रे प्रबुद्धोऽसि भीम क्रूरेण रक्षसा ।
क्षपा व्युष्टा न चेदानीं समाप्तोऽसि महारणम् ।
[(L 1) G3-5 प्रयु°. — (L 2) T1 G1 समाप्तस्तु; T2 G6 °माप्तोपि, G2 °माप्त तु T1 G1 °रण°; G2 त्वया रण]

— a) B5 वीर; G1 2 भूप (for भीम) — b) T2 G दुष्टचारिणा (for पाप°) — c) K0 Ñ V1 B D T1 गतव्ये न (D5 °व्योपि, T1 °व्यो न), T2 G नातरेण. — d) S (except T1) परतप (for अरिंदम).

22 a) Ñ1 दिशा; D5 यावत्, Arj (comm) Cd पुरः (=अग्रत°), Da (erroneously) Arjp पुरा (as in text) D5 न रज्यते काष्ठा — b) D5 पूर्वसध्या — d) Ś1 चलवति (for प्रब°) K1 इ; K4 M8 5 हि, Ñ V1 B D (except D5) T1 उत (for च) T2 G भवति बलवति च

23 a) K0 भैस्त्व; Ñ2 B1 8 ह्रासीद्, Ñ3 भीत, S (except T1 G1) लीला (G3.5 °ल; G4 °ला) (for क्रीड) — b) Many MSS विभी° — d) Ś1 K भुजाभ्यां साधु योक्त्रय (K4 योधयन्), D5 जानुभ्यां साधु योजय — After 23, T2 G ins

1545* माहात्म्यमात्मनो वेत्थ नराणां हितकाम्यया ।
रक्षो जहि यथा शक्र पुरा वृत्रं महावने ।
[(L 2) T2 G4 महाहवे, G1.2 महासुर]

Thereafter T G read 26-27

24 Ś1 K1 3.4 S om उवाच (K4 M6-8 om the ref) — After 24a, K4 Ñ V1 B D (for D5 see below) T1 ins

1546* भीमो रोषाज्ज्वलन्निव ।
बलमाहारयामास यद्वायोर्जगतः क्षये ।
ततस्तस्याम्बुदाभस्य

भीम उवाच ।

वृथामांसैर्भृतः पुष्टो वृथा वृद्धो वृथामतिः ।
वृथामरणमर्हस्त्वं वृथाद्य न भविष्यसि ॥ २५

अर्जुन उवाच ।

यदि वा मन्यसे भारं त्वमिमं राक्षसं युधि ।
करोमि तव साहाय्यं शीघ्रमेव निहन्यताम् ॥ २६

अथ वाप्यहमेवैनं हनिष्यामि वृकोदर ।
कृतकर्मा परिश्रान्तः साधु तावदुपारम ॥ २७

वैशंपायन उवाच ।

तस्य तद्वचनं श्रुत्वा भीमसेनोऽत्यमर्षणः ।
निष्पिष्यैनं बलाद्भूमौ पशुमारममारयत् ॥ २८

स मार्यमाणो भीमेन ननाद विपुलं स्वनम् ।
पूरयंस्तद्वनं सर्वं जलार्द्र इव दुन्दुभिः ॥ २९

बाहुभ्यां योक्त्रयित्वा तं बलवान्पाण्डुनन्दनः ।
मध्ये भङ्क्त्वा स बलवान्हर्षयामास पाण्डवान् ॥ ३०

हिडिम्बं निहतं दृष्ट्वा संहृष्टास्ते तरस्विनः ।

अपूजयन्नरव्याघ्रं भीमसेनमरिंदमम् ॥ ३१
अभिपूज्य महात्मानं भीमं भीमपराक्रमम् ।
पुनरेवार्जुनो वाक्यमुवाचेदं वृकोदरम् ॥ ३२
नदूरे नगरं मन्ये वनादस्मादहं प्रभो ।
शीघ्रं गच्छाम भद्रं ते न नो विद्यात्सुयोधनः ॥३३
ततः सर्वे तथेत्युक्त्वा सह मात्रा परंतपाः ।
प्रययुः पुरुषव्याघ्रा हिडिम्बा चैव राक्षसी ॥ ३४

C. 1. 6041
B. 1. 154. 56
K. 1. 166. 45

इति श्रीमहाभारते आदिपर्वणि द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥ समाप्तं हिडिम्ववधपर्व ॥

°ध्ये तु भंक्त्वा बल°
31 ^{b}) K₂ संतुष्टास्, B₈ प्रहृ° Ñ₈ M₈ तपस्विनः Ko D₅ हृष्टास्ते कुरुनंदना, T₂ G प्रहृष्टास्तत्र पांडवा (G₅ बाधवाः). — After 31^{ab}, T G ins

1551* हिडिम्बा चैव संप्रेक्ष्य निहतं राक्षसं रणे ।
अदृश्याश्चैव ये स्वस्थाः समेता भूतवादिका° ।
पूजयन्ति स्म संहृष्टा साधु साध्विति पाण्डवम् ।
भ्रातरश्चापि संहृष्टा युधिष्ठिरपुरोगमा ।

[(L. 1) T₁ हिडिंबं, T₂ G₃–₆ हिडिंबी G₁ ₂ सा च (for चैव) T₁ वने (for रणे) — (L. 2) T₁ अदृश्यांगाश्च G₃ सिद्धाश्च, G₄ मेघस्था (for ये स्वस्था.) G₁ सर्वे त (for समेता) T₁ भूतचारका, G₁ °देवता, G₃ °वादिन., G₄ सर्पिचारणा G₅ °वादका]
— ^{c}) Ñ₁ पूजयंतो नरव्याघ्रा
32 Ko om. 32^{ab} — ^{a}) T₂ G अथ (for अभि) Ñ₈ महात्मान°; M₈ ₅ यथान्याय M₆–₈ °पूज्याथ तं भीम — ^{b}) Ñ₈ भीमसेनपरा° — ^{cd}) M °रेवाब्रवीद्वाक्यमर्जुनस्तु वृ°.
33 ^{a}) Ñ₁ ₂ V₁ B (except B₆) Dn₁.n₃ D₂ न दूरं; T G₂–₆ M अदूरे G₁ यथा तु तेन गतव्य — ^{b}) G₁ इह (for अहं) N₁ V₁ B (except B₁) D (except D₅) T₁ विभो — ^{d}) Ko ₃ ₄ D₄ ₅ G₃ विंद्याव्
34 ^{a}) G₃ ते तु (for तत) B₈ Da transp तत सर्वे and तथे°. D₂ तथेत्युक्त्वा तु ते सर्वे — ^{b}) Ñ₁ ₂ V₁ B₅ Dn D₁ transp सह and मात्रा Ś₁ Ko ₁ परतप (Ko °प), Ñ₁.₃ m V₁ B D (except D₅) T₂ G महारथा ; Ñ₂ महाबला, Ñ₈ नरर्षभा, T₁ महायशा — ^{c}) K₃ ₄ ते नरव्याघ्रा, T₁ M₆–₈ °व्याघ्र

Colophon *Major parvan* T₂ G M सभव° (for आदि°) — *Sub-parvan* Ś₁ K Ñ₁ ₂ V₁ B D (D₄ *see m*) M₆–₈ Cd हिडिंबवध, to it Ś₁ Ko–₃ Ñ₁ D₅ M₆–₈ add समाप्त — *Adhy name* Ñ₁ ₂ V₁ T G₁ M हिडिंबवध°; G₃ हिडिंबिसवाद — *Adhy no* (figures, words or both) B₁ T₁ 150, Dn₃ 153, D₄m₁ 156, T₂ G₅ ₆ M 101, G₁.₂ 102, G₃ ₄ 100 — *S'loka no* Dn 36, M₈ 35. — *Aggregate s'loka no* Dn₂ 6030.

143

1 Before भीम° (see below), D₄ (marg *sec m*) (M om lines 3, 6) ins.

1552* वैशंपायन° ।
सा ततो न्यपतत्तूर्णं भगिनी तस्य रक्षस° ।
अब्रुवाणा हिडिम्बा तु राक्षसी पाण्डवान्प्रति ।
अभिवाद्य तत कुन्तीं धर्मराज च पाण्डवम् ।
अभिपूज्य च तान्सर्वान्भीमसेनमभापत ।
अह ते दर्शनादेव मन्मथस्य वशं गता । [5]
क्रूरं भ्रातृवचो हित्वा सा त्वामेवानुरुन्धती ।
राक्षसे रौद्रसकाशे तवापश्य विचेष्टितम् ।
अह शुश्रूषुरिच्छेयं तव गात्रं निषेवितुम् ।

[(L. 1) D₄ ततोन्वप°; M₅ ततोन्वगम° — (L 2) G₁ ₃ transp राक्ष° and पाण्डवान्प्र° D₄ पुन° (for प्रति). — (L. 4) D₄ अभिवाद्य, and उवाच ह (for अभा°) — (L 7) D₄ राक्षसी भीमसकाश — (L 8) D₄ तव पादसरोरुहं]
— Ś₁ K₁ भीमसेन ; Ko ₃ B₅ ₆ Dn₃ D₃ भीम उ°, S भीम — ^{b}) Ko Ñ₁ ₂ Da D₂ ₄ T G आस्थाय (for आश्रि°) A few MSS मोहनीं — ^{d}) Ñ₁ त वै, T₁ G₃ तस्व, T₂ G₂ ₄–₆ मा त्व, G₁ मा त्वा; M₅ त्व त Ñ₂ V₁ B D (except D₅) त्वमिम भ्रातृसंवितं Cd cites भ्रातृनिषेवितं.
2 Ś₁ K₁ ₃ S om उवाच — ^{a}) B₅ क्रुद्धोसि; T₁ G₁ भ्राहीमा, G₃ °द्धो हि — ^{b}) Ś₁ Ko ₁.₃ transp भीम and मा स्म K₂ ₄ D₅ M त्वं; T G च (for स्म) — ^{c}) K₁ (corrupt) °ह्यापिदिक; K₃ °ह्यप्य°, K₄ Ñ V₁ B (except B₃) Da Dn D₁.₂ ₄ T₂ G₁.₅.₆ °ह्यस्य°; D₅ M₈ ₅ °साम्य°; T₁ G₁ ₄ °स्तेर°, G₂ °ह्या ह्य°; M₆–₈ °ह्याप्य°. — ^{d}) K₂.₄ Ñ₁.₂ V₁ B (except B₃) D T G₅ गोपाय — After 2, B₅ ins

1553* शरणागतगुप्त्या त्वं धर्मं गोपाय पाण्डव ।,
the posterior half repeating 2^{cd}.

१४३

भीम उवाच ।
स्मरन्ति वैरं रक्षांसि मायामाश्रित्य मोहिनीम् ।
हिडिम्बे व्रज पन्थानं त्वं वै भ्रातृनिषेवितम् ॥ १

युधिष्ठिर उवाच ।
क्रुद्धोऽपि पुरुषव्याघ्र भीम मा स्म स्त्रियं वधीः ।
शरीरगुप्त्याभ्यधिकं धर्मं गोपय पाण्डव ॥ २
वधाभिप्रायमायान्तमवधीस्त्वं महाबलम् ।
रक्षसस्तस्य भगिनी किं नः क्रुद्धा करिष्यति ॥ ३

वैशंपायन उवाच ।
हिडिम्बा तु ततः कुन्तीमभिवाद्य कृताञ्जलिः ।
युधिष्ठिरं च कौन्तेयमिदं वचनमब्रवीत् ॥ ४
आर्ये जानासि यद्दुःखमिह स्त्रीणामनङ्गजम् ।
तदिदं मामनुप्राप्तं भीमसेनकृतं शुभे ॥ ५
सोढं तत्परमं दुःखं मया कालप्रतीक्षया ।
सोऽयमभ्यागतः कालो भविता मे सुखाय वै ॥ ६
मया ह्युत्सृज्य सुहृदः स्वधर्मं स्वजनं तथा ।
वृतोऽयं पुरुषव्याघ्रस्तव पुत्रः पतिः शुभे ॥ ७
वरेणापि तथानेन त्वया चापि यशस्विनि ।
तथा ब्रुवन्ती हि तदा प्रत्याख्याता क्रियां प्रति ॥ ८
त्वं मां मूढेति वा मत्वा भक्ता वानुगतेति वा ।
भर्त्रानेन महाभागे संयोजय सुतेन ते ॥ ९
तमुपादाय गच्छेयं यथेष्टं देवरूपिणम् ।

पुनश्चैवागमिष्यामि विश्रम्भं कुरु मे शुभे ॥ १०
अहं हि मनसा ध्याता सर्वान्नेष्यामि वः सदा ।
वृजिने तारयिष्यामि दुर्गेषु च नरर्षभान् ॥ ११
पृष्ठेन वो वहिष्यामि शीघ्रां गतिमभीप्सतः ।
यूयं प्रसादं कुरुत भीमसेनो भजेत माम् ॥ १२
आपदस्तरणे प्राणान्धारयेद्येन येन हि ।
सर्वमादृत्य कर्तव्यं तद्धर्ममनुवर्तता ॥ १३
आपत्सु यो धारयति धर्मं धर्मविदुत्तमः ।
व्यसनं ह्येव धर्मस्य धर्मिणामापदुच्यते ॥ १४
पुण्यं प्राणान्धारयति पुण्यं प्राणदमुच्यते ।
येन येनाचरेद्धर्मं तस्मिन्गर्हा न विद्यते ॥ १५

युधिष्ठिर उवाच ।

एवमेतद्यथात्थ त्वं हिडिम्बे नात्र संशयः ।
स्थातव्यं तु त्वया धर्मे यथा ब्रूयां सुमध्यमे ॥ १६
स्नातं कृताह्निकं भद्रे कृतकौतुकमङ्गलम् ।
भीमसेनं भजेथास्त्वं प्रागस्तगमनाद्रवेः ॥ १७

C 1 6058
B 1 155. 17
K. 1 167 33

text — T G ins after 10 Ms (om lines 1-4, 8-9), after 1554* (of v 1. 8^{ab})

1556* अह हि समये लिप्से प्राग्भ्रातुरपवर्जनात् ।
तत सोऽप्यपतद्राग्नौ भीमसेनजिघांसया ।
यथा यथा विक्रमते यथा रमति तिष्ठति ।
तथा तथा समाधाय पाण्डव काममोहिता ।
न यातुधान्यह स्वार्ये न चास्मि रजनीचरी । [5]
ईशा रक्ष सु साध्व्यस्मि राज्ञी सालकटङ्कटी ।
पुत्रेण तव सयुक्ता युवतिर्देववर्णिनी ।
सर्वान्वोऽहमुपस्थास्ये पुरस्कृत्य वृकोदरम् ।
अप्रमत्ता प्रमत्तेषु शुश्रूषुरनहंवदा ।

[(L. 1) T1 अह समुपलक्ष्यैव, G4 5 °ह समुपलब्ध्वैव, G6 °ह समुपलप्स्ये प्राक् G6 मद्- (for प्राक्) G2 श्रोतुम् (for भ्रातुर्) G4 6 उपवर्जे° — (L. 3) T1 यथारिमधितिष्ठ°; G1.2 तथारिमधुति°; G3 यथारिमयि ति° — (L. 4) T2 G3-5 समादाय, G6 समाधावत् — (L 5) G1 भद्रे (for स्वार्ये) — (L 6) T2 G4 5 कन्या, G3 तथा, G6 ईशे (for ईशा) T1 रक्ष·स्वसा ह्यस्मि, G6 रक्ष स्वाहमस्मि, M3 रक्ष सुता यास्मि (for रक्ष सु साध्व्यस्मि) G1 2 M3 राज्ञि; G3 राज्ञ T2 G3 6 °कटकटा; G1 °कटकरी — (L. 7) T1 युवती देवरूपिणी — (L. 9) T1 असह, G3 अभव (for अनहं-) T1 G3 6 सदा (for वदा)

11 G1 om 11^{ab}, T G2-6 read it after 1555* (of v. 1 8) — ^{ab}) Ñ3 पथि (for सदा) S (G1 om) ध्यात्वा सर्वं वेत्स्यामि सर्वदा — ^{c}) Ś1 K (except K0) विपिने, Ñ1 2 V1 B Da Dn D1 2 4 वृजिनात्तु; D5 G3 विजने, T2 G6 वृजिन, M विषमे T2 G3 6 कारयिष्यामि — ^{d}) K3 दुर्गेषि; T G दासीवच् Ś1 °र्षभ, K1 G6 °र्षभं; Ñ3 T2 G3 4 °र्षभा Ñ1 दुर्गेषु भरतर्षभान्, Ñ2 V1 B D (except D5) °षु विषमेषु च

12 ^{a}) G2 वा; G3 च, G5 अपि (for वो) Ñ B Da D2 4 T G Nilp प्रव(Ñ3 T1 G1 °वे)क्ष्यामि; M6-8 हनि° — ^{b}) Ś1 K1 Ñ1 2 V1 D5 शीघ्र Ś1 K1.3 B5 D5 °प्सतां, K4 Ñ1.3 B5m °प्सितां T G2-6 क्षणेन गति(T1 °त)मीप्स(G2 6 °प्सि)ता (T1 °त); G1 M विमान सुकृती(G1 M5 °ता)निव — After 12^{ab}, T G read 8^{cd}, followed by 1555* (of v 1 8) — After 12, D5 reads 8^{cd}, followed by

1557* उवाच सा तदा कुन्ती हिडिम्बा नाम राक्षसीम् ।

13 Before 13, Ś1 ins कुती, K0 D5 कुती उ°, K1 3 4 कुत्युवाच — ^{a}) K1 2 M3 (inf lin as in text) °स्तारणे, T G आपत्स्विस्त°. — ^{b}) K (except K1) Ñ1 3 येन ह; Ñ2 V1 B D T1 तेन वा (D4 केन वा; D5 केन ह), T2 G M केनचित् — ^{c}) B3 धर्मं (for सर्वं) K2 4 D4 T1 G1 2 आहृत्य, K3 V1 B3 Dn G3 4 आवृत्य, T2 G5 आपदि, G6 आपत्सु — ^{d}) Ñ1 2 V1 B3 Dn G1. 2 त धर्मम्, D1 धर्मेनम् (sic) K0 3 D5 °वर्तते, K2 4 Ñ3 °वर्तता, T1 °पश्यत; T2 G4-6 °पश्यता, G1-3 M °पश्यता

14 Before 14, K3 ins हिडबो — ^{a}) Cd धारयते G2 आपद्यो धारयेत्प्राणान् — ^{b}) D5 T G स वै (for धर्मं) — D5 om 14^{cd}

15 K4 om 15, Ś1 K1 Dn1 (hapl) om 15^{ab} — ^{a}) T G3-6 M पुण्यान् B3 धारयीत, T2 °यर्ति, G3 °यत्य, G5 °यति G1 2 पुण्याद्धा(G2 °न्धा)रयति (G2 °ती) प्राणान् — ^{b}) S पुण्य वै (G1 2 हि) प्राणधारण — ^{c}) Ñ1 3 B3 Da S येन येन (T1 G1 M3.6-8 येन केन, G3 येनार्को न) चरे°; Cd as in text — After 15, S ins a passage given in App I (No 87)

16 S1 K1 3 S om उवाच (G3 om the ref) — ^{a}) M3 5 एव (for एतद्) Ñ1 °थातत्व, T °थावृत्त — ^{c}) T1 कर्तव्य D5 च; G5 हि (for तु) Ñ2 V1 B D M सत्ये, T1 धर्मं — ^{d}) K3 T2 G4-6 ब्रूया., G1 2 ब्रूहि — After 16, S ins

1558* नित्य कृताह्निका स्नात्वा कृतशौचा सुरूपिणी ।

78

अहःसु विहरानेन यथाकामं मनोजवा ।
अयं त्वानयितव्यस्ते भीमसेनः सदा निशि ॥ १८

वैशंपायन उवाच ।

तथेति तत् प्रतिज्ञाय हिडिम्बा राक्षसी तदा ।
भीमसेनमुपादाय ऊर्ध्वमाचक्रमे ततः ॥ १९
शैलशृङ्गेषु रम्येषु देवतायतनेषु च ।
मृगपक्षिविघुष्टेषु रमणीयेषु सर्वदा ॥ २०
कृत्वा च परमं रूपं सर्वाभरणभूषिता ।
संजल्पन्ती सुमधुरं रमयामास पाण्डवम् ॥ २१
तथैव वनदुर्गेषु पुष्पितद्रुमसानुषु ।
सरःसु रमणीयेषु पद्मोत्पलयुतेषु च ॥ २२
नदीद्वीपप्रदेशेषु वैडूर्यसिकतासु च ।
सुतीर्थवनतोयासु तथा गिरिनदीषु च ॥ २३
सागरस्य प्रदेशेषु मणिहेमचितेषु च ।

पत्तनेषु च रम्येषु महाशालवनेषु च ॥ २४
देवारण्येषु पुण्येषु तथा पर्वतसानुषु ।
गुह्यकानां निवासेषु तापसायतनेषु च ॥ २५
सर्वर्तुफलपुष्पेषु मानसेषु सरःसु च ।
बिभ्रती परमं रूपं रमयामास पाण्डवम् ॥ २६
रमयन्ती तथा भीमं तत्र तत्र मनोजवा ।
प्रजज्ञे राक्षसी पुत्रं भीमसेनान्महाबलम् ॥ २७
विरूपाक्षं महावक्त्रं शङ्कुकर्णं विभीषणम् ।
भीमरूपं सुताम्रोष्ठं तीक्ष्णदंष्ट्रं महाबलम् ॥ २८
महेष्वासं महावीर्यं महासत्त्वं महाभुजम् ।
महाजवं महाकायं महामायमरिंदमम् ॥ २९
अमानुषं मानुषजं भीमवेगं महाबलम् ।
यः पिशाचानतीवान्यान्बभूवाति स मानुषान् ॥३०
बालोऽपि यौवनं प्राप्तो मानुषेषु विशां पते । C 1 6076 B 1 155 35 K 1 169 10

— ^{b}) Dn1 तापसायतनेषु (cf. 25^{d}), G1 °मयेषु, G3.6 °युतेषु — B5 om 24^{cd}, G1 reads 24^{cd} after 23^{ab}. — ^{c}) Ñ2 V1 B6 Dn D1 पल्वलेषु; M3 5 निर्झरे° — M8 om. 24^{d}–25^{a} — ^{d}) Ñ2 B1 3 Da तथैवोपवने°

25 K3 om 25, D5 G1 2 4 transp 25^{ab} and 25^{cd}, M8 om 25^{a} (cf. v l 24), T2 G3 5 read 25^{ab} after 23^{ab}. — ^{a}) Ñ1 च तथा, Ñ3 G5 M (M8 om) रम्ये° (for पुण्ये°) — Ś1 K1 2 4 transp 20^{b} and 25^{b} — ^{b}) Ñ1 पर्वतानां च सानुषु; D5 मानसेषु सरःसु च (=26^{b}), T2 G2.3 6 तापसायतनेषु च (=25^{d}) T1 om 25^{cd} — ^{c}) K0 °नां च भवनं — ^{d}) K0 पन्नगाना वनेषु च, Ñ3 देवतायतनेषु च (=20^{b}), T2 G कुलपर्वतसानुषु

26 D5 reads 26^{ab} after 23 — ^{a}) Ñ1 S °वृक्षेषु, V1 Dn D1.5 °रम्येषु — ^{b}) T G वनेषु (for सर सु) D2 सर स्वमलवारिषु, M सागरावृतभूमिषु — ^{d})=21^{d}. — After 26, D5 S ins a passage given in App I (No 89), which is followed by 1 144. 7–10, 11^{cd}–17, 19–20 (with v l and some additions noted below) and a colophon in lieu of the colophon at the end of the present adhy which S om — After the colophon, D5 S (except G3) ins

1565* वैशंपायन ।
गते भगवति व्यासे पाण्डवा विगतज्वरा ।
ऊषुस्तत्र च षण्मासान्वटवृक्षे यथासुखम् ।
शाकमूलफलाहारास्तप कुर्वन्ति पाण्डवा ।
अनुज्ञाता महाराज तत कमलपालिका ।

27 D2 om 27–28 — In S, 27^{ab} is repeated (cf. App I, No 89) — ^{a}) D5 T2 G M सदा (G3 6 तदा) (for तथा) — After 27^{ab}, D5 T G (G3 om line 5) ins

1566* दिव्याभरणवस्त्राङ्गी दिव्यस्रगनुलेपना ।
एव आदृत्स्स मासान्हिडिम्बावासयद्वने ।
पाण्डवान्भीमसेनार्थं राक्षसी कामरूपिणी ।
सुख स विहरन्भीमस्तत्काल पर्यणामयत् ।
ततोऽलभत सा गर्भं राक्षसी कामरूपिणी । [5]
अतृप्ता भीमसेनेन सप्तमासोपसंगता ।
[(L 1) G1 °वस्त्रा हि, G3 °वस्त्राणि T1 दिव्यगंधानु° — (L 4) T2 सविह°, G2 5 सुविह°. — (L. 6) T1 G3 °सो वन गता]

— ^{d}) K0 2 Ñ3 D5 T2 G (except G1 2) M (except M5) °बलात् — See further a special note at the end of adhy 145

28 D2 om 28 (cf. v l. 27) — ^{b}) K4 G4 महाबल, M5 भयावह (for विभी°) — ^{c}) V1 B D (except D5, D2 om) भीमनाद, T1 °सेनं T1 विरूपाक्ष, G2 सुताम्राक्ष. — ^{d}) K0 B1.6 Da D4 M महारव, Ñ3 T2 G °रथ, T1 °सुर — After 28, K0 reads 30^{c}–31^{b}.

29 K1 (hapl.) om. 29^{a}–30^{b} — ^{a}) K0 °महोदर (for महे°) — ^{b}) K4 M5–8 °बल, T G M8 °जव (for °भुजम्) — ^{c}) T G °काय, M8 °बल (for °जव) S (except M5) °काल (for °काय) — ^{d}) K4 भीमरूपम्, T1 महानाद, G2 M °काय (M5 °काल), G6 °पाद K0 महोदय; S महाभुज (for अरिंदमम्) — Ñ3 B D ins after 29 K4, after 30^{ab}

1567* दीर्घघोण महोरस्क विकटोद्बद्धपिण्डिकम् ।
[D2 4 दीर्घघ्राण K4 D1 2 °पिंडक]

30 K1 om 30^{ab} (cf v l 29) — ^{b}) S अरिंदम (for महा°) — After 30^{ab}, K4 ins 1567* — G6 om 30^{cd}, K0 reads it after 28 — ^{c}) Ś1 K0 2 Ñ2 V1 B3 Dn D1 5 G1 4 °तीत्यान्यान्, K1 °तीता°, K4 °तीत्य° K3 महारथानतीत्यान्यान् — ^{d}) Ś1 K1 यो बभूवाति, K0 2–4 B1 3m M °वाति च, Ñ V1 B3 5 6 D °वातीव Ñ2 V1 B D राक्षसान् (for मानु°)

31 For K0, cf. v l. 28 — ^{a}) M3 5–7 बाल्येपि K3 यो बल, T G विक्रम (for यौवन) M8 बाल्ये वीर्यं बल प्रा° — ^{b}) M विशेषत (for विशा पते) — ^{c}) Ñ3 (m as in text) सर्वांगेषु G3 वरो (for पर). — ^{d}) G1–3

[illegible] परं वीरं प्रकाममभवत्तदा ॥ ३१
सद्यो हि गर्भं राक्षस्यो लभन्ते प्रसवन्ति च ।
कामरूपधराश्चैव भवन्ति बहुरूपिणः ॥ ३२
प्रणम्य विकचः पादावगृह्णात्स पितुस्तदा ।
मातुश्च परमेष्वासस्तौ च नामास्य चक्रतुः ॥ ३३
घटभासोत्कच इति मातरं सोऽभ्यभाषत ।
अब्रवीत्तेन नामास्य घटोत्कच इति स्म ह ॥ ३४
अनुरक्तश्च तानासीत्पाण्डवान्स घटोत्कचः ।
तेषां च दयितो नित्यमात्मभूतो बभूव सः ॥ ३५
संवाससमयो जीर्ण इत्यभाषत तं ततः ।

हिडिम्बा समयं कृत्वा स्वां गतिं प्रत्यपद्यत ॥ ३६
कृत्यकाल उपस्थास्ये पितॄनिति घटोत्कचः ।
आमन्त्र्य राक्षसश्रेष्ठः प्रतस्थे चोत्तरां दिशम् ॥ ३७
स हि सृष्टो मघवता शक्तिहेतोर्महात्मना ।
कर्णस्याप्रतिवीर्यस्य विनाशाय महात्मनः ॥ ३८

इति श्रीमहाभारते आदिपर्वणि त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥

१४४

वैशंपायन उवाच ।
ते वनेन वनं वीरा घ्नन्तो मृगगणान्बहून् ।
अपक्रम्य ययू राजंस्त्वरमाणा महारथाः ॥ १
मत्स्यांस्त्रिगर्तान्पाञ्चालान्कीचकानन्तरेण च ।
रमणीयान्वनोद्देशान्प्रेक्षमाणाः सरांसि च ॥ २
जटाः कृत्वात्मनः सर्वे वल्कलाजिनवाससः ।
सह कुन्त्या महात्मानो बिभ्रतस्तापसं वपुः ॥ ३
क्वचिद्वहन्तो जननीं त्वरमाणा महारथाः ।
क्वचिच्छन्देन गच्छन्तस्ते जग्मुः प्रसभं पुनः ॥ ४
ब्राह्मं वेदमधीयाना वेदाङ्गानि च सर्वशः । C. 1 6087 B. 1 156 5 K. 1 170 3

पूजितास्तेन वन्येन तमामन्त्र्य महामुनिम् ।
[(L 1) T1 G1 2 ते (for तु) — (L 2) M3 5 वाक्येन M आमन्त्र्य च (for तमा°) M5 महाव्रतं]
37 S reads 37–38 after 1569* (of v l 35) — After 37ª, G1 2 4 ins
1572* भवत्स्मरणमात्रत ।
महत्कृच्छ्रे वने दुर्गे
— ᵉ) Ś1 K0 3 D5 T G M3 5 राक्षस (as in text), the rest रक्षसां — ᵈ) Ñ3 ह, G2 स (for च) K1 गतिं (for दिश)
38 ª) B5 G1 दृष्टो Ś1 T G भगवता — ᵇ) M महाबल — ᵉ) K2 G1 °वीरस्य, Cd as in text — ᵈ) Ñ2 V1 B D प्रतियोद्धा महारथ (D5 °स्मन) Cd cites विनाशाय (as in text)

Colophon om in S (of v l 26 above) — *Sub-parvan* K0 हैडयं, Ñ V1 हिडिंबवध, to it K0 Ñ1 3 add समास — *Adhy name* Ś1 K1–4 Ñ1 2 V1 B D घटोत्कचोत्पत्ति — *Adhy no* (figures, words or both) B1 151, Dn3 154, D4m 157 — *S'loka no* Dn1 42, Dn2 45, Dn3 46

144

1 Ś1 K1. 3 D2 om उवाच, S om the ref — The sequence in S is 3, 5, 1575*, 1–2, 4, 1574*, 6 etc (but of v l 7 also) — ª) V1 Dn D2 4 S गत्वा (for वीरा) Ñ2 D5 ते वने व्यचरन्वी°, D1 ते च सर्वे वने गत्वा — ᵇ) Ś1 K1 ततो; Cd घ्नन्तो (as in text) — ᶜ) K2 पराक्रम्य, T G अति°. T1 महाराज (for ययू राजन्) — ᵈ) K4 महाबला. — K2 (hapl) om from महारथा° upto प्रेक्षमाणा° (in 2ᵃ).

2 K3 om up to °माणाः (of. v l 1) — ᵇ) T2 G3–6 °काना वनानि च, G1. 2 °कान्यवनांस्तथा — ᵈ) A few MSS प्रेक्ष्य°.

3 For sequence in S of v l. 1 — ª) K2–4 D5 जटा, D1 M6–8 जटा — ᶜ) T G transp सह and कुन्त्या

4 For S, of v l 1 — ᵇ) Ñ1 3 G2 रममाणा — After 4ᵃᵇ, G1 ins
1573* नित्यकर्म प्रकुर्वन्तो वन्यमूलफलाशना ।
— ᵉ) T G3 4. 6 छन्नेन, G2 5 शनैश्च, Cd as in text K (except K3) D5 वर्तंतस् (D5 °ते) — ᵈ) S (except T1 G3 8) °ग्मु पृथया सह — After 4, S ins
1574* पथि द्वैपायनं सर्वे ददृशुः स्वं पितामहम् ।
5 For S, of v l 1 — ª) K (except K1) ब्राह्म्यं, D2 T1 M5 ब्रह्म; Cd as in text. Ñ1 अधीयतो — ᵇ) T1 तपश्चरणतत्परा — ᶜᵈ) Ñ2 धर्मज्ञ; V1 Dn सर्वज्ञा, M (except M5) धर्मांश्च B5 transp धर्मज्ञा and ददृशु T1 न्यायज्ञानां; T2 G4 धर्मज्ञानां, G1. 2 न्यायज्ञान, G3 न्यायशास्त्र, G5 6 धर्मज्ञान, M न्यायज्ञान (for ददृशुस्ते) S च पाण्डवा (for पिता°) — After 5, S ins
1575* शालिहोत्रप्रसादेन लब्ध्वा प्रीतिमवाप्य च ।
[T2 G1–6 प्रीतिमनुत्तम]
6 D5 om 6 — ᵃᵇᶜ) S अभिप्रणम्य शिरसा पाराशर्य मुपेत्य च । ते पादौ जगृहुस्तस्य — S transp सह and मात्रा in 6ᵈ, and, after 6, ins

[illegible]र्थं च धर्मेण ददृशुस्ते पितामहम् ॥ ५
तेऽभिवाद्य महात्मानं कृष्णद्वैपायनं तदा ।
तस्थुः प्राञ्जलयः सर्वे सह मात्रा परंतपाः ॥ ६

व्यास उवाच ।

मयेदं मनसा पूर्वं विदितं भरतर्षभाः ।
यथा स्थितैरधर्मेण धार्तराष्ट्रैर्विवासिताः ॥ ७
तद्विदित्वास्मि संप्राप्तश्चिकीर्षुः परमं हितम् ।
न विषादोऽत्र कर्तव्यः सर्वमेतत्सुखाय वः ॥ ८
समास्ते चैव मे सर्वे यूयं चैव न संशयः ।
दीनतो बालतश्चैव स्नेहं कुर्वन्ति बान्धवाः ॥ ९
तस्मादभ्यधिकः स्नेहो युष्मासु मम सांप्रतम् ।
स्नेहपूर्वं चिकीर्षामि हितं वस्तन्निबोधत ॥ १०
इदं नगरमभ्याशे रमणीयं निरामयम् ।
वसतेह प्रतिच्छन्ना ममागमनकाङ्क्षिणः ॥ ११

वैशंपायन उवाच ।

एवं स तान्समाश्वास्य व्यासः पार्थानरिंदमान् ।
एकचक्रामभिगतः कुन्तीमाश्वासयत्प्रभुः ॥ १२
जीव पुत्रि सुतस्तेऽयं धर्मपुत्रो युधिष्ठिरः ।

पृथिव्यां पार्थिवान्सर्वान्प्रशासिष्यति धर्मराट् ॥ १३
धर्मेण जित्वा पृथिवीमखिलां धर्मविद्वशी ।
भीमसेनार्जुनबलाद्भोक्ष्यत्ययमसंशयः ॥ १४
पुत्रास्तव च माद्र्याश्च सर्व एव महारथाः ।
स्वराष्ट्रे विहरिष्यन्ति सुखं सुमनसस्तदा ॥ १५
यक्ष्यन्ति च नरव्याघ्रा विजित्य पृथिवीमिमाम् ।
राजसूयाश्वमेधाद्यैः क्रतुभिर्भूरिदक्षिणैः ॥ १६
अनुगृह्य सुहृद्वर्गं धनेन च सुखेन च ।
पितृपैतामहं राज्यमिह भोक्ष्यन्ति ते सुताः ॥ १७
एवमुक्त्वा निवेश्यैनान्ब्राह्मणस्य निवेशने ।
अब्रवीत्पार्थिवश्रेष्ठमृषिर्द्वैपायनस्तदा ॥ १८
इह मां संप्रतीक्षध्वमागमिष्याम्यहं पुनः ।
देशकालौ विदित्वैव वेत्स्यध्वं परमां मुदम् ॥ १९
स तैः प्राञ्जलिभिः सर्वैस्तथेत्युक्तो नराधिप ।
जगाम भगवान्व्यासो यथाकाममृषिः प्रभुः ॥ २० C. 1 6102 B. 1 156. 19 K. 1 170 14

इति श्रीमहाभारते आदिपर्वणि चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥

कुर्याश्च केवलं धर्मं दुष्कृतं च तथा नरः ।
सुकृतं दुष्कृतं लोके न कर्ता नास्ति शोभने ।
अवश्य लभते कर्ता फलं वै पुण्यपापयोः ।
दुष्कृतस्य फलेनैव प्राप्तं व्यसनमुत्तमम् ।
तस्मान्माधवि मानार्हे मा च शोके मनः कृथाः । [5]

[M om व्यास· — (L 1) M8.5 केवलं कुरुते धर्मं, M6–8 केवलं धर्मं कुरुते M न (for च) T1 G8 तदा न°; G6 नराधम — (L 2) G1 सततं (for सुकृ°) — (L 3) M कृती (for कर्ता) — (L 5) G8 मा शुच, M8 5 मानवि] — Thereafter S reads 18^{ab}

13 For D5 S cf. v 1 7 — M8 5–7 om 13–17 — Before 13, Ś1 K1 ins व्यास ; K0 2–4 Ñ2 3 V1 B (except B3) D (except D5) व्यास उ°. — ^{a}) V1 Dn D2 जीवत्· Ś1 K1.2 4 वत्से, K3 D5 S (M8.5–7 om) पुत्रे — ^{b}) K3 4 Ñ V1 B D (except D1 5) G1.2 M8 धर्मनित्यो — Ñ1 2 V1 B D (except Da2 D5) transp 13^{cd} and 14^{ab}

14 For D5 S (M8 5–7 om) cf. v 1. 7 — ^{ab}) Ñ2 V1 B D (except D5) transp जित्वा and पृथिवीं, and (for 14^{b}) read महात्मा पुरुषर्षभ — After 14^{ab}, Ñ2 V1 B Da Dn D1 2.4 ins

1583* पृथिवीमखिलां जित्वा सर्वां सागरमेखलाम् ।,

while D5 T2 G (except G1 2) ins

1584* स्थापयित्वा वशे सर्वां सपर्वतवनां शुभाम् ।

— ^{d}) D5 T1 M8 असंशय Ś1 K1 N1 3 भोक्ष्यतेयमसंशय (Ñ1 °य), K0 2–4 Ñ2 V1 B Da Dn D1 2 4 °ते नात्र (K3 °स्रेष न) संशय

15 For D5 S (M8 5–7 om) cf. v 1 7 — ^{a}) G5 कुन्त्या. (for पुत्रा); cf. 1 145 2^{b}. — ^{b}) K0 2 4 Ñ B D2 M8 महाबला D5 T G पञ्चैते पुरुषोत्तमा — ^{c}) K4 D1 स्वे (for स्व) — ^{d}) K0 2 4 Ñ V1 B D T2 G4 5 सदा

16 For D5 S (M8 5–7 om) cf. v 1. 7. — ^{a}) K1 यक्ष्यते, K4 जेष्यति Ñ1 च महाभागा — ^{b}) Ñ3 V1 B5 6 D (except D2.5) निर्जित्य — ^{d}) Ñ2 B1 3 बहुभिश्च. Ñ3 B Da D3 4 चाप्तदक्षि°.

17 For D5 S (M8 5–7 om) cf. v 1 7 — ^{a}) Ñ1 2 °द्वर्गान्; G4 5 °द्वर्गं — ^{b}) Ñ1 बले° (for धने°) G3.6 बले° (for सुखे°) Ñ2 3 V1 B D (except D5) भोगैश्वर्य सुखे° — ^{d}) Ś1 K Ñ V1 Da Dn1.n2 D1.2 इमे (K3 इदं, Ñ1 3 इमं). D5 T G M8 आहरिष्यति (for इह भो°) — After 17, Ś1 ins (an additional) colophon — D5 T G (G3 om lines 2–3) M8 ins after 17 M8 5–7, after 1580* (of v 1 10)

1585* रूपा कमलपत्राक्षी नाम्ना कमलपालिका ।
वशवर्तिनी तु भीमस्य पुत्रमेषा जनिष्यति ।
तेन पुत्रेण कृच्छ्रेषु भविष्यथ च तारिता ।

which in S is followed by 19–20 (partly om in some MSS, see below)

18 S (which om 18^{cd}) read 18^{ab} after 1582* (of v 1 12) — Before 18, S1 K1 3 D2 ins वैश°; K0 2 4 Ñ2 3 (marg *sec m*) B D (except D5) वैश° उ° — After 18^{ab}, G1.2 M read 20^{cd}, repeating it in its proper place — D5 S om 18^{cd} — ^{c}) K0 2 Ñ1 2 °श्रेष्ठान्, K3 पाण्डव ज्येष्ठ, Ñ3 V1 B (except B5) D (D5 om) पाण्डवश्रे°

19 S (G3 M8 5–7 om.) reads 19 after 1585* (of v 1 17) — Before 19, K3 ins श्रीव्यास — ^{a}) Ś1 K1 2.4 Ñ V1 B (except B5) Dn D5 T G (G3 om) M8 इह मास (*or* मा स) प्र° — ^{c}) Ś1 K1 °काल K0 B Da2 D1 2 4 °स्त्वैव — ^{d}) S1 K1 वत्स्य°, Ñ3 V1 B Da Dn D3 4 लप्स्य°; D1 लिप्ससे, T2 G2 4 5 °ध्वे. Ś1 K0 1 Ñ1 G2 M8 वै परा (for परमां) K4 लप्स्यथैव दुरासद

१४५

जनमेजय उवाच।

एकचक्रां गतास्ते तु कुन्तीपुत्रा महारथाः।
अतः परं द्विजश्रेष्ठ किमकुर्वत पाण्डवाः॥ १

वैशंपायन उवाच।

एकचक्रां गतास्ते तु कुन्तीपुत्रा महारथाः।
ऊषुर्नातिचिरं कालं ब्राह्मणस्य निवेशने॥ २
रमणीयानि पश्यन्तो वनानि विविधानि च।
पार्थिवानपि चोद्देशान्सरितश्च सरांसि च॥ ३
चेरुर्भैक्षं तदा ते तु सर्व एव विशां पते।
बभूवुर्नागराणां च स्वैर्गुणैः प्रियदर्शनाः॥ ४

निवेदयन्ति स च ते भैक्षं कुन्त्याः सदा निशि ।
तया विभक्तान्भागांस्ते भुञ्जते स्म पृथक्पृथक् ॥ ५
अर्धं ते भुञ्जते वीराः सह मात्रा परंतपाः ।
अर्धं भैक्षस्य सर्वस्य भीमो भुङ्क्ते महाबलः ॥ ६
तथा तु तेषां वसतां तत्र राजन्महात्मनाम् ।
अतिचक्राम सुमहान्कालोऽथ भरतर्षभ ॥ ७

C 1. 6109
B 1. 157 7
K. 1 171 17

जटिला ब्रह्मचारिण = (var.) line 2 of 1586*. — After 4ab, S (except G1.2) ins

1586* युधिष्ठिरं च कुन्तीं च चिन्तयन्त उपासते ।
भैक्षं चरन्तस्तु सदा जटिला ब्रह्मचारिण ।

[(L 1) M6-8 इवासते — (L 2) T G6 M तदा (for सदा)]

— c) M3 5 स्वैर्गुणैः (for बभूवु) T G4-6 ते, G3 तु (for च) — d) K1 B1 6 D2 G6 स्वगुणै°; T1 G2 3 गुणैः. सु- (G3 स-), G1 गुणैर्वै; M3 5 बभूवु K3 अतिवल्लभा.. — After 4, S (T2 om. lines 6–7) ins

1587* नागरा ।
दर्शनीया द्विजा शुद्धा देवगर्भोपमा शुभा ।
भैक्षार्हा न च राज्यार्हा सुकुमारास्तपस्विन ।
सर्वलक्षणसपन्ना भैक्षं नार्हन्ति नित्यश ।
कार्यार्थिनश्चरन्तीति तर्कयन्त इति ब्रुवन् ।
बन्धूनामागमाश्चित्यमुपचिन्त्य तु नागरा । [5]
भोजनानि च पूर्णानि भक्ष्यभोज्यैरकारयन् ।
मौनव्रतेन सयुक्ता भैक्षं गृह्णन्ति पाण्डवा. ।
माता चिरगतान्दृष्ट्वा शोचन्तीति च पाण्डवा ।
त्वरमाणा निवर्तन्ते मातृगौरवयन्त्रिता. ।

[(L 1) G2 प्रिया शुद्धा महात्मानो (for the prior half) — (L. 2) G2 (prior half corrupt) चरति द्विजवेश्मसु (for posterior half) — After line 2, G2 4 ins

1588* नैते यथार्थतो विप्रा सुकुमारास्तपस्विन ।
चरन्ति भूमौ प्रच्छन्ना कस्माच्चित्कारणादिह ।

— (L 3) G1.2 वेपत (for नित्यश) — (L 4) G1.2 तर्कयत सुरा इति — (L 5) G2 साधूनामागमाश्चित्यं मुदितास्ते तु नागरा — (L 6) T1 G6 M भाजनानि — (L. 8) G1 2.4 शोचती पांडवान्प्रति; M शोचतीति च पार्थिव — After line 8, T1 G2 4–6 ins

1589* दु खाश्रुपूर्णनयना लिखन्त्यास्ते महीतलम् ।
भिक्षित्वा द्विजगेहेषु चिन्तयन्तश्च मातरम् ।

— (L 9) M पांडवा दु खिता भृश (for posterior half)]

5 a) Ñ2 V1 B D (except D5) T1 G3 M5 तदा, T2 G4-6 M3.6-8 सदा (for च ते) G1 2 मात्रे निवेदयति सा. — b) Some MSS भैक्ष्यं K0 Ñ1 D5 कुत्या भिक्षां, K1 भक्ष्यं कुत्या; Ñ2 3 V1 Da Dn D1 4 कुंत्या भैक्ष; B कुत्यां भैक्ष; D2 T1 G1-3 कुत्यै भै(D2 भ)क्ष्य, T2 G4-6 M भैक्ष कुंत्यै B5 तया निशि, D2 4 (before corr) M तदा निशि, T G3-6 च ते निशि, G1.2 दिवानिशं — After 5ab, G2 ins

1590* सर्वसपूर्णभैक्षान्नं मात्रा दत्त पृथक्पृथक् ।

— cd) Ñ1 B5 तदा, G4 तथा (for तया). K2 ते भागान्; K4 ते भाग, T2 G4 5 भैक्षाश्च; G6 M भिक्षाशान् (for भागांस्ते) Ś1 K1 3 G3 तया विभक्तभागांश्च (G3 °स्ते). G1 2 विभज्य भुंजतेष्टं ते यथाभागं पृ°.

6 ab) G3 आदौ (for अर्धं) T1 G3 स्म (for ते), and पंच (for वीरा.) G1 2 युधिष्ठिरार्जुनौ कुंती यमावर्धं च भुंजते — cd) Ś1 K1 G3 भक्षस्य सर्वस्य, K3 Ñ2 V1 B1 6 Dn1 n2 D1 G1.2 6 M6-8 सर्वस्य भैक्षस्य; T2 G4 5 अन्नस्य सततं. G4 भुक्ते भीमो (by transp) T2 G4-6 महाभुज K0 अर्धं तु भीमसेनश्च एक एव महा°. — After 6, S (T2 G5.6 om line 1) ins

1591* न चाशितोऽसौ भवति कल्याणाघस्मृतः पुरा ।
स वैवर्ण्यं च कार्श्यं च जगामातृप्तिकारितम् ।

[(L. 1) T1 न चापि तृप्तिर्, G1 न चाशितस्य; G2 °तं च, G3 4 °तोक्षि — After line 1, M6-8 ins 1593* (cf. v. 1 7). — After line 2, G2 4 ins

1592* आज्यबिन्दुर्यथा वह्नौ महति ज्वलिते यथा ।
तथार्धभागं भीमस्य भिक्षान्नस्य नृपोत्तम ।]

7 D2 om 7 — a) K0 4 M वसता तेषां (by transp.), K1 तेषा भवतां D5 तथा तेषा तु वसतां, T G तथैव वसतां तत्र (T G5 6 तेषां) — b) K3 नगरेषु, Ñ2 V1 B Da Dn D1.4 तस्मिन्राष्ट्रे, Ñ3 तत्र राष्ट्रे; T G (except G4 5) तेषां (T2 G6 ततो) राजन् — Dn1 om. 7c–8d — d) Ś1 K1 2 D5 वै; K0 च; Ñ3 हि (for ऽथ) K4 कालो भरतसत्तम — T2 G ins. after 7 M6-8, after line 1 of 1591*

1593* भीमोऽपि क्रीडयित्वा तु मिथो ब्राह्मणबन्धुषु ।
कुम्भकारेण सबन्धं लेभे पात्रं बृहत्तदा ।
स ददाति महत्पात्रं भीमाय प्रहसन्निव ।
तस्माद्भुतं कर्म कृत्वा महन्मृद्भारमाददे ।
तस्य भार शतगुण कुम्भकारमतोषयत् । [5]
चक्रे चक्रे च मृद्भाण्डान्सतत भैक्षमाहरन् ।
तदादाय गत दृष्ट्वा हसन्ति प्रहसन्ति च ।
भक्ष्यभोज्यानि विविधान्यादाय प्रक्षिपन्ति च ।
एवमेष सदा भुक्त्वा मात्रे वदति वै रह ।

79

ततः कदाचिद्भैक्षाय गतास्ते भरतर्षभाः ।
संगत्या भीमसेनस्तु तत्रास्ते पृथया सह ॥ ८
अथार्तिजं महाशब्दं ब्राह्मणस्य निवेशने ।
भृशमुत्पतितं घोरं कुन्ती शुश्राव भारत ॥ ९
रोरूयमाणांस्तान्सर्वान्परिदेवयतश्च सा ।
कारुण्यात्साधुभावाच्च देवी राजन्न चक्षमे ॥ १०
मथ्यमानेव दुःखेन हृदयेन पृथा ततः ।
उवाच भीमं कल्याणी कृपान्वितमिदं वचः ॥ ११
वसामः सुसुखं पुत्र ब्राह्मणस्य निवेशने ।
अज्ञाता धार्तराष्ट्राणां सत्कृता वीतमन्यवः ॥ १२
सा चिन्तये सदा पुत्र ब्राह्मणस्यास्य किं न्वहम् ।
प्रियं कुर्यामिति गृहे यत्कुर्युरुषिताः सुखम् ॥ १३
एतावान्पुरुषस्तात कृतं यस्मिन्न नश्यति ।
यावच्च कुर्यादन्योऽस्य कुर्यादभ्यधिकं ततः ॥ १४
तदिदं ब्राह्मणस्यास्य दुःखमापतितं ध्रुवम् ।
तत्रास्य यदि साहाय्यं कुर्याम सुकृतं भवेत् ॥ १५

भीम उवाच ।

ज्ञायतामस्य यद्दुःखं यतश्चैव समुत्थितम् ।

विदिते व्यवसिष्यामि यद्यपि स्यात्सुदुष्करम् ॥ १६
वैशंपायन उवाच ।
तथा हि कथयन्तौ तौ भूयः शुश्रुवतुः स्वनम् ।
आर्तिजं तस्य विप्रस्य सभार्यस्य विशां पते ॥ १७
अन्तःपुरं ततस्तस्य ब्राह्मणस्य महात्मनः ।
विवेश कुन्ती त्वरिता बद्धवत्सेव सौरभी ॥ १८
ततस्तं ब्राह्मणं तत्र भार्यया च सुतेन च ।
दुहित्रा चैव सहितं ददर्श विकृताननम् ॥ १९
ब्राह्मण उवाच ।
धिगिदं जीवितं लोकेऽनलसारमनर्थकम् ।
दुःखमूलं पराधीनं भृशमप्रियभागि च ॥ २०
जीविते परमं दुःखं जीविते परमो ज्वरः ।
जीविते वर्तमानस्य द्वन्द्वानामागमो ध्रुवः ॥ २१
एकात्मापि हि धर्मार्थौ कामं च न निषेवते ।
एतैश्च विप्रयोगोऽपि दुःखं परमकं मतम् ॥ २२
आहुः केचित्परं मोक्षं स च नास्ति कथंचन ।
अर्थप्राप्तौ च नरकः कृत्स्न एवोपपद्यते ॥ २३
अर्थेप्सुता परं दुःखमर्थप्राप्तौ ततोऽधिकम् ।
जातस्नेहस्य चार्थेषु विप्रयोगे महत्तरम् ॥ २४
न हि योगं प्रपश्यामि येन मुच्येयमापदः ।
पुत्रदारेण वा सार्धं प्राद्रवेयमनामयम् ॥ २५
यतितं वै मया पूर्वं यथा त्वं वेत्थ ब्राह्मणि ।

C. 1. 6123
B. 1. 157. 03
K. 1. 171. 43

---

18 ^{a}) B8 D1 अभ्यतरं, T G1.2.4-6 M अतर्गृहं K8 आर्तो गृहं तस्य ततो; G3 अंतर्नेविगतास्तस्य — ^{c}) Ś1 K2.4 D4 कुती सहसा, Ñ1.2 V1 B Da Dn D1.2.4 M3 (by transp.) त्वरिता कुती. — ^{d}) G5 M6-8 सौरभिः; Cd as in text.

19 ^{a}) G1-3 भीत त (for ततस्तं) — ^{c}) K3 T1 G1.2 M7 सततं, G3.5 वसत (for सहि°) — ^{d}) K2 विवृतानन, K3 विगतप्रभं, Ñ1.3 B5 विगता°, Ñ2 V1 B6 Dn D1 अवनता°, T2 G4-6 M विनता°; Cd as in text.

20 K1.3 S (except M3) om उवाच — ^{a}) M5 लोल (for लोके) — ^{b}) Ś1 K4 नन्वसारम्, Ko साल्प°; K1.3 Ñ3 V1 Dn D1.2-5 गत°, K2 स्वल्प°; Ñ1 G1.2 नर°; B3 m द्वंद्व°, B5 न च सारम् (m as in text), D4 नष्ट°, G3 नांत°, M6-8 न तु सारम्, Cd (corrupt) लहसारम्(?) — ^{d}) G5 M6-8 प्रियम् (for भृशम्) D2 G4-6 M5 °भावि च

21 ^{ab}) Ś1 K1 D2 जीवित (both times) — ^{d}) Ko V1 Dn D1.2.5 दु खानाम्; Cd द्वन्द्वानाम् (as in text) Da Dn3 D2 G (except G4.6) ध्रुवं

22 ^{a}) Ñ2 V1 B1 m 3.5.6 D (except D5) आत्मा ह्येको हि; B1 एकात्मा चैव, T G एकात्मना हि (G3 च); M एकात्मा यो (M6-8 या) हि K1.2.4 धर्मार्थो (K2 °र्थां); G3 धर्मादौ, G4 कामार्थौ Cd cites (as in text) एकात्मा (=एकाकी) — ^{b}) T2 G5.6 काम ; G4 धर्म° (for कामं). Ś1 K1.3 यश्च, K2 V1 Dn D1.2 चैव; B3 T1 M5 च स; B5 Da D4 न च (for च न) Ñ3 निवेश्यते; T2 G4-6 निषेव्यते. — ^{c}) Ko विप्रयोगोस्य, K3 °योगश्च, K3 °योगेस्य; K4 °योगैश्च, Dn3 D1.4 T2 G3.5.6 °योगेपि; D5 °युक्तस्य, T1 °योगो हि — ^{d}) Ko 3.4 भवेत्, Ñ2 G1.2 महत् (for मतम्) Ñ1.3 परमसमतं, Dn परमनतकं, D1.2 परमिक मत

23 ^{a}) M3 केचिद्प्राहु (for आहु केचित्) — ^{c}) Ñ1.2 V1 B Da Dn D1.2 तु (for च) S (M3 *inf lin*) नरकं (M3 orig 5 परम) Ś1 अनर्थप्राप्तौ नरकः; D2 अप्राप्तौ तस्य नरक Ko (hapl) om. from च नरक up to °प्राप्तौ (in 24^{b}) — ^{d}) Ñ2 कृच्छ्रम्, T2 G4-6 M6-8 कृत्स्नम् T1 G1-3 कृत्स्नमेवोपलभ्यते, M3.5 दुःख(M3 *inf lin.* कृत्स्न)मे° वोपपाद्यते

24 Ko om up to प्राप्तौ (of v 1 23). — ^{c}) K3 M5 महदु ख — ^{d}) M विप्रयोगो महत्तर (M3 °त्तम ; *inf lin* °त्तर.) — After 24, D5 (om lines 3-4) T G ins

1596* यावन्तो यस्य संयोगा द्रव्यैरिष्टैर्भवन्त्युत ।
तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कव ।
तदिद जीवित प्राप्य स्वल्पकाल महाभयम् ।
त्यागोऽप्यय महान्प्राप्तो भार्यया सहितेन च ।

[(L. 4) G2.6 त्वया तु मम न श्रुत (for posterior half)]

25 ^{b}) Ś1 G3 °यमापदि; B1.3 मुच्ये महापद°, B5 Dn3 D4 T1 G6 °यमापदं — ^{d}) B1.3 Da M3.6.8 प्रद्रवेयम्; Cd (by corr) as in text

26 ^{a}) Ko D5 कथित, T2 G5 यदुक्त; G1.2 विदितं; G3 यदिद; G4 उदित; G6 अधीतं (for यतित) K1 च; K3 S हि (for वै) — ^{b}) T2 G4.5 स्वार्थे नो, G6 न स्वार्थे (for यथा त्व) Ñ1 वेत्सि Ñ2 V1 B D (except D5) वेत्थ ब्राह्मणि तत्तथा. — ^{c}) K1 तथा, K2 यत्र, Cd यत (as in text) Ñ1.2 V1 B5.6 D (except D5) क्षेमं यत (by transp.). K3 तत्र, T1 मया, G3 तथा, Cd ततः (as

C. 1. 6128 B. 1. 157. 26 K. 1. 171. 43

यतः क्षेमं ततो गन्तुं त्वया तु मम न श्रुतम् ॥ २६
इह जाता विवृद्धास्मि पिता चेह ममेति च ।
उक्तवत्यसि दुर्मेधे याच्यमाना मयासकृत् ॥ २७
स्वर्गतो हि पिता वृद्धस्तथा माता चिरं तव ।
बान्धवा भूतपूर्वाश्च तत्र वासे तु का रतिः ॥ २८
सोऽयं ते बन्धुकामाया अशृण्वन्त्या वचो मम ।
बन्धुप्रणाशः संप्राप्तो भृशं दुःखकरो मम ॥ २९
अथवा मद्विनाशोऽयं न हि शक्ष्यामि कंचन ।
परित्यक्तुमहं बन्धुं स्वयं जीवन्नृशंसवत् ॥ ३०
सहधर्मचरीं दान्तां नित्यं मातृसमां मम ।
सखायं विहितां देवैर्नित्यं परमिकां गतिम् ॥ ३१
मात्रा पित्रा च विहितां सदा गार्हस्थ्यभागिनीम् ।
वरयित्वा यथान्यायं मन्त्रवत्परिणीय च ॥ ३२
कुलीनां शीलसंपन्नामपत्यजननीं मम ।
त्वामहं जीवितस्यार्थे साध्वीमनपकारिणीम् ।
परित्यक्तुं न शक्ष्यामि भार्यां नित्यमनुव्रताम् ॥ ३३
कुत एव परित्यक्तुं सुतां शक्ष्याम्यहं स्वयम् ।
बालामप्राप्तवयसमजातव्यञ्जनाकृतिम् ॥ ३४

---

in text) — d) B6 च (for तु) K2 मम तु (by transp) G3.6 त्वया तु न मन कृत, M त्वया च न च (M8.6 तु) तच्छ्रुत

[D1 om from ईप्सि° up to 45a K1 Ñ2 3 V1 B3 6 Dn D4 ईप्सितां °रूपिणीं; Ñ1 °ता कामरू°]
— On the other hand, after 43, T G M6-8 (the three latter MSS om line 2) ins

1699* सदृशी पाण्डुपुत्रस्य अर्जुनस्येति भारत ।
ऋजु प्रहृष्टमनसो राजभक्तिपुरस्कृता ।
[Cf 1689*, 1691* — (L 1) M6 सुदृशा; M7 8 सदृशा G2 फाल्गु° (for अर्जु°) M6-8 भद्रिका (for भारत) — (L. 2) G2 राजपत्नी°]

44 B3 om 44-52, D1 om 44 (of v 1 43). — a) G3 पांचाल (for ता चापि) T1 बालां (for जाता) — c) Ñ3 °द्वरा कृष्णा — d) K0 4 क्षत्र, K3 कृत्स्न, D5 क्षात्र (for क्षयं) K0 4 D5 अत (for क्षत्र) K1 निपीपते (sic), K4 निनिष्यति, Ñ1 D5 °पती; Ñ3 °पर्ती, T1 करिष्य°; M5 निरीक्ष°, M7 निषीद° Ñ2 V1 B (B3 om) Da Dn D2 4 निनीषु क्षत्रियान्क्षय

45 B3 om 45, D1 om 45a (of v 1 43, 44) — a) Ś1 G3 हृद् (for इय) Ñ1 B6 S (except G2 3) लोके (for काले) — c) Ñ2 V1 B (B3 om) D (except D5) कौरवाणां (for क्षत्रि°) — d) K1 °त्स्यते; Ñ1 °त्पतते

46 B3 om 46 (of v 1 44) — a) Ś1 °त्वापि च पां°; K1 °त्वा चापि प°, K2 °त्वा सह पा°; Dn2 M3 5 °त्वा सर्वपचा°. — T (T1 om line 3) G ins after 46ab M6-8, after 48ab

1700* पाञ्चालराजस्तां दृष्ट्वा हर्षादश्रूण्यवर्तयत् ।
परिष्वज्य सुता कृष्णां स्नुषा पाण्डोरिति ब्रुवन् ।
अङ्कमारोप्य पाञ्चालीं राजा हर्षमवाप स ।
[(L. 1) T1 °जस्तु तथा — (L. 2) G2 M6-8 स्नुषा-

C. 1. 6406 B. 1. 157. 51 K 1. 121. 54

तौ दृष्ट्वा पृषती याजं प्रपेदे वै सुतार्थिनी ।
न वै मदन्यां जननीं जानीयातामिमाविति ॥ ४७
तथेत्युवाच तां याजो राज्ञः प्रियचिकीर्षया ।
तयोश्च नामनी चक्रुर्द्विजाः संपूर्णमानसाः ॥ ४८
धृष्टत्वादतिधृष्णुत्वाद्धर्माद्द्युत्संभवादपि ।
धृष्टद्युम्नः कुमारोऽयं द्रुपदस्य भवत्विति ॥ ४९
कृष्णेत्येवाब्रुवन्कृष्णां कृष्णाभूत्सा हि वर्णतः ।
तथा तन्मिथुनं जज्ञे द्रुपदस्य महामखे ॥ ५०
धृष्टद्युम्नं तु पाञ्चाल्यमानीय स्वं निवेशनम् ।
उपाकरोदस्त्रहेतोर्भारद्वाजः प्रतापवान् ॥ ५१
अमोक्षणीयं दैवं हि भावि मत्वा महामतिः ।
तथा तत्कृतवान्द्रोण आत्मकीर्त्यनुरक्षणात् ॥ ५२

इति श्रीमहाभारते आदिपर्वणि पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥ १५५ ॥

T1 °ष्णा कृष्णाभूत्सा ह वर्णत (cf 50ab)]
— Me-s om. 46cd, T2 G om 46c–48b With 46cd cf 1696* — c) Ś1 B1 6 T1 M8 s चैनान् B5 °सयुक्तान्
47 B3 T2 G om 47 (cf v l 44, 46) — a) Ś1 K1 तां (for तौ) Ñ2 V1 B (B3 om) D (except Da1 D5) T1 पार्षती (for पृष°) Ś1 K राजन् (for याज) — b) Ś1 K प्रपेदे हि, M प्रतिपेदे — d) Ś1 जनेया°, Ko जानीये°; M °नीये° Ś1 K1 °मामिति
48 B3 om. 48 (cf v l 44), T2 G om 48ab (cf v l 46) — a) D5 °त्युक्त्वा तु K1 Da2 Dn D1 स (for तां) — After 48ab, Me-s ins 1700* (cf v l. 46) — d) K (except K1) ते (for स)
49 B3 om 49 (cf v l 44), G3 om 49ab. — a) Ś1 Ko 2.3 transp धृष्ट° and धृष्णु° K1 Ñ1.2 B (B3 om) Da D3 4 5 T G1–6 °सिधृष्टत्वात्; K4 °दय द्युमत्वात्; Ñ2 V1 °दत्यमर्षित्वात्; G1 2 °दमर्षत्वात् — b) K1 द्युम्न यस्य भवाद्, K2 धृष्टाद्युत्स°; K4 धर्मार्थास्त°; Ñ2 2 V1 Dn D1.3 द्युम्नाद्यु°; T1 धर्मद्युम्नभ°; G1 धर्माद्युम्नोत्स°. K1 2 G2 3 6 इति (for अपि) — K1 om 49cd — c) K4 °रोऽसौ Ś1 K3 (hapl) om from भव° to द्रुपदस्य in 50a — d) T2 G4–6 अयं; Me 2 इह (for इति) Ko D5 °स्य महात्मन ; G2 °दस्याभवत्स्वय ※Dev धृष्टत्वाद् धृतिहेतुत्वादिति अक्षरसाम्यादर्थसाधर्म्यंतया(द)र्थान्तरप्रतिपत्तिनिगम । धकारसाधर्म्यात् धृतिहेतुत्वं गम्यते । अतिधृष्टत्वा दतिप्रागल्भ्यात् ॥ इति व्याकरणव्युत्पत्तिः । अतिप्रागल्भ्यं च मर्ये (corrupt) कवचस्य समर्थं(? corrupt)स्योत्पत्ति [।] धर्मात् द्युम्नयया(? read यस्या)दित्यपि निगमः न धर्मार्थ कामानां तु संभव उद्भव (।) अत्र द्युकारसाधर्म्यात् ॥ — Arj (corrupt) धृष्टत्वात् अतिधृष्टत्वात् धर्मात् (।) द्युत्संभवाद पीति [।] धृष्टत्वात् तेजस्वित्वात् सहिष्णुत्वात् । धर्मात् जामदग्न्यात् । द्युत्संभवादग्निसंभवादित्यर्थः ॥ द्युच्छब्दोऽग्निवाची [।] द्योतत इति द्युत् क्विप् । धृष्टत्वादतिधृष्ट(s10)त्वात् इति पाठे धृष्ण(? read धृष्णु)त्वात् (।) धृतिहेतुत्वात् । धकारसाधर्म्यात् (॥) धृतिहेतुत्व गम्यते ॥ अतिधृष्टत्वादतिप्र[ा]गल्भ्यादिति व्याकरण व्युत्पत्ति । अतिप्रागल्भ्य च सरथकवचधनुर्बाणस्य समस्तस्य जातत्वात् [॥] ध(र)र्माद्युत्संभवादिति च पाठे धर्मार्थकामानां द्युत्सव (? read द्युत्संभव) उद्भवो यस्मात् ॥ अत्र द्युकारसाधर्म्यं अत्र (? read अर्थ)प्रतिपादने । एकैकमक्षरं गृहीत्वा ह्याभ्यास इति धातो रूपमेतत्साध्य [॥] द्युम्नसंभवादिति बहुपुस्तकेषु पाठः [।] स च प्राचीनटीकाकृतामस्वरसतो हेय एवेति [॥] — Nil धृष्टत्वात्प्रगल्भत्वात् । धृष्णुत्वादिति पाठे पालने शक्तत्वात् । असह्यत अमर्ष । शत्रूत्कर्षासहिष्णुत्व सह्यत्वात् । द्युम्न वित्त सह राज्ञां बलमेव कवचकुण्डलादिक वा सहोत्पन्नं तदादिर्यस्य शास्त्रास्त्रशौर्योत्साहादेस्तत् द्युम्नादि तस्य उत्संभवात् उत्कर्षेणोत्पत्तेश्च ॥※
50 B3 om 50 (cf v l. 44) — After 50ab, Me–s ins.
1701* निषण्णकर्षणान्नूने रसाच्च द्रविणोऽभवत् ।
— a) Ko 2.4 transp तथा and तत् G1 अथ (for तथा) Dn1 G1 स; T1 तु (for तन्) — d) G3 महामते°.
— After 50, K2.4 ins
1702* क्रियासु चैव सर्वासु कृतवान्द्रुपदेन ह ।
पंक्तिकाध्ययने पारं धृष्टद्युम्नो गत परम् ।;
while S ins
1703* धृष्टद्युम्नस्तु पाञ्चालान्सिंहनादेन नादयन् ।
सोऽप्यारोहद्रथवर तेन सम्प्रययौ गृहम् ।
कृष्णा च शिबिकां प्राप्य प्रविवेश निवेशनम् ।
[(L. 1) M (except M5) नदयन् — (L. 2)–(var) 39ab T2 G4–6 सोध्यरो° G1.2 गृहान्]
51 B3 om 51 (cf v l 44) — a) K1 3 4 B1 D5 च; G3 स (for तु) D5 T1 G3 पांचाल; T2 °ल्यां; G2 °ल्यो; G4 6 °ल्यं — b) T1 G3 अनयत् Ko 2 सु(K3 स्व)निमीषण; Da1 Dn1 D1 G4 6 M3 स्वनिये° — After 51ab, Me–s ins
1704* द्रोण सपूजयामास सत्यु पुत्रमुदारधी ।
D4 (marg sec m) S ins after 51ab (Me–s, after 1704*)
1705* द्रोण सपूज्य विधिवद्गुरुरित्येव धर्मतः ।

१५६

वैशंपायन उवाच ।
एतच्छ्रुत्वा तु कौन्तेयाः शल्यविद्धा इवाभवन् ।
सर्वे चास्वस्थमनसो बभूवुस्ते महारथाः ॥ १
ततः कुन्ती सुतान्दृष्ट्वा विभ्रान्तान्गतचेतसः ।
युधिष्ठिरमुवाचेदं वचनं सत्यवादिनी ॥ २
चिररात्रोषिताः स्मेह ब्राह्मणस्य निवेशने ।
रममाणाः पुरे रम्ये लब्धभैक्षा युधिष्ठिर ॥ ३
यानीह रमणीयानि वनान्युपवनानि च ।
सर्वाणि तानि दृष्टानि पुनः पुनररिंदम ॥ ४
पुनर्दृष्टानि तान्येव प्रीणयन्ति न नस्तथा ।
भैक्षं च न तथा वीर लभ्यते कुरुनन्दन ॥ ५
ते वयं साधु पाञ्चालान्गच्छाम यदि मन्यसे ।

C 1 6415
B 1 168. 6
K. 1. 183. 7

परिदाय तु तं शिष्य धृष्टद्युम्न तु सोमक ।
अहो राज्ञ॰ प्रसीदेति प्राब्रुवन्प्रियवादिन॰ ।
महाप्रभावो ब्रह्मर्षिर्ज्ञात्वा तस्य च संभवम् ।

[(L 1) T1 G2. 3 ॰पूजयामास विधिवद्गुरुधर्मतः — (L 2) G1. 2 कृत्ना (for तु त) D4 T2 G1. 4–6 सोमकाः — (L 3) T1 G2 3 अस्त्रास्त्राणि, G1 अहोराज्ञ; M3. 5 अथो रा॰ G2 च सर्वाणि, G3 प्रदेयानि T1 G2 3 प्राब्रवीत्प्रियवादिनं] — ॰) G3 ॰स्त्रभेदान्.

52 B3 om 52 (cf v l 44) — ᵃ) T2 G1. 4–6 न, G2 क्व (for अ) Ś1 च, K0 2 3 तु; K4 तत् (for हि) — ᵇ) Ś1 K स तु; T1 G2 3 भाव्य (for भावि) D2 भाविरवाच्च T1 महाजना ; G2 3 ॰मना ; M5 6 7 ॰द्युति॰; M5 ॰नृपि — ᶜ) K0 4 D5 transp तथा and तत् M7 अथ (for तथा) Cd as in text — ᵈ) Ś1 K1. 2 D1 ॰र्थानु॰, T1 M ॰र्थर्थर॰, T2 G ॰कीर्त्यर्थकारणात् (G2 ॰कीर्ति सुरक्षणात्) Cd cites कीर्त्यनुरक्षण — After 52, D4 (marg sec m) ins

1706* सर्वास्त्राणि स तु क्षिप्रमासवान्दृष्टमात्रत. ।

Colophon. — *Major parvan* T2 G M संभव॰ (for आदि॰) — *Sub-parvan* Ñ1 2 V1 B3 चैत्ररथ (followed by द्रौपदीसंभव) K1 3 4 Ñ3 B1 5 Da Dn D1. 3 4 (all om the sub-parvan name) mention only द्रौपदीसंभव (B1 एकचक्रायां द्रौपदीसंभव; D4 संभव) — *Adhy name* Ś1 K0 3. 4 धृष्टद्युम्नोत्पत्ति, D5 धृष्टद्युम्नद्रौपदीसंभव. — *Adhy no* (figures, words or both) Dn3 166, D4m 169, T1 161, T2 G2 4 5 114, G1 116, G3 111, G6 M 115 — *S'loka no* Dn 56, M3 58

☞ After adhy 155, D4 (marg sec m) ins a passage of 31 lines given in App. I (No 94), while S ins. a different passage given in the same App (No 95).

156

1 Ś1 K (except K0) D2 S om उवाच — ᵃ) G6 M एवं श्रुत्वा T1 G1–4 तत॰ सर्वे (for तु कौ॰) T2 G5 तच्छ्रुत्वा पांडवा. सर्वे, Cd as in text. — After 1ᵃ, T G ins.

1707* पाण्डवा भरतर्षभ ।
मनसा द्रौपदीं जग्मुरनङ्गशरपीडिताः ।
ततस्तां रजनीं राजन्.

[(L. 1) T2 G5 6 ब्राह्मणात्संशितव्रतात्]

— ᵇ) K0 D5 शल्यप्रोता, Cd as in text — ᶜᵈ) Ñ2 V1 B D (except D5) ॰बलाः (for ॰रथा.) T1 G1–3 व्युष्टायां दुर्मनाभूताश्चास्वस्थमनसोभवन्

2 ᵇ) Ś1 K1 Ñ1. 3 विक्रांतान्; G1 विख्यातान् G2 गतचेतनान् Ñ2 V1 B D सर्वांस्तद्गतचेतस . — ᵈ) K0 2 4 D4. 5 सत्यवादिनं

3 Before 3, Ś1 K1 T2 G1. 4–6 ins कुती; K4 Ñ2 3 m V1 B D कुत्युवाच — ᵃ) Ś1 K1 दिवाराण्युपिता ; M3 5 चिरकालो॰ Cd cites चिरराञ्र — ᵈ) Ś1 K B (except B5) Cd लब्धलक्ष्या; (B1 m ॰भक्ष्या); D2 भक्ष्यं बहु Ñ2 V1 B Da Dn D1 महात्मन ; D4 महाबला (for युधि॰)

4 ᵃ) G3 वा (for इह) — ᶜ) K (except K1) D2 G2 तानि सर्वाणि (by transp), T1 G1. 3 सर्वाण्येव तु M6 युक्ता॰ (for दृष्टा॰)

5 Ś1 om 5ᶜᵈ, reading 5ᵃᵇ after 6ᵃᵇ — ᵃ) K1 पुराः दृष्टानि; K4 Ñ V1 B Da Dn पुनर्दृष्टु हि (K4 न), D1 पुनर्दृष्ट हि Ñ1 2 V1 B D (except D2 5) इह, G4 5 एवं (for एव) — ᵇ) B1 5 D1 प्रेरयंति K3 4 B5 D1 2. 5 मनस्तथा T1 G1–3 M6–8 तथा न प्रीणयति च — ᶜ) Some MSS भैक्ष्य — ᵈ) B6 Da M कुरुपुंगव

6 ᵃᵇ) K0 om. 6ᶜᵈ, reading 6ᵃᵇ after 7ᵃᵇ K1 Ñ3 3 V1 B6 Da D5 पंचालान् D2 G1–3 गच्छाम पांचालान् (transp) After 6ᵃᵇ, Ś1 reads 5ᵃᵇ. — G2 (hapl)

C. 1. 6415 B. 1. 163. 6 K. 1. 163. 7

अपूर्वदर्शनं तात रमणीयं भविष्यति ॥ ६
सुभिक्षाश्चैव पाञ्चालाः श्रूयन्ते शत्रुकर्शन ।
यज्ञसेनश्च राजासौ ब्रह्मण्य इति शुश्रुमः ॥ ७
एकत्र चिरवासो हि क्षमो न च मतो मम ।
ते तत्र साधु गच्छामो यदि त्वं पुत्र मन्यसे ॥ ८

युधिष्ठिर उवाच ।

भवत्या यन्मतं कार्यं तदस्माकं परं हितम् ।
अनुजांस्तु न जानामि गच्छेयुर्नेति वा पुनः ॥ ९

वैशंपायन उवाच ।

ततः कुन्ती भीमसेनमर्जुनं यमजौ तथा ।
उवाच गमनं ते च तथेत्येवाब्रुवंस्तदा ॥ १०
तत आमन्त्र्य तं विप्रं कुन्ती राजन्सुतैः सह ।
प्रतस्थे नगरीं रम्यां द्रुपदस्य महात्मनः ॥ ११

इति श्रीमहाभारते आदिपर्वणि षट्पञ्चाशदधिकशततमोऽध्यायः ॥ १५६ ॥

१५७

वैशंपायन उवाच ।

वसत्सु तेषु प्रच्छन्नं पाण्डवेषु महात्मसु ।
आजगामाथ तान्द्रष्टुं व्यासः सत्यवतीसुतः ॥ १
तमागतमभिप्रेक्ष्य प्रत्युद्गम्य परंतपाः ।
प्रणिपत्याभिवाद्यैनं तस्थुः प्राञ्जलयस्तदा ॥ २
समनुज्ञाप्य तान्सर्वानासीनान्मुनिरब्रवीत् ।

om 6ᶜ–8ᵈ — ᶜ) Ś1 K1 G3 अपूर्वं दर्शनं; G3 °दर्शनात् Ñ2 V1 B D (except D1.2) M2 वीर (for तात)

7 G1 om 7 (cf v 1 6) — ᵃ) Ś1 अभिक्षाश्च; D3 सुभिक्ष K1 Ñ V1 B1.3 पचाला — ᵇ) Ś1 K Ñ1 D2 3 शत्रुसूदन (K1 °नदन), B1 2 3 °कर्षन; D4 [S]मित्रकर्शन — After 7ᵃᵇ, K0 reads 6ᵃᵇ — ᶜ) T1 G1 M (except M1) तु (for च) G3 पाचालो (for राजा°) — ᵈ) Ś1 K1 2 D (except D1 2) शुश्रुम; K0 °श्रु ; G1 विश्रुम ; G3 शुश्रुत

8 G2 om 8 (cf v 1 6) — ᵃ) Ñ2 3 V1 B Da Dn D1 2 °वासश्च; D1 °सवास , S (G2 om) °वासोय — ᵇ) K0 B3 T3 G3 4 क्षेमो — ᶜ) Ś1 K1 2 4 Ñ1.2 तेन्यत्र साधु; D3 तस्मादन्यत्र, S (G2 om) तस्मात्तत्रैव (see below) — ᵈ) K3 तात; T1 G1 3 M साधु (for पुत्र) T2 G1–6 यथ यदि च (G6 तु यदि) मन्यसे

9 Ś1 S युधिष्ठिर ; K1 श्रीवैशपायन (all om उवाच) — ᵃ) K (except K1) D2 3 यद्भवत्या मत (by transp). — ᵇ) G6 हिततमाय K3 हित पर (by transp)

10 Ś1 K D2 3 S वैश° (K1 युधिष्ठिर) (T1 G3 M3 om the ref) — ᵇ) K0 4 अर्जुन यमसौ; K1 अर्जुनौ यमौ; D1 2 अर्जुन च यमौ; T1 G2 3 (by transp) यमजावर्जुनं G1 तदा, M2–3 दमौ (for तथा) — ᶜ) T1 G1 3 M °च वचन — ᵈ) S (except T1 G2 3) तं तथेत्य(G3 तथेत्त)ब्रुवन् K1.2.4 D3 T G1–4 M1–3 तथा; G6 यथा (for तदा)

11 K0 om from आमन्त्र्य up to रम्यां — ᵇ) G3 M1.2 राजसुतै — ᶜ) Ś1 K1 नगरे; D3 च पुर; T1 G3 नगर D3 T1 G1 2 रम्य; G3 सम्यग् G1 प्रतस्थे नृपनगरीं — ᵈ) K0.4 °स्य निवेशन

Colophon om in T2 G1.2 4–6 M — *Major parvan* G3 सभव° (for आदि°) — *Sub-parvan* K0 अगारपर्ण, Ñ1 2 V1 B3 चैत्ररथ; to it K0 Ñ1 3 V1 B3 add द्रौपदी समय ; K0 cont समास Ś1 K1–4 Ñ2 B2 Da Dn1.n2 D1.2 (all om the sub-parvan name) mention only द्रौपदीसमय ; K3 4 Ñ3 cont समास — *Adhy name* Ñ1 3 V1 पांचालदेशयात्रा, D3 पांचालाभिगमन — *Adhy no* (figures, words or both) Dn3 167, Dm 170, T1 163, G3 113 — *S'loka no* Dn 11 — *Aggregate s'loka no* Dn3 6415

☞ After adhy 156, S (except G6) ins an addl adhy given in App I (No 96), which is a variant of adhy 174

157

1 Ś1 K1 2.4 D2 3 S om उवाच (T3 G1 4–6 M om the ref) — ᵃ) T3 यातेषु तेषु Da वसेषु (for तेषु) T1 G2 3 यातेषु हसचर्याभि (G3 °चर्येषु); G1 गुरुतेषु प्रयातेषु — ᶜ) Ś1 स तान्; T3 तथा; G3–6 तदा (for अथ तान्) K0 3 4 D3 ततो धीमान्; K1 स तान्द्रष्टुं (for अथ तान्द्रष्टुं) — ᵈ) T3 पुन (for व्यास) T1 G1–3 कृष्ण द्वैपायनस्तदा (T1 तथा; G2 कृती)

प्रसन्नः पूजितः पार्थैः प्रीतिपूर्वमिदं वचः ॥ ३
अपि धर्मेण वर्तध्वं शास्त्रेण च परंतपाः ।
अपि विप्रेषु वः पूजा पूजार्हेषु न हीयते ॥ ४
अथ धर्मार्थवद्वाक्यमुक्त्वा स भगवानृषिः ।
विचित्राश्च कथास्तास्ताः पुनरेवेदमब्रवीत् ॥ ५
आसीत्तपोवने काचिदृषेः कन्या महात्मनः ।
विलग्नमध्या सुश्रोणी सुभ्रूः सर्वगुणान्विता ॥ ६
कर्मभिः स्वकृतैः सा तु दुर्भगा समपद्यत ।
नाध्यगच्छत्पतिं सा तु कन्या रूपवती सती ॥ ७
तपस्तप्तुमथारेभे पत्यर्थमसुखा ततः ।
तोषयामास तपसा सा किलोग्रेण शंकरम् ॥ ८
तस्याः स भगवांस्तुष्टस्तामुवाच तपस्विनीम् ।
वरं वरय भद्रं ते वरदोऽस्मीति भामिनि ॥ ९
अथेश्वरमुवाचेदमात्मनः सा वचो हितम् ।
पतिं सर्वगुणोपेतमिच्छामीति पुनः पुनः ॥ १०
तामथ प्रत्युवाचेदमीशानो वदतां वरः ।
पञ्च ते पतयो भद्रे भविष्यन्तीति शंकरः ॥ ११
प्रतिब्रुवन्तीमेकं मे पतिं देहीति शंकरम् ।
पुनरेवाब्रवीद्देव इदं वचनमुत्तमम् ॥ १२
पञ्चकृत्वस्त्वया *उक्तः पतिं देहीत्यहं पुनः ।
देहमन्यं गतायास्ते यथोक्तं तद्भविष्यति ॥ १३
द्रुपदस्य कुले जाता कन्या सा देवरूपिणी ।　C. 1 6434 B. 1 169. 14 K. 1 184. 14

---

2 b) S1 K1 °तप — d) K4 D2 T1 तथा, T2 G (except G2 3) M अग्रत (for तदा)

3 a) K4 समनुप्राप्य, D2 °ज्ञाय, T1 तमनुप्राप्य, T2 तमनु° — b) T1 G2 3 ऋषि° (for मुनि°) — c) Ñ2 V1 B3m Dn D1 4 5 प्रच्छन्न (D5 °न्न), B5 G6 °सन्न; G3 4 °सभ. G3 पार्थान्

4 Before 4, T2 G2 5 6 M5-8 ins व्यास — a) K0 3 Ñ2 V1 Da Dn2 D2 4 5 अयि (for अपि) T1 G1 2 4 धर्मेषु T2 G2 4 5 वर्तध्वे, G6 वर्धध्व — b) Ñ3 सत्येन च; T2 G5 6 M6-8 शास्त्रेणैव T1 G1-3 अपि स्वेषु नरर्षभा (G2 नरेश्वरा; G3 नरर्षभ), G4 परेषु स्वेषु भूमिप — c) K0 1 Ñ2 V1 B1 Da2 Dn2 D2 4 5 G3 4 अयि, T2 G5 6 M3 5 अथ Ñ1 2 V1 B D (except D2 5) पूजा व. (by transp) — d) T1 G1-4 च विद्यते, T2 G5 6 M यथाविधि

5 a) T1 G1 3 M3 °र्थविद्वाक्य — c) K4 T2 G5 6 M तु (for च) — d) Ñ1 T G (except G6) °रेवाब्रवीदिद

☞ The rest of the adhy is *repeated* (with some variation) at the end of adhy 189

6 Before 6, K0 Ñ2 3 V1 B2 6 Da Dn D1.4 5 ins व्यास उ° — a) T2 G4 तपोनिधे; G5 तपोधना, G6 उपवने — b) T1 G1 ऋषिकन्या T1 G1-3 तपस्विनी, T2 G4-6 M मनस्विनी (for महा°) — d) G5 सर्वरूपगुणान्विता

7 a) K1 2 Ñ1 3 B3 Da M5 सुकृतै, T2 G1.4 5 स्वै कृतै° — c) K4 T2 G (except G6) M3 नाभ्यग° K4 सा तु पतिं (by transp), T G (except G6) पतिं कश्चित्

8 T2 G3.5 om 8ab — a) K3.4 Ñ V1 Da1 Dn1 M7 ततस्तप्तुम् Ś1 तथारेभे; G2 समा° — b) K (except K1) °सुखात्; D1 °सुखी; S (T2 G3.5 om) °सुख. Ś1 K1 यत; M5 तप — c) G6 °मास महता — d) T G भगवंतं महेश्वर (G6 तपसोग्रेण शकर)

9 a) G2 M (except M3) तु (for स) M6-8 शकरस्तुष्ट — b) K3 Ñ V1 B (except B5) D T G M5 यशस्विनीं — c) T G1 3 M भद्रे त्व — d) Ñ1.3 भारत; Ñ2 V1 B D शंकर (for भामि°) S वरदोस्मि यथेप्सितं

10 b) T1 G1 स; G3 तु (for सा) T G हित वचः (by transp)

11 a) K3 G2 तामथो — b) Ñ3 T2 ददता वर°. — d) Ñ2 V1 B D (except D5) G4 (by corr) भारता (D1 °त) (for शक°) — After 11, Ñ2 V1 B D T1 G4 (marg) ins

1708* एवमुक्ता तत॰ कन्या देव वरदमब्रवीत् ।
[B5 T1 G4 वरदमीश्वरं; D2 वचनमब्र°]

12 K3 G4 M7 (? hapl) om 12ab, G4 ins the reading of the vulgate in marg — a) K0 N1.3 पतिं (for प्रति) T2 G2.3 5 6 M (M7 om) प्रति(G3 इति)ब्रुवाणा (T2 °णा) T2 सा कन्या (for एक मे) Ñ2 V1 B D T1 G4m एकमिच्छाम्यहं देव, G1 ब्रुवाणमेव देवेश — b) K0 G2 6 M5 6 8 शकर, K2 4 T2 शकर Ñ2 V1 B D T1 G4m स्वत्प्रसादात्पतिं प्र(B5 वि)भो — c) S °ब्रवीदेना — d) T G (except G6) देवो (for इद) Ñ1 3 M6-8 °मुत्तर

13 a) Ś1 K0 2 3(*sup lin*) 4 त्वयास्म्युक्त°; K1 °स्म्युक्त, K3 Ñ V1 B D T G1.4 त्वया ह्युक्त (Da T2 °स्युक्त), G2 3 6 M °प्युक्त, G5 त्वया सूक्त (all avoiding hiatus in different ways) — b) D2 यद्, T1 अथ, G3 मां (for अह) K Ñ1.3 मुहु (for पुन) — d) K2

G. 1. 64. 4 B. 1. 157. 15 K. 1. 164. 15

निर्दिष्टा भवतां पत्नी कृष्णा पार्षत्यनिन्दिता ॥ १४
पाञ्चालनगरं तस्मात्प्रविशध्वं महाबलाः ।
सुखिनस्तामनुप्राप्य भविष्यथ न संशयः ॥ १५
एवमुक्त्वा महाभागः पाण्डवानिति वा पुनः ॥ ९
पार्थानामन्त्र्य कुन्तीं च प्रातिष्ठत महातपाः ॥ १६

इति श्रीमहाभारते आदिपर्वणि सप्तपञ्चाशदधिकशततमोऽध्यायः ॥ १५७ ॥

१५८

वैशंपायन उवाच ।
ते प्रतस्थुः पुरस्कृत्य मातरं पुरुषर्षभाः ।
समैरुदङ्मुखैर्मार्गैर्यथोद्दिष्टं परंतपाः ॥ १
ते गच्छन्तस्त्वहोरात्रं तीर्थं सोमश्रवायणम् ।
आसेदुः पुरुषव्याघ्रा गङ्गायां पाण्डुनन्दनाः ॥ २
उल्मुकं तु समुद्यम्य तेषामग्रे धनंजयः ।

यथोक्त; K₃ तथोक्त G₆ M ये (for तद्)

14 Before 14, T G (except G₆) ins व्यास — a) K₀ D₅ गृहे (for कुले) N जज्ञे (Ś₁ ज्येष्ठे) (for जाता) — b) N V₁ B₁.₃ D₅ सा कन्या (by transp) K₄ दिव्यरूपिणी; S वरवर्णिनी — d) M₅-₈ कन्या (for कृष्णा)

15 a) Some MSS पञ्चाल˚ N₂ V₁ D (except D₁) ˚नगरे; G₆ ˚नगरीं — b) Ś₁ प्रयतध्वं; N₃ V₁ B₁.₃.₆ D₅ D₁.₂ निवस˚; B₁ D₅ निवि˚; D₁ निर्वि˚. K₀.₄ D₂ महारथा; N₃ सयाधया˚; G₃ नराधिपा N₁ भजताशु नरर्षभा — c) Ś₁ K₁ सुख यथाम् — d) Ś₁ K₁.₃ G₁ भविष्यति; D₂ ˚ष्यति K₃ अथ (for न) G₁ धनजय (for न सशय) — After 15, G₆ M ins

1709* राज्यं चैवागत पार्थो इन्द्रप्रस्थ प्रविश्य ह ।

[G₆ प्राप्त (for पार्थो) G₆ गमिष्यथ; M₃ प्रविश्य च; M₃ (inf lin) ₂ भविष्यथ]

16 Before 16, K₀.₂.₄ G₆ M₅.₈ ins वैश˚ (K₀ cont उवाच) Ś₁ K₁ (I hapl) om 16 (with colophon) — a) N₁ एवमुक्त्वा K₀ ततो राजन्; K₃ B₁ G₁ ˚भाग; G₁ ˚बाहु — b) N₃ V₁ B D M₃ पाण्डवान्स (D₁ ˚न्प) — cd) K₀.₄ B₃m D₅ D₁.₂ महायशा Cd पार्थान्समन्त्र्य कुन्तीं च प्रातिष्ठ (sic) परतपा

Colophon om in Ś₁ K₁ (cf v 1 16) — *Major parvan* T₂ G M सभव˚ (for आदि˚) — *Sub-parvan* K₀.₄ बकवधपर्व; N₁.₂ V₁ B₁ चैत्ररथ — *Adhy name* K₀.₂.₄ G₁.₄ व्यासवाक्य; N₁.₃ V₁ द्रौपदीजन्मांतरकथनं; D₅₁ द्रौपदीसभव; D₂ M₅.₈ व्यास(M₃ ˚सा)गमन; T₂ द्रौपदीस्वयंवरे व्यासवाक्य — *Adhy no* (figures, words or both) D₅₁ 168; D₅m 171, T₁ 164, T₂ G₁.₃.₅ 116, G₁ 118, G₂ 114, G₂ M 117 — *Śloka no* D₅ 16, M₃ 37 — *Aggregate śloka no* : D₅₁ 6431

☞ After adhy 157, S (except G₆) reads (for the first time) adhy 175, *repeating* it (with v l) in its proper place (i e after adhy 174)

158

1 Ś₁ K₁.₃.₄ D₂.₃ S om उवाच (T₂ G₁-₆ om the ref) — After वैश (resp its v l), K₃.₄ N₂ V₁ B D₅ D₁.₂.₄ ins

1710* गते भगवति व्यासे पाण्डवा हृष्टमानसा ।,

after which B₃.₅ ins 1711* Cd appears also to om 1710* — a) K₄ उपतस्थु K₀.₂.₃ D₂ महात्मान; G₆ पुरस्कृत्वा — b) N₁ B₁ D₂ T₂ G₁-₆ भरतर्षभा K₀.₂.₄ D₂ G₃ मात्रा सह (K₀.₂ सह मात्रा) परतपा (=1 55 20ᵈ etc) — K₄ N₂ V₁ B₃ D₅ D₁.₄ (marg sec m) ins after 1ᵃᵇ B₃.₅, after 1710*

1711* आमन्त्र्य ब्राह्मण पूर्वमभिवाद्यानुमान्य च ।

— c) B₃ D₅ शनैर् (for समैर्) Ś₁ K₁ तदुन्मुखा; B₁ D₅ D₁ उदङ्मुखा; G₃ तैरुन्मुखैर् — d) Ś₁ K₁ परतप; K₂.₃ महौजस; T G (except G₆) च भारत

2 a) K₀ ˚रात्राद्; K₃ ˚रात्रान् N₃ V₁ B D (D₅ erroneously) Arjp ते ययुस्त्वहोरात्राद् (D₁₁ D₁.₄ ˚रात्र); T₁ G₃ अहोरात्रेणाभ्यगच्छन्; G₁.₂ तेऽभ्यगच्छस्त्व(G₃ ˚च्छन्त)होरात्र — After 2ᵃ, S ins

1712* पाञ्चालनगर प्रति ।
अभ्याजग्मुर्लोककार्यों गङ्गां भागीरथीं प्रति ।
चन्द्रार्कमयवेलायामर्धरात्रे समागमे ।
धारि चैवानुमजन्त

[(L. 2) G₃ स्वर्गार्त्री त्रिपुरारिशिरोगृहां — (L. 3) M₅-₈ चन्द्रास्तमये˚ — (L. 4) T₁ G₁.₂ चत्रापि समुद्रष्ट; M ते चैवाद्यानुमज्जत .]

— b) N₃ V₁ D₅ D₁ सोमाश्रयायण; N₃ B₃ D₂ सोमा

प्रसन्नः पूजितः पार्थैः स्वार्थं च महायशाः ॥ ३
तत्र गङ्गाजले रम्ये विविक्ते क्रीडयन्स्त्रियः ।
ईर्ष्युर्गन्धर्वराजः स जलक्रीडामुपागतः ॥ ४
शब्दं तेषां स शुश्राव नदीं समुपसर्पताम् ।
तेन शब्देन चाविष्टश्चुक्रोध बलवद्बली ॥ ५
स दृष्ट्वा पाण्डवांस्तत्र सह मात्रा परंतपान् ।
विस्फारयन्धनुर्घोरमिदं वचनमब्रवीत् ॥ ६
संध्या संरज्यते घोरा पूर्वरात्रागमेषु या ।
अशीतिभिस्त्रुटैर्हीनं तं मुहूर्तं प्रचक्षते ॥ ७
विहितं कामचाराणां यक्षगन्धर्वरक्षसाम् ।
शेषमन्यन्मनुष्याणां कामचारमिह स्मृतम् ॥ ८
लोभात्प्रचारं चरतस्तासु वेलासु वै नरान् ।
उपक्रान्ता निगृह्णीमो राक्षसैः सह बालिशान् ॥ ९
ततो रात्रौ प्राप्नुवतो जलं ब्रह्मविदो जनाः ।
गर्हयन्ति नरान्सर्वान्बलस्थान्नृपतीनपि ॥ १०
आरात्तिष्ठत मा मह्यं समीपमुपसर्पत ।
कस्मान्मां नाभिजानीत प्राप्तं भागीरथीजलम् ॥ ११
अङ्गारपर्णं गन्धर्वं वित्त मां स्वबलाश्रयम् ।
अहं हि मानी चेर्ष्युश्च कुबेरस्य प्रियः सखा ॥ १२
अङ्गारपर्णमिति च ख्यातं वनमिदं मम ।

C. 1. 6449
B. 1. 170. 14
K. 1. 180. 14

श्रवा(B5 °मा)ह्वय, B1.3.6 Da D2.4 T1 सोमाश्रमा° (D4 by corr T1 °वा°); G3-6 सोमाश्रवा° — T G M5 om 2nd. — c) K4 M6-8 °व्याघ्र

3 a) T1 G2 समुद्यम्योल्मुक दीप्तं — c) G1 तत्र ययौ (by transp) — d) Ñ V1 B D T G1-5 महारथ (Da °बल°); G6 M6-8 धनजय°; M8 5 परतप (for महा°)

4 a) M5 ततो (for तत्र) G6 अथ तत्र जले — b) K2 विचित्रे, G6 विजने — c) T1 G4 तदा, G3 रस्यु, Cd ईर्ष्यन् Ko 3.4 गधर्वराजः स, Ñ1 2 V1 B3.5 6 Da Dn D1 3 4 °राजो वै; Ñ3 D5 G1.6 °राजस्तु; B1 °राजोसौ, T1 °राजस्य; T2 G2 4 5 °राजश्च — d) K1 °र्थमागतः; B1.2 Da °मुपास्त ह

5 a) Ko 3 4 तेषां शब्द (by transp.) D2 स शब्दं तेषा शुश्राव. — c) M3.5 चाविश्चस — d) T G2-5 च बलाद्बली, G6 M3 5 सहसा बली; M6-8 स महाबली

6 b) K3 Ñ3 मात्रा सह (by transp) Ś1 K1 °तप — c) D4 S (except G3 6) विष्फारयन् (G5 °यत) T2 G3 धनुर्घोष; G6 निर्घोष

7 a) K4 सवर्तते; T1 °लक्ष्य°; G1 समीक्ष्यते Ñ3 (m sec m घोरा as in text) M6-8 प्राची — b) Ś1 K1 सर्वरात्रा°. B1(m as in text) 3 M8 °गमे तु या, T1 G2 °गमे तदा, T2 G1 3-6 M6-8 पूर्व(M6-8 °र्वा)रात्रा(M6-8 °व्या)गमे च या Cd cites आगमे — c) Ñ3 by corr. लवैर् (for त्रुटैर्) Ś1 K2 V1 हीना Ko 1 अशीतिस्तुटिभिर्हीन (K1 °ना); Ñ1 2 B D अशीतिभिर्लवैर्हीन, T1 अशीती तु विहीनानां, T2 G4 5 अशीतिस्त्रुटिहीनाखान्, G1-3 6 M अशीतिस्त्रु(M °तु)टिभि हीनान् (G1 छिन्नान्, M6 हीना°) — d) Ko 3 4 Ñ V1 B D (except D5) तन्मुहूर्तं, S त्रि(G6 M त्रीन्)मुहूर्तान् K4 प्रवर्तते

8 a) Ś1 Ko 2 3 विहिता, S °तान् S कामचाराय (G1 काममाचारान्) — b) Ś1 यथा (for यक्ष) — c) Ś1 Ko 2.3 क्षणमन्ये, K1 रक्ष मान्ये (sic), D5 क्षण मन्ये — d) T1 G1-3 इति (for इह) Ś1 K1 कर्मसु स्वेषु वर्तताम्, Ko 2-4 D4 कर्मचारेषु वर्तताम्, Ñ V1 B3 5 Dn D1 2 कर्मचारेषु वै स्मृतः; B1 6 Da D5 कामचारेषु वर्तता Cd cites कर्माचाराः

9 a) B1 लोभात्सर्वान्प्रचरत — c) Ś1 अपक्राता, Ko 3 Ñ1 B5 Da2 Dn1 n8 D2 M Cd उपक्रातान्, T1 G2 अपक्रम्य, T2 G1 4-6 उप(G1 °पा)क्रम्य.

10 a) Ñ2 V1 B D (except D5) अतो रात्रौ, T G अहो निशां, M अतो निशां (M5 ततो राज्या) Ś1 Ko 4 Da D1 G3 प्राप्नुवतो, B1m D4.5 M3 5 °वति; T1 M6-8 प्राप्नवतो (T1 °ता) — b) D4.5 ब्रह्मद्विषो Ś1 जनान्; K1 जल S भूयिष्ठ (T2 G5 6 °ष्ठा, G1 °ष्ठ) पा(T1 M3 5 प्रा)पचेतस — K1 om 10c-11d. — c) Ñ1 3 गर्हंति पुरुषान्सर्वान्, S गर्हयेतान् (T1 G2 प्रसाम तान्, G3 4 °स्येषां, M निम्नत्येते) नित्यमेषु — d) K2 स्थलस्थान्, Ñ3 गृह°, Da वन°, S क्षणेषु (for बलस्थान्)

11 K1 om 11 (cf v 1 10) — a) M3 दूरात् (? gloss). T G च (T1 G2 प्र) तिष्ठता(G3 °तो)त्साक — b) B (except B6) D2 3 अनुसर्पत T G समीप (G1 °पे) नोपगच्छत (G3 °थ, G4 °सर्पत) — c) Some MSS मा (for मां) B1.6 S °जानीय

12 Ko (hapl) om 12 — a) T G5 6 M3 °रवर्ण G1 3 अहमगारगधर्वो — b) K2 4 Ñ1.3 T1 G2 3 विद्धि, Cd वित्त (as in text) S प्रवला° — c) S1 सेर्ष्युं, K1 सीर्ष्युं, T G1.4 5 प्रेष्य, G2 प्रेक्ष्य, G3 श्लाघ्य.

13 a) T G (except G2) M3 अगारवर्णम् Ñ1.2 V1

C 1. 6-49
B 1. 170. 14
P 1. 160. 14

अनु गङ्गां च वाकां च चित्रं यत्र वसाम्यहम् ॥ १३
न कुणपाः शृङ्गिणो वा न देवा न च मानुषाः ।
इदं समुपसर्पन्ति तत्किं समुपसर्पथ ॥ १४

अर्जुन उवाच ।

समुद्रे हिमवत्पार्श्वे नद्यामस्यां च दुर्मते ।
रात्रावहनि संधौ च कस्य क्लृप्तः परिग्रहः ॥ १५
वयं च शक्तिसंपन्ना अकाले त्वामधृष्णुमः ।
अशक्ता हि क्षणे क्रूरे युष्मानर्चन्ति मानवाः ॥ १६
पुरा हिमवतश्चैषा हेमशृङ्गाद्विनिःसृता ।
गङ्गा गत्वा समुद्राम्भः सप्तधा प्रतिपद्यते ॥ १७
इयं भूत्वा चैकवप्रा शुचिराकाशगा पुनः ।
देवेषु गङ्गा गन्धर्व प्राप्नोत्यलकनन्दताम् ॥ १८
तथा पितॄन्वैतरणी दुस्तरा पापकर्मभिः ।
गङ्गा भवति गन्धर्व यथा द्वैपायनोऽब्रवीत् ॥ १९
असंबाधा देवनदी स्वर्गसंपादनी शुभा ।
कथमिच्छसि तां रोद्धुं नैष धर्मः सनातनः ॥ २०

B D (except D5) एव (for च) — b) Ñ1 2 V1 B D (except D5) स्यातं चेद् वनं मम; S वनं स्यात(G1 प्रख्य, G3 ज्ञात)मिद मम — c) Ñ1 2 V1 D4 (by corr) T2 G4–6 M6–8 अनुगग Cd cites अनु (=अनतर) K1 B1 2 6 Da च रार्कां च, K4 च वासो मे, Ñ1 3 B3m D1 च वास च; B4 च कास च; B5m च वार्की च; Dn D4 5 चरन्कामान्; D2 प्रयाग च; S महत् (M3 inf lin.3 वन) चित्र Cd cites वार्कां — d) T1 G2 3 M यस्मिन्; T2 G4.6 अस्मिन्, G1 4 तस्मिन् (for चित्र) Ś1 यत; Ñ1 यस्मिन्, S नित्य (for यत्र) Ñ2 V1 B1.3 Dn D1.4 रमाम्यहं, B3 6 Da D2 चरा°

14 G1 om 14ab. — a) Ś1 K3 न पूनसा; K0 नघनासा°, K1 न मणपा ; K3 न कुनासा ; K4 D5 नकचरा ; Ñ V1 B3m 6 Da Dn D1.4 S (G1 om) न कौणपा ; B3m Cd Arjp न शकुना ; D2 शाकुना वा — b) T1 G3 चारणा (for मानुषा) K1 T2 G2.4.6 M6–8 न च देवा न चारणा (K1 मानुषा), K3 B3 (m as in text) M2.3 न च देवाजनस्तज ; G1 द्विपदो वा न चारणा — K4 B3 repeat 14cd (with v l), in D5 14c is deleted — c) K3 4 B3 (latter two second time) D5 (marg corr) T G (except G3) कुबेरस्य यथोष्णीष (G3 °स्थान; G3 °दृष्ट) — d) K3 4 B3 (latter two second time) T G किं मां (G3 स किं) (for तत्किं) Ñ2 V1 B1 3 Dn3 G2 समनुसर्पथ ॥ Nil न नहसा° शृङ्गिणो वा न च देवाजनस्तज । कुबेरस्य यथोष्णीष किं मा समुपसर्पथ ॥ इति प्राचीन पाठो देवबोधा दिभिर्व्याख्यातत्वात् । कौणपा इति पाठे तु राक्षसा । न कुणसा इति पाठेऽपि स एवार्थः ।[?] कुबेरस्य यथोष्णीष is a T G reading, and not the reading of Devabodha (as Nil here says)!

15 Ś1 K1 S om उवाच — a) G6 °पार्श्वे — b) Ś1 उत्तरा वसुपात्रे; K1 नदने पानने पने — c) Ś1 सख्यां च; K0 T1 G1–3 6 M स(G1 सि)धां वा; K1 Ñ V1 B D सन्ध्याया — c) Ś1 क्लिष्ट , Ś1 (sup lin) Ñ2 V1 B Da Dn3 D2 4 5 गुप्त ; T1 क्लृप्त, G1 लिप्त ; G3 कल्प ; G3 लुप्त — After 15, Ñ2 V1 Dn D1.4.5 ins

1713* भुक्तो वाप्यथवाभुक्तो रात्रावहनि खेचर ।
न कालनियमो ह्यस्ति गङ्गां प्राप्य सरिद्वराम् ।

16 a) G1 एव (for वय) T1 G1 3 हि (for च) — b) Text as in D1 G1 4 5 1 Ś1 K1 त्वामधृष्णव°; K0.3–4 त्वां प्रधृष्णव°; Ñ V1 B1 3m 5 6 Da Dn D3 4 त्वामधृष्णुम (B1m त्वावधृष्णुव); B3 D5 त्वामधृष्णुव ; T1 M3.5 चापि धृ°; T2 G6 त्वां च धृ°; G1 चावधृ°; M6–8 त्वां विधृ° G3 अकालेष्वपि धृ°. Cd cites अवधृष्णव — c) Ñ2.3 V1 B D (except D5) M3 रणे (for क्षणे) Ñ2.3 V1 B D (except D5) G3 क्रूर; Ñ3 क्रूरान् (for क्रूरे) G6 अशक्ता भवने क्रूरान्

17 a) G3 दृष्टा (for चैषा) — b) T2 G1 मेरुशृङ्गाद् (G4 °शृङ्ग) A few MSS विनिस्सृता, K1 G1 विनिर्गता — c) G6 गङ्गा प्रतिदिशं गत्वा — d) Ñ1 प्रत्यपद्यत; Ñ3 V1 B D समपद्यत — After 17, Ñ2 V1 Dn D1 4.5 ins

1714* गङ्गा च यमुनां चैव प्लक्षजातां सरस्वतीम् ।
रथस्थां सरयूं चैव गोमतीं गण्डकीं तथा ।
अपर्युषितपापास्ते नदीः सप्त पिबन्ति ये ।

18 a) T1 चेयं, T2 G4–6 एषा (for इयं) — c) B3 यत्र स्व (for गन्धर्व) — G3 (hapl) om 18d-19c — d) K0.3–4 Ñ1 2 B1 °नन्दतां (for °नन्दतां) Cd cites अलकनदा Ś1 प्राप्नोति वरनन्दतां; K1 °स्थैवैकनन्दतां — After 18, K4 D5 (corrupt) ins

1715* यद्युर्भद्रा चोत्तरगा हिमवत्पदनिःसृता ।
(cf 17b)

19 G3 om 19abc (cf v l 18). — b) Ś1 K दुरापा; T1 दुष्कर Cd cites दु परा — c) G6 भुवि च (for भवति) Ñ3 V1 B D (except D5) वै प्राप्य (for गन्धर्व). — d) Ñ3 V1 B D (except D5) कृष्णद्वैपायनो.

अनिवार्यमसंबाधं तव वाचा कथं वयम् ।
न स्पृशेम यथाकामं पुण्यं भागीरथीजलम् ॥ २१

वैशंपायन उवाच ।

अङ्गारपर्णस्तच्छ्रुत्वा क्रुद्ध आनम्य कार्मुकम् ।
मुमोच सायकान्दीप्तानहीनाशीविषानिव ॥ २२
उल्मुकं भ्रामयंस्तूर्णं पाण्डवश्चर्म चोत्तमम् ।
व्यपोवाह शरांस्तस्य सर्वानेव धनंजयः ॥ २३

अर्जुन उवाच ।

बिभीषिकैषा गन्धर्व नास्त्रज्ञेषु प्रयुज्यते ।
अस्त्रज्ञेषु प्रयुक्तैषा फेनवत्प्रविलीयते ॥ २४
मानुषानति गन्धर्वान्सर्वान्गन्धर्व लक्षये ।
तस्मादस्त्रेण दिव्येन योत्स्येऽहं न तु मायया ॥ २५
पुरास्त्रमिदमाग्नेयं प्रादात्किल बृहस्पतिः ।
भरद्वाजस्य गन्धर्व गुरुपुत्रः शतक्रतोः ॥ २६
भरद्वाजादग्निवेश्यो अग्निवेश्याद्गुरुर्मम ।
स त्विदं मह्यमददाद्द्रोणो ब्राह्मणसत्तमः ॥ २७

वैशंपायन उवाच ।

इत्युक्त्वा पाण्डवः क्रुद्धो गन्धर्वाय मुमोच ह ।
प्रदीप्तमस्त्रमाग्नेयं ददाहास्य रथं तु तत् ॥ २८
विरथं विप्लुतं तं तु स गन्धर्वं महाबलम् ।
अस्त्रतेजःप्रमूढं च प्रपतन्तमवाङ्मुखम् ॥ २९
शिरोरुहेषु जग्राह माल्यवत्सु धनंजयः ।
भ्रातॄन्प्रति चकर्षाथ सोऽस्त्रपातादचेतसम् ॥ ३०
युधिष्ठिरं तस्य भार्या प्रपेदे शरणार्थिनी ।
नाम्ना कुम्भीनसी नाम पतित्राणमभीप्सती ॥ ३१

गन्धर्व्युवाच ।

त्राहि त्वं मां महाराज पतिं चेमं विमुञ्च मे ।
गन्धर्वीं शरणं प्राप्तां नाम्ना कुम्भीनसीं प्रभो ॥ ३२ C. 1 6470 B. 1 170 35 K. 1 186 35

---

20 a) G2 अथा या तु देव° — b) B (except B1) D1.2.4 °सपादिनी, S सर्वेषां पावनी D5 त्रिषु लोकेषु विश्रुता

21 a) Ś1 K1 पुनर्वार्यमस°; K0 3 4 Ñ3 B1.3.5m D5 अना(K3 4 °न)वार्यमस°; K2 अवार्यमथ स°, G1.3 M अनाश्रयंमस°

22 Ś1 K (except K0) D2 5 S om उवाच (G5 om the ref.) — a) T2 G (except G2) M3 अगारवर्णस् — b) Ś1 K1-3 क्रुद्धस्त्वानम्य; K0 4 D5 °श्चान(K4 °ना)म्य; Ñ1.3 B3 Da Dn D1 S °द्ध आयम्य — c) Ñ2 V1 B D (except D5) °च बाणान्निशितान् — d) Ñ1 3 G3 4 6 M अहीन्(G6 विष) दीप्ताननानिव, B3 अहीनाशीविषोपमान्, D5 महानाशीविषानिव, T1 G1.2 अहीन् (G1 विपान्) पचानननानिव, T2 G5 अग्नीन् (T2 °ग्नि) दीप्तानिवासकृत्

23 a) D2 G3 M6-8 भ्रामयत्तूर्णं — b) K2 स्वसथोत्तम, Ñ2 V1 B6 Dn1 n2 D4 G2 चर्म चोत्तरं, Ñ3 चर्म चोदयन् G3 वर्षमाणं शरोत्तमान् — c) K2 M5 अपोवाह; Ñ V1 B (B1m as in text) Dn D2 4 G4 व्यपोहत, Cd as in text

24 Ś1 K1 S अर्जुन (G3 धनजय) (all om उवाच) — a) Ñ3 S (except G3) विभीषिका N V1 B D है (D1 उच्चैर्, D5 as in text), S हि (for एषा) — b) Ś1 वियुज्यते, Ñ3 प्रयोजयेत्, S प्रयोजय° Ñ1 नास्त्रज्ञै संप्रयु°. — c) Ñ V1 B D T2 G3 6 M3 5 प्रयुक्तेय, T1 G1 2 4 5 M6-8 °क्तोयं°

25 ab) Ñ3 काम° (for लक्ष°) Ñ1 मानुषानेति गंधर्व गंधर्वानुपलक्षये — d) D1 नैव (for न तु).

26 ab) S तदिदं जातवेदास्तु प्रादादस्त्रं बृहस्पते° — c) Ś1 K3 4 भार°, Ñ1 2 V1 B D भ(Da1 D5 भा)रद्वाजाय S तस्मादगाद्भरद्वाजं — d) Ñ1.2 V1 B D (except D5) गुरुर्मान्य°, T1 G1 2 6 M °पुत्रं

27 a) S °द्वाजात्ततो राम (T2 G4 5 M3 5 °मो) — b) Ś1 K0.1 3 स्त्वग्निवे°, B5 द्रोणस्तस्मात्; D4 ह्यग्निवे°; S भार्गवाच्च — c) Ñ1.2 V1 B D (except D2 5) साध्विदं K0 Ñ V1 B D मह्यमदद्त्, G2 ह्यददान्मह्य G5 तस्मादहमिदं वेद्मि

28 Ś1 K1-3 D2.5 S om उवाच (M3.5 om the ref). — d) Ś1 K1 रथोत्तम, B6 S रथ तत (T2 G4-5 °दा)

29 a) S रथात्तु (for विर°) K3 4 विद्रुतं — b) A few MSS महाबल S गधर्वं सुमहा° — c) Ñ1 °तेजो विमूढ Ś1 K1 2 Da तु (for च) M6-8 °तेज.प्रसमूढ — d) Ñ1 3 M5 पराङ्मुखं, G2 3 अधोमुखं

31 d) Ś1 K0 2 3 Ñ1.3 G1.6 M5 परित्राणम्

32 Ś1 K1-3 D1 G1 6 M6-8 गंधर्वी, T G2 5 कुभीनसी, G1 3 4 M3 5 om the ref — a) Ś1 K0 D5 त्व मे, G3 स त्व, M3 5 मां त्व, M6-8 त्व मा K3 4 Ñ3 V1 B D (except D5) त्रायस्व मा Ñ V1 B D महाभाग — b) G1.2 पतिं चैव — c) Ś1 K Ñ V1 Dn2 D1 5 G3

C 1. 6471
B 1. 170. 33
K. 1. 169. 33

युधिष्ठिर उवाच ।

युद्धे जितं यशोहीनं स्त्रीनाथमपराक्रमम् ।
को नु हन्याद्रिपुं त्वादृङ् मुञ्चेमं रिपुसूदन ॥ ३३

अर्जुन उवाच ।

अङ्गेमं प्रतिपद्यस्व गच्छ गन्धर्व मा शुचः ।
प्रदिशत्यभयं तेऽद्य कुरुराजो युधिष्ठिरः ॥ ३४

गन्धर्व उवाच ।

जितोऽहं पूर्वकं नाम मुञ्चाम्यङ्गारपर्णताम् ।
न च श्लाघे बलेनाद्य न नाम्ना जनसंसदि ॥ ३५
साध्विमं लब्धवाँल्लाभं योऽहं दिव्यास्त्रधारिणम् ।
गान्धर्व्या मायया योद्धुमिच्छामि वयसा वरम् ॥ ३६

अस्त्राग्निना विचित्रोऽयं दग्धो मे रथ उत्तमः ।
सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम् ॥ ३७
संभृता चैव विद्येयं तपसेह पुरा मया ।
निवेदयिष्ये तामद्य प्राणदाय महात्मने ॥ ३८
संस्तम्भितं हि तरसा जितं शरणमागतम् ।
योऽरिं संयोजयेत्प्राणैः कल्याणं किं न सोऽर्हति ॥ ३९
चाक्षुषी नाम विद्येयं यां सोमाय ददौ मनुः ।
ददौ स विश्वावसवे मह्यं विश्वावसुर्ददौ ॥ ४०
सेयं कापुरुषं प्राप्ता गुरुदत्ता प्रणश्यति ।
आगमोऽस्या मया प्रोक्तो वीर्यं प्रतिनिबोध मे ॥ ४१
यच्चक्षुषा द्रष्टुमिच्छेत्त्रिषु लोकेषु किंचन ।

गधर्वी Ś1 Ko 1 Ñ V1 D4 G3 प्राप्ता — c) Ś1 Ko 1.2 Ñ V1 B2 Dn1.n2 D4 G2 °नसी Ko 4 B3 G4 (sup lin) त्रिभो — After 32, K4 ins

1716* दीन वाक्य सु तच्छ्रुत्वा युधिष्ठिर उवाच ह ।;
while Da Dn2 ins

1717* दृष्ट्वोवाच महाबाहुः फाल्गुन च युधिष्ठिर ।;
and, finally, T G (except G1 2) ins

1718* दृष्ट्वानुग्रहमायाच पार्थं पार्थमुवाच ह ।

33 Ś1 K S om उवाच (K4 om. the ref) — a) S जित युद्धे (by transp). — b) Ñ2 V1 B1 6 Da Dn D4 नि, B1 2 D2 हि (for नु) K (except K4) सादृङ्; Ñ V1 B D तात S धनंजय महाबाहो — d) K1 D1 S अरिसूदन (T2 G1 2 °मर्दन)

34 K1 S (but not Ś1 1) om उवाच — a) Ñ1 अप्रिय; Ñ2 V1 B D जीवित; T G2 4-3 M अगेमां, G1 अगत्र; G2 अगता. — b) Ś1 Ko 1 2 Ñ1 2 B1 तेद्य; G6 तेत्र M1-3 प्रतिदिदपत्यय सेद्य — d) Ś1 K धर्मराजो — After 34, G1 ins (an additional) colophon इति समयपर्वणि गोदानातगतनोऽध्याय

35 Ś1 K1 S om उवाच — a) Ś1 K N1.2 B2 D4 पूर्वं [illegible] — b) T1 G (except G1) M2 °पर्णता — T1 om 35c-36b — c) Ś1 K1 Dn1 n2 D1 न च श्लाघ्ये; K4 B1 (m as in text) न च श्लाघ्यो, Ñ1 न यशामि (sic) Ñ2 V1 B (B1 as in text) D (except D2 4.5) अत्र (for अद्य) S (T1 om) यशोहीन न च श्लाघ्य — d) S (T1 om) [illegible] (for न नाम्ना)

36 T1 om 36 (cf v 1 35) — a) G1 जितवान् [illegible] (m as in text) [illegible] नाम (for दाम) — b) Ñ2 D2 G1.2 M6-8 सोह; G6 यो हि — c) Ś1 Ko 4 Ñ2 गधर्व्यां; Ñ1 गांधर्वं; S (T1 om) गधर्व K4 Ñ2 V1 B D इच्छामि; G1 चोक्तम्; G2 योक्तुम्; G6 चोर्ध्वम् (for योद्धुम्) — d) Only Ś1 as in text! Ko च सम्य[ग]वरो वर; K1 इच्छाम्यवयमापर (sic), K2 इच्छाम्यमरयोधिन; K3 इच्छाम्यवरजो वर; K4 Ñ2 V1 B D सयोजयितुमर्जुन; Ñ1 इच्छाम्यसमयगोचर; Ñ3 इच्छाम्येव च यो वर; T2 G3 M इच्छाम्य(G3 मि)वरया वर; G1 3 4 6 इच्छामि परया प(G1.6 च)र, G4 इच्छाम्यमितपौरुष

38 a) Ś1 K1 चेह, S स्येव (G1 सैव; G4 त्विह) — b) Ś1 K D4 तपसा चे; D1 G4 °सैव; T2 G6 °सेव N1 2 V1 B1 6 Dn D1 T G (except G6) मया पुरा (by transp)

39 a) Ñ2 V1 B D सस्तम्भयित्वा S च (for हि). — c) K1 corrupt. K4 Ñ2 V1 B D G1 यो रिपु योज°.

40 b) S (except M1.2) मनुर्ददौ (by transp) — c) D1 तां ददौ विश्वा°; G1 2 स विश्वावसवे मह्य — d) Ko 1 2 Ñ V1 B D मम; G1 2 इमां (for मह्य). K4 विश्वावसुर्ददौ मम

41 b) Ko वि नश्यति; K2 4 विन° — c) G1.2 आगमोक्ता Ś1 K1 2 यथा (for मया) Ś1 K1 2 G1 2 प्रोक्ता; G2 प्राप्ता M1 2 अर्हसि त्वमिमां प्रभु — d) K Ñ2 वीर्यं त्वयि (K1 त्व च); Ñ1 नाम वीर्यं Ś1 वीर्यं त्वमपि बोध मे; S तस्या (T1 °स्य) वीर्यं निबोधत (T1 G2 °य)

42 b) Ñ1 त्रिलोकेषु च किं पुन. — c) S °दो रूप

43 a) K4 Ñ2 V1 B (B1 marg) D (Da erroneously) Arjp चक्षुपाद्रेन (D2 orig समवर्तेन); Ñ1.2 (m as in text) समानवच; G1 समानविद; G2 अन्यसमान; M1 2 जिज्ञा

तत्पश्येद्यादृशं चेच्छेत्तादृशं द्रष्टुमर्हति ॥ ४२
समानपद्मे षण्मासान्स्थितो विद्यां लभेदिमाम् ।
अनुनेष्याम्यहं विद्यां स्वयं तुभ्यं व्रते कृते ॥ ४३
विद्यया ह्यनया राजन्वयं नृभ्यो विशेषिताः ।
अविशिष्टाश्च देवानामनुभावप्रवर्तिताः ॥ ४४
गन्धर्वजानामश्वानामहं पुरुषसत्तम ।
भ्रातृभ्यस्तव पञ्चभ्यः पृथग्दाता शतं शतम् ॥ ४५
देवगन्धर्ववाहास्ते दिव्यगन्धा मनोगमाः ।
क्षीणाः क्षीणा भवन्त्येते न हीयन्ते च रंहसः ॥४६
पुरा कृतं महेन्द्रस्य वज्रं वृत्रनिबर्हणे ।
दशधा शतधा चैव तच्छीर्णं वृत्रमूर्धनि ॥ ४७
ततो भागीकृतो देवैर्वज्रभाग उपास्यते ।
लोके यत्साधनं किंचित्सा वै वज्रतनुः स्मृता ॥४८
वज्रपाणिर्ब्राह्मणः स्यात्क्षत्रं वज्ररथं स्मृतम् ।
वैश्या वै दानवज्राश्च कर्मवज्रा यवीयसः ॥ ४९
वज्रं क्षत्रस्य वाजिनो अवध्या वाजिनः स्मृताः ।
रथाङ्गं वडवा सूते सूताश्वाश्वेषु ये मताः ॥ ५०
कामवर्णाः कामजवाः कामतः समुपस्थिताः ।
इमे गन्धर्वजाः कामं पूरयिष्यन्ति ते हयाः ॥ ५१

अर्जुन उवाच ।

यदि प्रीतेन वा दत्तं संशये जीवितस्य वा ।
विद्या वित्तं श्रुतं वापि न तद्गन्धर्व कामये ॥ ५२

गन्धर्व उवाच ।

संयोगो वै प्रीतिकरः संसत्सु प्रतिदृश्यते ।

O 1 6461
B 1 170 56
K 1 166 55

समान°, Cd as in text M6-8 विद्यासमाना विद्यासां ※ Arj. एकपादेनेति प्रथेषु स्पष्टार्थं ।※ — c) Ñ1 8 S (except T2 G4-6) अन्वानेष्यामि, Cd as in text. D1 अद्य (for अहं).

44 b) K2-4 Ñ1 8 B1m Da D1 विशेषत°, S °षिण ; Cd as in text. — c) Ś1 K1 2 Ñ3 अवशिष्ट (Ñ8 °ष्टा); K0 D5 अनुसृष्ट; K3 4 अविशिष्ट, Ñ1 अनुशिष्टा , S अनाहार्या (M6-8 अनहाल्पा) Ś1 K (except K2) D5 तु (for च) — d) Ś1 K (except K4) Ñ1 अनुभाव प्र°, Ñ2 V1 B D °दर्शिन (D5 °वर्तिता), T1 G2 8 M °वार्तिन , T2 G1-6 °वर्तना (T2 °न.), G1 °कीर्तित. — Cd appears to have read अवशिष्टश्च देवानामनुभाव प्रवर्तिता

45 b) Ś1 भरतसत्तम — c) N2 V1 B D (except D5) तुभ्य च (for पञ्च°) — d) G2 पृथग्भूतं

46 a) K4 Ñ2 V1 B D दिव्यवर्णा Ś1 K Ñ1.8 B1 D2.5 °रमा°; B3m Da Dn D1 S °जवा — c) K (except K2) Ñ V1 B D (except D1) G8 क्षीणाक्षीणा, T1 क्षणे क्षणे, T2 G5 6 क्षणे क्षीणे, G1 अक्षीणाश्च, G3 4 M क्षीणे क्षीणे; Nilp as in text S भवत्यन्ये — d) Ś1 K1 हि (for च) K2 G1 4 M8 रहसा, Cd as in text

47 b) K0 8 Ñ2 V1 B D °निबर्हण, M5 °निसूदने

48 ab) Ñ1 भागीकृत and वज्रभागम् S तस्य भाग पृथग्भूत° सर्वैर्भूतैरुपास्यते — c) Ñ2 8 V1 B6 Dn यशोधन किंचित्, B1 8 5 D4 य साधक कश्चित् Cd cites साधनं (=हस्त्यश्वादि) — d) K4 B1 8 5 स वै, Ñ1 तद्धि; Ñ2 8 V1 B6 Dn2 सैव K4 B1 8. 5 स्मृत°, G4 स्थिता

49 ab) Arjp वज्रधर (for °रथ) S ब्रह्म वज्रं ब्राह्मणानां क्षत्रियाणां रथ विदु° — cd) Ś1 K1 धन° (for दान°) K0 D5 स्यु° (for च) S वैश्यवज्र तु (G1 हि) वै सीरं (G8 शीलं) शुश्रूषा हीन(G8 शूद्र)योनिषु.

50 a) K0-8 क्षत्रस्य वाजिनो वज्र; K4 क्षत्रस्य वाजिवज्र हि, Ñ1 V1 B D क्षत्रवज्रस्य भा(D1 °भो)गेन (D2 क्षत्रस्य वज्रभागेन), S साधन क्षत्रधर्मस्य (G1 °धर्माणा) — b) Ś1 K0 1 ह्यवध्या, S मनोज्ञा — c) T1 G1 8-6 M8 5 च तथा, T2 G2 च रथा° (G2 °थः); M6-8 च तत°, Cd वडवा (as in text). S सूतो — d) Ñ2 V1 D (except Da) शूरा (for सूता°) S धनुश्च भरतर्षभ

51 a) K0 D5 °वीर्या (for °वर्णा) K0 D5 T G °गमा , M °बला — b) T1 G1 2 M3.5 कामगा ; M6-8 °दा — c) Ñ2 V1 B D (except Da1) इति (for इमे) — After गंधर्व in 51c, K1 (erroneously) reads 1 155. 17—1 158 13, the portion which had been om previously — d) Ś1 Ñ2 V1 B8 Dn2 D5 मे हया , G2 तेर्जुन

52 Ś1 K1 S om उवाच — a) Ś1 K1-3 यद्प्रीतेन N2 V1 B (except B5) D से, G8 ना-; M5 वै (for वा) — b) K2 D2 च, T2 G5 6 वै (for वा) — c) Da D1.2 4 T2 G4 6 विद्यां Ñ2 V1 B1 8.6 D (except D5) धन, B5 वलं (for वित्त) S शुभं (for श्रुत) B5 T1 G1-3 चापि. — d) Ñ2 V1 B D (except D5) रोचये (B5 °ते) (for काम°)

53 Ś1 K1 S om. उवाच — a) Ś1 K1.8 Ñ1 B8(m

जीवितस्य प्रदानेन प्रीतो विद्यां ददामि ते ॥ ५३
त्वत्तो ह्यहं ग्रहीष्यामि अस्त्रमाग्नेयमुत्तमम् ।
तथैव सख्यं बीभत्सो चिराय भरतर्षभ ॥ ५४

अर्जुन उवाच ।
त्वत्तोऽस्त्रेण वृणोम्यश्वान्संयोगः शाश्वतोऽस्तु नौ ।
सखे तद्ब्रूहि गन्धर्व युष्मभ्यो यद्भयं त्यजेत् ॥ ५५

इति श्रीमहाभारते आदिपर्वणि अष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥

१५९

अर्जुन उवाच ।
कारणं ब्रूहि गन्धर्व किं तद्येन स्म धर्षिताः ।
यान्तो ब्रह्मविदः सन्तः सर्वे रात्रावरिंदम ॥ १

गन्धर्व उवाच ।
अनग्नयोऽनाहुतयो न च विप्रपुरस्कृताः ।
यूयं ततो धर्षिताः स्थ मया पाण्डवनन्दन ॥ २
यक्षराक्षसगन्धर्वाः पिशाचोरगमानवाः ।
विस्तरं कुरुवंशस्य श्रीमतः कथयन्ति ते ॥ ३
नारदप्रभृतीनां च देवर्षीणां मया श्रुतम् ।
गुणान्कथयतां वीर पूर्वेषां तव धीमताम् ॥ ४

---

as in text) ₃ ₆ Cd समोगो; G₂ सुयोगो — ᵇ) K₀ ₃ ₄ Ñ₁ ₃ G₁.₄ M न सत्सु, Ñ₂ V₁ B D मदस्तु; T₁ G₁.₃ सत्सु स; T₂ G₆ सपग्सु

54 ᵃ) Ñ V₁ B D (except D₁) त्वत्तोप्याह — ᵇ) Ś₁ G₁ द्याग्नम्; G₅ चाग्नम् — ᶜ) Ñ₂ V₁ B₂ Dn D₅ योग्य (for सख्य)

55 Ś₁ K₁ S om उवाच — ᵃ) S अस्त्रेणाश्व वृणे त्वत्त — ᵇ) K₀ ₃ ₄ Ñ₁ ₃ न ; S मे (for नौ) — K₂ om 55ᶜᵈ — ᶜ) Ś₁ K₁ म ये स°; K₀ ₃ ₄ ममैत°; D₃ सर्व त°; D₅ मामेत° S सखे गंधर्व तद्ब्रूहि (G₃ तव्य मा) — ᵈ) Ś₁ K₁ युष्मत्तो; K₂ ₄ Dn₁ n₂ D₁ M₆-₈ °भ्यो K₁ यत्; G₃ भय (for भय) Ñ₃ V₁ Dn भयेषु; D₁ जयेत्

Colophon om in K₃ Ñ₁ V₁ B Da Dn D₁ ₄ — *Major parvan* T₂ G M सभय° (for आदि°) — *Sub-parvan* Ś₁ K₀ ₁ ₃ ₄ Ñ₂ अगारपर्ण; B₁ चैत्ररथ — *Adhy name* K₀ ₃ ₄ D₃ गधर्वार्जुनयो सख्य; M₃ ₅ अगारपर्णपराजय.. — *Adhy no* (figures, words or both) T₁ 166, T₂ G M 118 (G₁ 120, G₃ 117) — *Śloka no* M₃ 77

159

1 Ś₁ K₁ S om उवाच; K₂ Ñ₂ V₁ B Da Dn D₁ ₄ om the ref D₃ पैश° उ° — G₃ (hapl) om 1ᵇ-3ᵃ — ᵇ) K₃ ₄ D₃ M₃ तद्येनास्म; G₁ तत्येन हि — ᶜᵈ) S (G₃ om) मया (G₂ °म); C1 as in text. Ñ₃ ₃ V₁ B Dn D₅ वेदविद्. C1 as in text Ñ₃ V₁ B D (except D₁) सर्वे सन्त (by transp) K₂ Ñ₁ ₃ V₁ B₂ D (except D₁) परंतप

2 G₃ om 2 (of v l. 1). Ś₁ K₁ S om उवाच. — ᵃ) S (G₃ om) धर्षिता स्थ ततो यूय — ᵈ) Ñ₁.₂ V₁ B D मया वै पांडुनंदन — After 2, G₁.₃ ins 1710*

3 G₃ om 3ᵃ (of v l. 1) — ᵃ) K₃ ₄ S (G₃ om) °गंधर्व — ᵇ) K₀ ₂ ₄ Ñ₂ V₁ B D M °दानवा — K₄ (om line 5) T₁ G₁ (om. lines 2-5) M ins after 3ᵃᵇ G₁.₃, after 2

1710* धर्षयन्ति नरव्याघ्र न ब्राह्मणपुरस्कृतान् ।
जानता च मया सम्यक्तेजश्चाभिजन च य ।
इयमभिमता श्रेष्ठ धर्षितु वै कृता मति ।
को हि वक्षितु लोकेषु न वेद भरतर्षभ ।
स्वैर्गुणैर्विस्तृत श्रीमद्यशोऽग्र्य भूरिवर्चसाम् ।

[(L 2) K₄ °भि न वचिता°; T₁ °पि जन च न ; G₁ °पि धनजय; G₃ °भिजन यच — (L 3) K₄ इत्यभिप्रायत ; T₁ इय मतिमता; G₁ इदमभिमता K₄ धर्षणाय; G₁ ₃ धर्षिता वै G₁ पुरा मति ; G₃ पुरो मति — (L. 5) T₁ विथित; G₁ विश्रित, G₃ विदित (for विस्तृत)]

— After the above, M *repeats* 3ᵃᵇ (v l पन्नगा for दानवा) — ᶜ) B₃ T₂ G (except G₃) M₃ विस्तार — ᵈ) K₄ B₃ Da₁ D₁ धीमत ; Ñ₁ ₂ V₁ B₂ ₃ Da₂ Dn D₃ ₄ धीमत ; B₁ सतत; M₃ विस्तारात् (for श्री°) Da ये; T₁ G₁ मे (for ते)

4 ᵃ) G₃ °प्रमुखानां K₃ Ñ₂ V₁ Dn₁ n₂ D₃ तु (for च) — ᵇ) S महर्षीणां Ś₁ K (except K₁) मया श्रुत ; S मया पुरा (G₃ पुरा मया) — Ś₁ K Ñ₁ ₃ om. 4ᶜᵈ — ᶜᵈ) S श्रुत कथयतां पार्थ पुरुणां यशमाहित..

5 Da om 5ᵃᵇ — ᵃ) K₀ D₃ सर्वा (for कृत्स्ना) — ᵇ) Ś₁ K₁ प्रभाव; Ñ₁ °पात्; D₁ G₃ °भव K₄ T

स्वयं चापि मया दृष्टश्चरता सागराम्बराम् ।
इमां वसुमतीं कृत्स्नां प्रभावः स्वकुलस्य ते ॥ ५
यो धनुषि चाचार्यमभिजानामि तेऽर्जुन ।
विश्रुतं त्रिषु लोकेषु भारद्वाजं यशस्विनम् ॥ ६
धर्मं वायुं च शक्रं च विजानाम्यश्विनौ तथा ।
पाण्डुं च कुरुशार्दूल षडेतान्कुलवर्धनान् ।
पितॄनेतानहं पार्थ देवमानुषसत्तमान् ॥ ७
दिव्यात्मानो महात्मानः सर्वशस्त्रभृतां वराः ।
भवन्तो भ्रातरः शूराः सर्वे सुचरितव्रताः ॥ ८
उत्तमां तु मनोबुद्धिं भवतां भावितात्मनाम् ।
जानन्नपि च वः पार्थ कृतवानिह धर्षणाम् ॥ ९
स्त्रीसकाशे च कौरव्य न पुमान्क्षन्तुमर्हति ।
धर्षणामात्मनः पश्यन्बाहुद्रविणमाश्रितः ॥ १०
नक्तं च बलमस्माकं भूय एवाभिवर्धते ।
यतस्ततो मां कौन्तेय सदारं मन्युराविशत् ॥ ११
सोऽहं त्वयेह विजितः संख्ये तापत्यवर्धन ।
येन तेनेह विधिना कीर्त्यमानं निबोध मे ॥ १२
ब्रह्मचर्यं परो धर्मः स चापि नियतस्त्वयि ।
यस्मात्तस्मादहं पार्थ रणेऽस्मिन्विजितस्त्वया ॥ १३
यस्तु स्यात्क्षत्रियः कश्चित्कामवृत्तः परंतप ।
नक्तं च युधि युध्येत न स जीवेत्कथंचन ॥ १४
यस्तु स्यात्कामवृत्तोऽपि राजा तापत्य संगरे ।
जयेन्नक्तंचरान्सर्वान्स पुरोहितधूर्गतः ॥ १५
तस्मात्तापत्य यत्किंचिन्नृणां श्रेय इहेप्सितम् ।
तस्मिन्कर्मणि योक्तव्या दान्तात्मानः पुरोहिताः॥१६
वेदे षडङ्गे निरताः शुचयः सत्यवादिनः ।

C 1 6517
B 1 170 75
K 1 186 79

G1.2.6 प्रभा(T1 °भ)वस्य Ko स; K2 3 D2 5 च, Ñ2 V1 B3.6 Dn1.n2 सु-; Dn3 D4 तु (for स्व) S च (for ते)

6 b) S (except M3) च (for ते) — After 6, S ins.

1720* सर्ववेदविदां श्रेष्ठ सर्वशास्त्रभृता वरम् ।
द्रोणमिष्वस्त्रकुशलं धनुष्यङ्गिरसा वरम् ।
[(L. 1) T1 G3 M3.5 7 °शास्त्रभृतां]

After the above, T2 G1.4.5 *repeat* 3^{ab} and 1719* (G4 om line 1)

7 a) G3 शक्रं च वायुं (by transp). — b) G6 अपि (for तथा) — c) K1 B1 5 D2.5 कुरुशार्दूल, S नृपशार्दूल (G1 M °ल) — d) Ś1 K1 पाण्डवान् (for षडेतान्) Ko वंश°; K3 Ñ2 V1 B3 5 Dn1 n2 D1 5 कुरु°; S कीर्तिवर्धनान् (T G3 3 M5 °न) K1 पांडु वा कुलवर्धनं — D1 om. 7^{ef} — f) G6 पुत्रान् (for पितॄन्) K1 °सत्तमम्.

8 b) K2 3 सर्वे (for सर्व-) Ko °शास्त्रभृतां, G1 °शास्त्रविदा Ñ1 सर्वशास्त्रविशारदा — cd) G6 transp शूरा. and सर्वे S (except T1) च (for सु)

9 a) K1 corrupt Ñ V1 B D च (for तु) T2 G4-6 मनोवृत्तिं Ko 3.4 उत्तमामप्यहं बुद्धिं — c) Ko 3 हि; K4 ह (for च) K3.4 T2 G M3 पार्था. — d) Ś1 इव (for इह) K2 Dn3 धर्षणं K1 कृतवान्धर्षणामिमा, S °वान्सप्रधर्षण (G1 °णां, G3 °ण.)

10 a) T G1-3.5 तु, M5 [ऽ]पि; M6-8 हि (for च) T1 G1-3 कौंतेय — G2.3 (hapl) om 10^b-11^c — b) K (except Ko) D5 क (for न) — c) Ś1 K उद्यत (for आत्मन°) — d) Ś1 K (except K4) B5 G1 आत्मन° (for आश्रित)

12 a) Ñ1 त्वया हि, G1 त्वयैव — b) S (except M3) सखे; Cd as in text. Ś1 K कौरव(Ko 3 तापत्य)नंदन (K4 °न), Da1 °वर्धन°, Cd as in text — c) Ko 3 येने°, K4 T1 G1-3 M केने° (for तेने°) T2 G4-6 येनेह विधिना सर्वं

13 a) K1 °चर्या परो, K3 °चर्ये परो, G3 °चर्यपरो T1 तपो धर्म , G6 पुरोधर्म° — b) G1.2 सदा विनियतस्; G3 स चापि विनयस्; M5 स चापि निहितस् Ś1 G2 त्वया — c) K4 यस्माद्यातास्यह पार्थ, M5 यस्मादहं पार्थ विभो — d) K2 3 Ñ2 V1 B D T G4 M3 5 रणेस्मि वि°; Ñ1 योस्मि वै वि°.

14 b) M6-8 कामवृत्ति Ko Da Dn1.n3 D1.5 M3 परतप°, Ñ1.3 B (except B6) D2 कथंचन — c) Ś1 प्रवियुध्ये च, K1 प्रविवुध्येषु; G1.3 युधि युज्येत (G1 मध्येत) T1 नक्तचर च युध्येत — d) Ñ1 नासौ जीवेत् B (except B6) असशय (for कथ°)

15 b) Ñ2 V1 B D (except D5) पार्थ (B1.5 साध) ब्रह्मपुरस्कृत , S राजा राजीवलोचन — c) Ko G5 राजन् (for सर्वान्) — d) B1(m as in text) 3.5 स धूर्गतपुरोहित (by transp)

16 b) Ñ1 इहोद्यतं; G2 इहोदित B5 नृपाणा श्रेय ईप्सित. — c) Ñ1 ये योज्या (for योक्त°) — d) Ñ1 धर्मात्मान , T1 G1-3 M (except M5) यतात्मान. (G2 °त्मा स) G2 पुरोहित

17 K4 G3 om. 17 — a) D5 वेदे शास्त्रे च G4 वेदे°

धर्मात्मानः कृतात्मानः स्युर्नृपाणां पुरोहिताः ॥ १७
जयश्च नियतो राज्ञः स्वर्गश्च स्यादनन्तरम् ।
यस्य स्याद्धर्मविद्वाग्मी पुरोधाः शीलवाञ्शुचिः ॥ १८
लाभं लब्धुमलब्धं हि लब्धं च परिरक्षितुम् ।
पुरोहितं प्रकुर्वीत राजा गुणसमन्वितम् ॥ १९
पुरोहितमते तिष्ठेद्य इच्छेत्पृथिवीं नृपः ।
प्राप्तुं मेरुवरोत्तंसां सर्वशः सागराम्बराम् ॥ २०
न हि केवलशौर्येण तापत्याभिजनेन च ।
जयेदब्राह्मणः कश्चिद्भूमिं भूमिपतिः क्वचित् ॥ २१
तस्मादेवं विजानीहि कुरूणां वंशवर्धन ।
ब्राह्मणप्रमुखं राज्यं शक्यं पालयितुं चिरम् ॥ २२

इति श्रीमहाभारते आदिपर्वणि एकोनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥

१६०

अर्जुन उवाच ।
तापत्य इति यद्वाक्यमुक्तवानसि मामिह ।
तदहं ज्ञातुमिच्छामि तापत्यार्थविनिश्चयम् ॥ १
तपती नाम का चैषा तापत्या यत्कृते वयम् ।
कौन्तेया हि वयं साधो तत्त्वमिच्छामि वेदितुम् ॥ २
वैशंपायन उवाच ।
एवमुक्तः स गन्धर्वः कुन्तीपुत्रं धनंजयम् ।
विश्रुतां त्रिषु लोकेषु श्रावयामास वै कथाम् ॥ ३

स्वर्गे च T1 G2.3 M2.3 नियता ; G1.4 M6-8 निष्णाता — d) T1 G3.4.6 M1 स्युर्नृपस्य; G1 सून्नृपस्य, G5 स्यन्नृपस्य; M6-8 ये नृपस्य

18 a) Ś1 निहितो; K1.3 Ñ1 निर° K2 राज्ञा; K4 राज्ञां; G1 राजन्; M7 राज्ञे — b) Ñ3 °नतर° Ś1 K1 स्वर्गश्चास्य निर(K1 तद)न्तरं; K3 Ñ1.2 V1 B1.3.4 Da D1.3.4 स्वर्गश्च त(Ñ1 °श्चास्य)दनन्तरं; K3 B3 Da D5 स्वर्गस्तस्मादनन्तरं

19 a) Ś1 K3.4 Ñ1 Da B1.6 लाभं लब्धम् Ko Ñ1 D1 च, K4 Ñ3 V1 B1.2.6 D वा (for हि) S लब्धस्य च लाभाय — b) Ñ3 V1 B3 Dn D1.3 वा (for च) S लब्धस्य परिरक्षणे

20 a) Ñ3 V1 B D इच्छेद्भूमिमात्मन — c) Ś1 K1 T1 G1 M1.3 प्राप्त, K3 प्राप्तां Ko.3.4 Cd मेरुधरो ; K4 Ñ3 V1 B D वसुमतीं सर्वां (K4 पृथ्वीं), T1 मेरुवनो ; G3 सेन घनोत्तमां — d) K (except K1) B1 सर्वत S सागरांबरधारिणीं

21 a) G3 न हि मे पर° — b) Ś1 K (except K1) Ñ1.3 D2 वा (for च) — c) Ko जयेत्प्राज्ञा°; K3 Ñ1 °द्दर्मा ; G3 जयेषा त्रा° — d) T G M3 भुवि (for भूमिं) Da1 भूमिपर

22 b) K2 Da1 M1 °वर्धन , T2 G1-3 कीर्तिवर्धन — d) Ñ1 भुवि; T2 G3 ज्ञगत्; Cd चिरम् (as in text)

Colophon Major parvan T2 G M संभव° (for आदि°) — Sub-parvan K Ñ2 अगारपर्व; Ñ1.3 V1 B1 चैत्ररथ, to it Ko-3 add समास Ś1 (om. the sub-parvan name) mentions only अगारपर्वगृह, followed by समासं; B1.6 Da Dn D1.3 (likewise) mention only तापत्य — Adhy name Ko.3.4 पुरोहितप्रशंसा; Ñ1.2 V1 गन्धर्व पराभव°; B3 D1 गन्धर्वोपाख्यान — Adhy no (figures, words or both) Dn2 169, D4m 172, T1 167, T2 G M 119 (G1 121, G3 118). — S'loka no Dn 79 (Dn2 78), M3 27 — Aggregate s'loka no Dn2 6510

160

1 Ś1 K1 S om उवाच — a) G1 तापत्यम् Da1 D4 G1.4 तद्वाक्यम् Cd as in text — b) M6-8 इति (for असि) K2 मेनघ, D2 पन्मम (for मामिह) — c) Ś1 तदलं; Ñ3 B3 D4 तमहं Ko.3.4 D4 G1-3 M6-8 श्रोतु मिच्छामि — d) Ñ3 V1 तापत्यार्थं विनिश्चितं

2 c) D1 तात; G6 मोघ (for साधो) — d) G1 M3 ज्ञातुमिच्छामि; G3.4.6 M2.6-8 यत्तदि° — After 2, D3 ins

1721* तत्सर्वं त्वमशेषेण सदृशाकारपर्णक ।

3 Ś1 K (except Ko) D3.4 S om उवाच (T2 om the ref.) — a) Ñ1.3 T1 G3 तु (for स) D3 एवं पार्थेन गदृष्ट — b) D3 शुद्धभावेन भारत; S प्रत्युवाच यशस्विनं — c) K4 Ñ1.3 V1 Dn विश्रुत; S अर्जुन — d) Ñ1 तां कथां S विश्रुतः श्रुतवित् (T1 अशपीत्; G3 श्रुतवान्) यथ

गन्धर्व उवाच ।

हन्त ते कथयिष्यामि कथामेतां मनोरमाम् ।
यथावदखिलां पार्थ धर्म्यां धर्मभृतां वर ॥ ४
उक्तवानसि येन त्वां तापत्य इति यद्वचः ।
तत्तेऽहं कथयिष्यामि शृणुष्वैकमना मम ॥ ५
य एष दिवि धिष्ण्येन नाकं व्याप्नोति तेजसा ।
एतस्य तपती नाम बभूवासदृशी सुता ॥ ६
विवस्वतो वै कौन्तेय सावित्र्यवरजा विभो ।
विश्रुता त्रिषु लोकेषु तपती तपसा युता ॥ ७
न देवी नासुरी चैव न यक्षी न च राक्षसी ।
नाप्सरा न च गन्धर्वी तथा रूपेण काचन ॥ ८
सुविभक्तानवद्याङ्गी स्वसितायतलोचना ।
स्वाचारा चैव साध्वी च सुवेषा चैव भामिनी ॥ ९
न तस्याः सदृशं कंचित्त्रिषु लोकेषु भारत ।
भर्तारं सविता मेने रूपशीलकुलश्रुतैः ॥ १०
संप्राप्तयौवनां पश्यन्देयां दुहितरं तु ताम् ।
नोपलेभे ततः शान्तिं संप्रदानं विचिन्तयन् ॥ ११
अथर्क्षपुत्रः कौन्तेय कुरूणामृषभो बली ।
सूर्यमाराधयामास नृपः संवरणः सदा ॥ १२
अर्घ्यमाल्योपहारैश्च शश्वच्च नृपतिर्यतः ।
नियमैरुपवासैश्च तपोभिर्विविधैरपि ॥ १३
शुश्रूषुरनहंवादी शुचिः पौरवनन्दनः ।
अंशुमन्तं समुद्यन्तं पूजयामास भक्तिमान् ॥ १४
ततः कृतज्ञं धर्मज्ञं रूपेणासदृशं भुवि ।

C 1 6530
B 1 171 15
K 1 187 15

---

4 Ś1 K1 S om उवाच (G6 M6–8 om. the ref) — a) K4 T2 G8 अह ते — b) S अति (for एतां) T1 G1 2 M मनोहरां, G8 महच्चरां — c) B5 G8 6 अखिल; Da आर्थिन — d) K3 G8 धन्यां, Ñ1 सर्वं (for धर्म्यां) Ñ2 V1 B D (except D5) सर्वबुद्धिमता वर

5 a) B5 पार्थ त्वां; T G यद्वाक्य — b) Ś1 K1 त्रिर्वच° (Cd cites त्रि); D2 4 तद्वच. Ñ1 इति ते निखिल वच — c) Ś1 K2–4 Ñ1 कीर्तयिष्यामि; T1 सप्रवक्ष्यामि — d) K4 Da1 Dn D1 भव; S नृप (for मम)

6 a) T1 दीव्यन्वै; T2 G1, 2 4–6 तेजस्वी, G8 M8 5 दीपि(G8 °वि)ष्यन्, M6–8 दीप्तांशुर; Cd धिष्ण्येन (as in text) — b) T2 G5 लोक (for नाकं) — c) Here and below Ś1 तापती (for तपती) — d) N (except K4 Ñ1 3) T1 G8 5 बभूव सदृशी G1 reads both शुभा and सुता

7 a) T1 °स्वतोस्य N2 V1 Dn देवस्य (for कौन्ते°) — b) Ś1 K1, 2 4 शुभा, Ko 3 M8 5 सुता; T2 नृप (for विभो) — d) T2 G1–6 तपसान्विता

8 a) T1 चैपा; M8 यक्षी (for चैव) — b) M6 नोरगा (for न यक्षी) S न च किंनरी — d) T1 M तथारूपा हि, T2 G1 4–6 °रूपा न, G2 °कारा न; G8 °चारा न

9 a) K2 4 G6 सुस्मिता°; T1 G1 3 M5 स्वचिता° — d) S1 °शीला, K1 Ñ3 B1 Dn2 D2 °वेशा Ñ1, 3 B (except B5) Da D2 भाविनी

10 a) B1 3 D2 न ह्यस्या D2 G6 सदृश , T1 G3 4 °शी; G2 °शा Ś1 Ko 2 4 B3 Dn1, n3 D1 4 T2 G1, 2, 5 M5 किंचित्; K1 D2 G6 कश्चित्; T1 G3, 4 काचित् — b) Da1 विद्यते (for भार°) — c) G4 6 स पिता मेने — d) K1 °कुलान्वितै , K3 T2 G4–6 °कुलै. श्रुतै°; Ñ1 रूपौदार्यकुलश्रुतै , Ñ2 V1 B D °गुणश्रुतै

11 b) D5 S देवो (for देयां) K (except K2) तत , Ñ1 च तां; B5 तदा; D2 तथा; S शुभां — After 11ab, D4 (marg sec m) S ins.

1722* व्यष्टवर्षां तु तां पश्यन्सविता रूपशालिनीम् ।
[T1 तां पश्यद्व्यष्टवर्षां स, G1 स व्यष्टवर्षां ता पश्यत्; G2 M6–8 द्विर(G2 °अ)ष्टवर्षां तां पश्यन्]

— c) Ś1 K3, 4 तदा (for तत) — d) Ś1 K1 संप्रदाय (K1 °तु) तु चिं°, K2 प्रदानमनुचिं°; K3 4 B (except B6) D4 °दानं स चिं°; Ñ1 °दानमचिं°, D5 °दानं च चिं°

12 a) Ñ1 Da D2 M5 अथार्क्ष° D4 तामवेक्ष्य तु कौं° — K1 om 12b–36a — b) Ko प्रथितो (for ऋषभो) Ñ1 वसन्, S (except T1) युवा — d) Ś1 सवरणोति हि, D4 G8 °णस्तथा

13 K1 om 13 (cf v l 12) — a) Ko 4 Ñ1 3 अर्घ्य-माल्यो(Ñ1 °पाद्यो)पहाराभ्यां, K3 3 अर्घमाल्योपहारैस्तु, Ñ2 V1 B D °पहाराद्यै (D5 °णा) — b) K2 S स (for च) S (except M8 5) तदा (for यत) Ñ2 V1 B D (except D5) गन्धैश्च नियत शुचि — d) Ś1 विविधैस्तथा

14 K1 om 14 (cf. v l 12), G6 om 14a — b) S (except T2) शश्वत् (for शुचि) Ś1 Ko 2 Ñ1, 2 V1 B5 T1 G1 3 6 M6–8 पौरवनदन, G2 कौरवनंदन. — d) Ko 3 4 D5 G5 बुद्धिमान्

15 K1 om 15 (cf v l 12) — a) K2 Da2 G5 कृतज्ञ; T1 G1–4, 6 °ज्ञो K2 G3 धर्मज्ञ, T2 G4–6 नृपतिं;

C 1 6620 B 1 172 5 K 1 182 15

तपत्याः सदृशं मेने सूर्यः संवरणं पतिम् ॥ १५
दातुमैच्छत्ततः कन्यां तस्मै संवरणाय ताम् ।
नृपोत्तमाय कौरव्य विश्रुताभिजनाय वै ॥ १६
यथा हि दिवि दीप्तांशुः प्रभासयति तेजसा ।
तथा भुवि महीपालो दीप्त्या संवरणोऽभवत् ॥ १७
यथार्चयन्ति चादित्यमुद्यन्तं ब्रह्मवादिनः ।
तथा संवरणं पार्थ ब्राह्मणावरजाः प्रजाः ॥ १८
स सोममति कान्तत्वादादित्यमति तेजसा ।
बभूव नृपतिः श्रीमान्सुहृदां दुर्हृदामपि ॥ १९
एवंगुणस्य नृपतेस्तथावृत्तस्य कौरव ।
तस्मै दातुं मनश्चक्रे तपतीं तपनः स्वयम् ॥ २०

स कदाचिदथो राजा श्रीमानुरुयशा भुवि ।
चचार मृगयां पार्थ पर्वतोपवने किल ॥ २१
चरतो मृगयां तस्य क्षुत्पिपासाश्रमान्वितः ।
ममार राज्ञः कौन्तेय गिरावप्रतिमो हयः ॥ २२
स मृताश्वश्चरन्पार्थ पद्भ्यामेव गिरौ नृपः ।
ददर्शासदृशीं लोके कन्यामायतलोचनाम् ॥ २३
स एक एकामासाद्य कन्यां तामरिमर्दनः ।
तस्थौ नृपतिशार्दूलः पश्यन्नविचलेक्षणः ॥ २४
स हि तां तर्कयामास रूपतो नृपतिः श्रियम् ।
पुनः संतर्कयामास रवेर्भ्रष्टामिव प्रभाम् ॥ २५
गिरिप्रस्थे तु सा यस्मिन्स्थिता स्वसितलोचना ।

G. स — c) Ko 2.4 D1 तपस्या — d) K4 G1 प्रति (for पतिम्)

16 K1 om 16 (cf v l 12) — a) K. तामैच्छत तत कन्यां — b) D1 सत (for तस्मै) D2 चं (for ताम्) — c) K3 कौन्तेय (for कौर°) — d) Ko 2.4 Ñ3 V1 Dn D1.2 T1 M2 च

17 K1 om 17 (cf v l 12) — a) Ś1 Ko 4 दीप्त्या (for दिवि) — b) Ś1 K3 प्रतापयति; Ko 2.4 D1 प्रकाश°; G1 प्रताप° — T1 (hapl) om 17c-19b

18 K1 T1 om 18 (cf v l 12, 17) — a) Ś1 K2.4 Ñ1.2 यथार्चयति; Ko यथा चार्चति G1 चा नित्य (for चादित्य) — b) Ś1 धर्मवादिन — d) D1 ब्राह्मणप्रमुखा

10 b) G1 3. 4 पापान् M6-8 ना (for न) — c) Ñ3 V1 लोका°

11 a) K3 यदा, T2 G2 3 हि य — c) B1 3 (m as in text) 5 D2 नृशस° सोपि, S (except T1 G2 3) ईश. स चापि

12 a) K0 D5 S (except G3) °श्चेतरै° — b) K0 3 T2 G M3 यदा (G3 यथा) (for यदि) — c) K0 3 4 D5 T2 G1 5 6 M3 यतितास्, M6-8 यतितस् T1 G2 3 न लोकै-रीप्सितास्त्रा°, G4 शक्तैर्निवारितैस्त्रा° — d) Ś1 K1 D5 °ष्टं सदेहजी°, T1 G2 3 शक्तै° सतोखिलैरपि

13 a) Ś1 K1 एवम् (for एषाम्) — b) Ś1 K1 G4 -द्य स°; K4 T1 G2 -पि सन्, Ñ1 पि न, Ñ3 V1 B D G3 ह्यहं — cd) K0 Ñ V1 B D T1 G2 3 च (for तु) K3 Ñ V1 B D transp अह and अल Ñ V1 B1m 6 D (except D4 5) M6-8 Cd समभि°; G4 प्रतिनि° K3 °चो नाहमभिवर्तितुमुत्सहे — After 13, M6-8 read 15ab

14 a) K0 3 4 एन, T1 G2 3 दोष (for एतद्) Ñ3 V1 B5 Dn D2 ममापि चेन्नवेदेवं, B1 3 6 Da D1 4 5 ममापि च भवेदेवं (D4 5 °देतद्) — b) G4 5 ततो T1 G2 3 महान्, G4 [ऽ]भवत् — c) A few MSS उपेक्ष्य°. — d) T1 G2 3 M5 7 °पं महत्, G4 6 °पं भयं, M3 6 8

दहेदेष च मामेव निगृहीतः स्वतेजसा ॥ १५
भवतां च विजानामि सर्वलोकहितेप्सुताम् ।
तस्माद्विदध्वं यच्छ्रेयो लोकानां मम चेश्वराः ॥ १६

पितर ऊचुः ।

य एष मन्युजस्तेऽग्निर्लोकानादातुमिच्छति ।
अप्सु तं मुञ्च भद्रं ते लोका ह्यप्सु प्रतिष्ठिताः ॥ १७
आपोमयाः सर्वरसाः सर्वमापोमयं जगत् ।
तस्मादप्सु विमुञ्चेमं क्रोधाग्निं द्विजसत्तम ॥ १८
अयं तिष्ठतु ते विप्र यदीच्छसि महोदधौ ।
मन्युजोऽग्निर्दहन्नापो लोका ह्यापोमयाः स्मृताः ॥ १९
एवं प्रतिज्ञा सत्येयं तवानघ भविष्यति ।
न चैवं सामरा लोका गमिष्यन्ति पराभवम् ॥ २०

वसिष्ठ उवाच ।

ततस्तं क्रोधजं तात और्वोऽग्निं वरुणालये ।
उत्ससर्ज स चैवाप उपयुङ्क्ते महोदधौ ॥ २१
महद्धयशिरो भूत्वा यत्तद्वेदविदो विदुः ।
तमग्निमुद्गिरन्वक्त्रात्पिबत्यापो महोदधौ ॥ २२
तस्मात्त्वमपि भद्रं ते न लोकान्हन्तुमर्हसि ।
पराशर परान्धर्माञ्जानञ्ज्ञानवतां वर ॥ २३

इति श्रीमहाभारते आदिपर्वणि एकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥

१७२

गन्धर्व उवाच ।
एवमुक्तः स विप्रर्षिर्वसिष्ठेन महात्मना ।
न्ययच्छदात्मनः कोपं सर्वलोकपराभवात् ॥ १
ईजे च स महातेजाः सर्ववेदविदां वरः ।
ऋषी राक्षससत्रेण शाक्तेयोऽथ पराशरः ॥ २
ततो वृद्धांश्च बालांश्च राक्षसान्स महामुनिः ।
ददाह वितते यज्ञे शक्तेर्वधमनुस्मरन् ॥ ३
न हि तं वारयामास वसिष्ठो रक्षसां वधात् ।
द्वितीयामस्य मा भाङ्क्षं प्रतिज्ञामिति निश्चयात् ॥ ४
त्रयाणां पावकानां स सत्रे तस्मिन्महामुनिः ।
आसीत्पुरस्ताद्दीप्तानां चतुर्थ इव पावकः ॥ ५
तेन यज्ञेन शुभ्रेण हूयमानेन युक्तितः ।
तद्विदीपितमाकाशं सूर्येणेव घनात्यये ॥ ६
तं वसिष्ठादयः सर्वे मुनयस्तत्र मेनिरे ।
तेजसा दिवि दीप्यन्तं द्वितीयमिव भास्करम् ॥ ७
ततः परमदुष्प्रापमन्यैर्ऋषिरुदारधीः ।
समापिपयिषुः सत्रं तमत्रिः समुपागमत् ॥ ८
तथा पुलस्त्यः पुलहः क्रतुश्चैव महाक्रतुम् ।
उपाजग्मुरमित्रघ्न रक्षसां जीवितेप्सया ॥ ९
पुलस्त्यस्तु वधात्तेषां रक्षसां भरतर्षभ ।
उवाचेदं वचः पार्थ पराशरमरिंदमम् ॥ १०
कच्चित्तातापविघ्नं ते कच्चिन्नन्दसि पुत्रक ।

C 1 6975
B 1 181 11
K 1 197 11

172

1 Ś1 K1 S om उवाच — b) A few MSS वशिष्ठेन. — c) K2 3 T2 G (except G2 4) नियच्छद्; Ñ1 न्याय°; Ñ3 न्याय°. Ñ V1 B D T G (except G1 3) M3 क्रोध (for कोपं) — d) T1 G1-3 °भयावह

2 b) T1 G2 ततो (for सर्वं) Ñ1 3 सर्वधर्मविदां (Ñ3 °भृता) — c) K0 3 G3 6 M5, 8 ऋषिराक्षस°; K1 ऋषे राक्षससत्रेण — d) Ś1 K1 2 4 B1 5 Da Dn1 D1 शाक्रेयो; G5 शाक्तो यो A few MSS परासर

3 a) K4 M6-8 बालांश्च वृद्धांश्च (by transp) — b) K0 G1 महाद्युति°; K3, 4 T2 G4-6 °मति — D2 (hapl.) om 3c-5b — c) S (except T1 G2 3 M3) सत्रे (for यज्ञे) — d) Ś1 K B1 3 Da शक्रेर्

4 D2 om 4 (of v 1 3) — b) K1 Ñ1 वधं (for वधात्) — c) Ś1 K1 मा भंगं; T1 G2-4 मा हिंस्यां (T1 °सां, G2 °स्यात्); T2 G1 5 M मा जघ्ने, G6 मा हन्यां; Cd as in text. — d) Ñ1 S इति (G1 अनु) चिंतयन्

5 D2 om 5ab (of v 1 3) — a) K0 1 Ñ2 V1 Dn D1 T1 G3 3 च (for स) — b) G1 महाद्युति.. — c) G6 पुरस्ताद्देवानां

6 a) T2 G1-5 M शुद्धेन; G1 चैतेन — b) K1 हूयमाने च Ś1 भक्तित, K4 Ñ1 2 B1, 5 6 Dn1 n3 शक्तित.; B3 Dn2 G2 शक्तिज.; Da शक्तिभि., D3 युक्तिज°; G1 शक्तिना. — c) Ś1 उद्दीपितमिवाकाश, K1 तदा दीपित°, K3 Dn3 G6 तद्वद्दीपित°; D2 तदुद्दीपित° — d) K2 T2 G (except G1) M6-8 सूर्येणैव

7 K1 om 7ab — a) A few MSS वशिष्ठा° — c) K4 Ñ2 V1 B D (except D5) S (except T1 G2 3) तेजसा दीप्यमानं वै (T2 G1 4-6 M तु); Ñ1 °मिविदीयंत, N3 °तीव दीप्यंत

8 a) Da G6 परमदुष्पार; cf v 1. 1. 53 29a. — b) Ś1 कृत्वा, K मत्वा (for अन्यैर्) Ś1 K1 मुनिरुदार°. — c) T1 G2 ते समापयितुं; G4 M त (G4 स) समापयिपु° Cd cites समापिपयिपु° (as in text) — d) S निर्ऋते (G5 नृपते; G6 ऋते य) प्रियकाम्यया

9 a) T G (except G2) तत. (for तथा) — b) Ś1 Ñ V1 B Dn D1 4 5 T1 G2 °क्रतु ; T2 G1 3-6 M °तपा — c) K0 2 3 Ñ1 T1 G3 M5 5 तमाजग्मुर्, K4 Ñ2 3 V1 B D तत्रा°; T2 G1, 2 4-6 M6-8 तदा° K0 2 3 Ñ1, 3 T G3-4 M5, 5 अमित्रघ्न; K1 निमित्तज्ञा; K4 अमित्रज्ञं — d) K1 G3 M7 जीवितेच्छया G5 (hapl) om from जीविते प्सया (in 9d) up to रक्षसां (in 10b)

10 G5 om up to रक्षसां (of v 1. 9) — a) T1 G2 स (for तु) G6 यथा तेषां — c) T1 G2 वचोस्येत्य — d) A few MSS परासरम् T1 G2 अनिंदितं (for अरिं°)

11 Before 11, S ins पुलस्त्य° — a) K0 Ñ2 ताताल्पविघ्नं ते, K3 Ñ1 तातप्य°, K4 B5 तपो ह्य(K4 *sup lin* °ल्प; B5 °प्य)वि°; D2 तात न विघ्नस्ते, D4 S

C. 1. 6675 B. 1. 181. 11 K. 1. 197. 11

अजानतामदोषाणां सर्वेषां रक्षसां वधात् ॥ ११
प्रजोच्छेदमिमं मह्यं सर्वं सोमपसत्तम ।
अधर्मिष्ठं वरिष्ठः सन्कुरुषे त्वं पराशर ।
राजा कल्माषपादश्च दिवमारोढुमिच्छति ॥ १२
ये च शक्त्यवराः पुत्रा वसिष्ठस्य महामुनेः ।
ते च सर्वे मुदा युक्ता मोदन्ते सहिताः सुरैः ।
सर्वमेतद्वसिष्ठस्य विदितं वै महामुने ॥ १३
रक्षसां च समुच्छेद एष तात तपस्विनाम् ।
निमित्तभूतस्त्वं चात्र क्रतौ वासिष्ठनन्दन ।
स सत्रं मुञ्च भद्रं ते समाप्तमिदमस्तु ते ॥ १४
एवमुक्तः पुलस्त्येन वसिष्ठेन च धीमता ।
तदा समापयामास सत्रं शाक्तिः पराशरः ॥ १५
सर्वराक्षससत्राय संभृतं पावकं मुनिः ।
उत्तरे हिमवत्पार्श्वे उत्ससर्ज महावने ॥ १६
स तत्राद्यापि रक्षांसि वृक्षानश्मान एव च ।
भक्षयन्दृश्यते वह्निः सदा पर्वणि पर्वणि ॥ १७

इति श्रीमहाभारते आदिपर्वणि द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥

तपस्यविघ्न ते (T1 G2.3 तपसि तेविघ्न) Cd cites अपविघ्न (as in text) — ᵃ) K (except K1) घ्नदोषाणां (for अदो°)

12 ᵃ) Ś1 K1 T G (except G6) प्रजाछेदम् Ñ1 3 Da1 T1 G3 M3 इदं मह्य — ᵇ) K4 न सर्वं कर्तुमर्हसि; Ñ2 V1 B D न हि (D2 नाल) कर्तुं त्वमर्हसि; T2 G2 4 5 मा कृथा(G2 4 कार्षी)स्तापसोत्तम — After 12ᵃᵇ, K4 Ñ2 V1 B D (except D2) ins

1792* नैष तात द्विजातीनां धर्मो दृष्टस्तपस्विनाम् ।
शम एव परो धर्मस्तमाचर पराशर ।

— ᶜ) Ś1 वसिष्ट ; M6-8 महर्षे — ᵈ) Da D4 G5 6 पराशर — After 12ᶜᵈ, all MSS except T2 G1.5 6 M ins :

1793* शक्तिर्न चापि धर्मज्ञ नातिक्रान्तुमिहार्हसि ।
प्रजानां च समोच्छेद न चैव कर्तुमर्हसि ।
शापाद्धि शक्तेर्वासिष्ठ तत्तावदुपपादितम् ।
आत्मजेन सरोषेण शक्तिर्नीत इतो दिवम् ।
न हि त राक्षस कश्चिच्छक्तो भक्षयितु मुने । [5]
आत्मनैवात्मनस्तेन सृष्टो मृत्युस्तदाभवत् ।
निमित्तभूतस्तत्रासीद्विश्वामित्र पराशर ।

[(L 1) Om in D2 Ś1 K शक्तिण B Da Dn D1.4 शक्तिं (B °क्तिं) चापि हि; T1 शक्तिमानपि; G2-4 शक्तिना चापि K3 B (except B6) Da Dn D1 4 धर्मज्ञ; D5 धर्मिष्ट B6 तात त्रातुमिहार्हसि; G2-4 नातिक्रमितुमर्हसि — (L. 2) Ñ1 3 B D प्रजायाश्च K1 Ñ1 3 समुच्छेद Ś1 K1 नैव त्व कर्तुं°, K0 2-4 Ñ1 न वै त्व कर्तुं°; Ñ3 न त्वेव कर्तुं°; T1 G2-4 न चै कर्तुं त्वम° — (L 3) Ś1 K1-3 B6 Da1 D1 शक्तेर्; T1 G3 शक्तिर् A few MSS वासिष्ट Ñ V1 B D (except D5) तदा तदुप°; T1 G2-4 तदा (G3 तेन) राज्ञा विनाशिता — (L. 4) Ñ2 V1 B D स रोषेण Ś1 K (except K0) B1 3 शक्तिर् K4 गत (for नीत) — (L. 5) K1 रणे (for मुने) — After line 5, T1 G2-4 ins

1794* वासिष्ठा भक्षितास्त्रासन्कौशिकोत्सृष्टरक्षसा ।
शाप न कुर्वन्ति तदा वाक्शस्त्रा व्रतपरायणम् ।
क्षमावन्तोऽदहन्देह देहमन्य व्रजन्ति हि ।

— (L 6) Ñ2 3 V1 Dn G3 दृष्टो; T1 G3 4 नष्टो (for सृष्टो) — (L. 7) K3 Ñ1 B6 D (except D2 5) निमित्तमात्रस् K3 4 प्रतापवान् (for परा°)]

— ᵉ) Da S (except T1 G2 3) तु (for च) — ᶠ) Ñ2 V1 B D (except D5) दिवमारुह्य मोदते

13 ᵃ) K1 B1.6 Da1 शक्त्यवरा K0 2-4 D4 Cd ये शक्त्य(K3 °ग्र्य)वरजाः पुत्रा — ᵇ) A few MSS वशिष्ठस्य K1-3 Ñ V1 B1 3.5 Dn D1 2 T2 G (except G1) महामुने; B6 Da M3.5 महात्मन ; D4 महामते — K1.4 (hapl.) om. 13ᵉ-13ᶠ — ᶜ) K2 ते सर्वे च T1 G1-3 दिव प्राप्ता (for मुदा युक्ता) — ᵈ) Da मुदिताः सु° — ᵉ) T1 G2 3 वसिष्ठेन, a few MSS वशिष्ठस्य — ᶠ) Ś1 K3 B3 महामुने

14 ᵇ) M3.5 एष तेषां; M6-8 एव तात — ᶜ) B6 Da निमित्तमात्रस् Ñ3 चापि; M6-8 चास्य T1 G2 3 प्रजोच्छेदस्त्वया चाद्य — ᵈ) B1(m as in text) 3 D2 S कृतो; B5 6 Da D4 क्रतोर् (for क्रतौ) — ᵉ) Ñ1 2 V1 B3 Dn तत्सत्रं K (except K1) D4 सत्राद्विरम भद्र ते

15 Before 15, Ś1 K1 T1 G2 3 ins गधर्व ; K0 2-4 Ñ3 V1 B D (except Dn1) गधर्व उ°. — ᵇ) D3 G1 वसिष्ठेन महात्मना — ᶜ) Ś1 तद्धे (for तदा) — ᵈ) Ś1 तदा; K4 क्रतु; T1 स त (for सत्र) Ś1 K2 3 B2.4 6 शाक्ति ; K1.4 शक्ति ; Ñ2 V1 B1 Da Dn D1 4 शाक्तो (B1 D1 °क्तो; Da1 शक्तो); S शांत Ñ2 V1 B D महामुनि (Da महानृपि°) (for परा°)

16 ᵃ) Ñ1 स त (for सर्व) K (except K1) D4

१७३

अर्जुन उवाच ।
राज्ञा कल्माषपादेन गुरौ ब्रह्मविदां वरे ।
कारणं किं पुरस्कृत्य भार्या वै संनियोजिता ॥ १
जानता च परं धर्मं लोक्यं तेन महात्मना ।
अगम्यागमनं कस्माद्वसिष्ठेन महात्मना ।
कृतं तेन पुरा सर्वं वक्तुमर्हसि पृच्छतः ॥ २
गन्धर्व उवाच ।
धनंजय निबोधेदं यन्मां त्वं परिपृच्छसि ।
वसिष्ठं प्रति दुर्धर्षं तथामित्रसहं नृपम् ॥ ३
कथितं ते मया पूर्वं यथा शप्तः स पार्थिवः ।
शक्तिना भरतश्रेष्ठ वासिष्ठेन महात्मना ॥ ४
स तु शापवशं प्राप्तः क्रोधपर्याकुलेक्षणः ।
निर्जगाम पुराद्राजा सहदारः परंतपः ॥ ५
अरण्यं निर्जनं गत्वा सदारः परिचक्रमे ।
नानामृगगणाकीर्णं नानासत्त्वसमाकुलम् ॥ ६
नानागुल्मलताच्छन्नं नानाद्रुमसमावृतम् ।
अरण्यं घोरसंनादं शापग्रस्तः परिभ्रमन् ॥ ७
स कदाचित्क्षुधाविष्टो मृगयन्भक्षमात्मनः ।

C 1 6606
B 1 182. 9
K 1 198. 11

°नाशाय; T1 G2 °संत्रासं — b) Ś1 D4 T2 G3 5 सभूत Ñ3 V1 B6 D (except D2 5) तदा (for मुनि.) — d) Ś1 महामुने, K (except K1) °यशाः, G3 °मुनि°.
17 a) T1 G3 स तु तत्रापि र°. — b) K1 Ñ V1 Dn D4 T2 G M3.5 अश्मन (G2 °क), Da D2 अश्मानम्

Colophon. *Major parvan* T2 G M संभव° (for आदि°) — *Sub-parvan* Ñ1.2 V1 चैत्ररथ, followed by और्वोपाख्यान, T1 सभव Ś1 K Ñ3 B D T2 G1 4 M3.5 (all om the sub-parvan name) mention only और्व (D5 वासिष्ठ; T2 G4 M3 5 वासिष्ठोपाख्यान; G1 और्वोपाख्यान); Ñ3 B3 Dn D1 2 4 add समाप्त — *Adhy. name* K0 शाक्ते राक्षससत्रसमाप्ति ; K3 सत्रसमाप्ति , K3 T2 G4.6 राक्षससत्र; K4 शाक्ते राक्षससत्र, D5 राक्षससत्रम, M3 5 राक्षससत्रनिवर्तन (M5 °त्रकथन) — *Adhy no.* (figures, words or both) Dn3 T1 180, D4m 183, T2 G2-5 131, G1 133, G6 M 132. — *S'loka no* Dn 23, M3 19. — *Aggregate s'loka no* Dn2 6857.

173

1 Before अर्जुन , T1 G1-4 ins
1795* गन्धर्व ।
पुनश्चैव महातेजा विश्वामित्रजिघांसया ।
भर्मि सम्भूतवान्घोर शाक्तेय' सुमहातपा ।
वासिष्ठसंभूतश्चाग्निर्विश्वामित्रहितैषिणा ।
तेजसा वह्नितुल्येन भस्त स्कन्देन धीमता ।
— Ś1 K1 S om उवाच — b) D5 वेदविदां — d) Ñ1 3 भार्या या. G3 संप्रयो°. T1 G2.3 भार्या सम्यङ्नियोजिता.

2 a) K (except K1) Ñ1 परम, Ñ2 3 V1 B (except B3) Dn D1 वै परं; D2 अपि परं Da लौक्यं (for धर्मं). — b) K (except K1) D5 लौकिक च; Ñ2 3 V1 B Da Dn D1.2 4 वसिष्ठेन, S (except G1 5) Cd लौक्यं तेन S (except T1 G2 3) महर्षिणा — d) Some MSS वशिष्ठेन. Ñ1 वसिष्ठेन महर्षिणा, Ñ2 3 V1 B D कृत (Ñ3 पुरा) तेन महर्षिणा — After 2cd, N T1 G1-3 ins
1796* अधर्मिष्ठ वसिष्ठेन कृत चापि पुरा सखे ।
[Ś1 K N3 B1.6 D2 T1 G2 वरिष्ठेन. T1 G2 कृतिनापि.]
T1 G2 3 cont.
1797* तत्र मे सशयो जात कार्याकार्यविनिश्चये ।
— e) N एतन्मे (K0 1.3 एत मे) सशय सर्वं; T1 G2 3 सशयप्रतिपेध वै — f) Ñ2 V1 B D (except D5) छेत्तुमर्हसि K0 2 3 पृच्छते T1 G2 3 तन्मे (G3 तं मे) त्व वक्तुमर्हसि.
3 Ś1 K1 S om उवाच. — b) G1 यस्मात्त्वम् S (except T1 G2 3 M5) अनुपृच्छसि — c) K (except K1) Ñ2.3 V1 D (except D2 4) M (except M5) दुर्धर्षं. — d) S (except T1 G2 3) प्रति (for नृपम्)
4 a) Ś1 Ñ1.2 V1 B (except B1) D (except D5) सर्वं (for पूर्वं) — b) Ś1 K1 श्रोतुमर्हसि पृच्छत (cf. 2d). — Ś1 K1 om 4cd. — c) K (K1 om) B3 5 Da D1 शक्त्रिणा — d) A few MSS वाशिष्ठेन.
5 a) Ś1 पापवश — b) Ñ1 3 B1.3 D2 °पर्याकुलः श्वसन् — d) Ś1 K1 दारै°. Ś1 K1.2 Da3 D1 G3 °तप.
6 G1 om. 6cd. — c) G5 6 M5 °समाकीर्णं. — M6-8 om. 6d-7a.
7 M6-8 om. 7a (cf. v. 1. 6). — b) N3 T1 G2

G. 1. 6630 B. 1. 182. 9 K. 1. 190. 11

दद‍र्श सुपरिक्लिष्टः कस्मिंश्चिद्वननिर्झरे ।
ब्राह्मणीं ब्राह्मणं चैव मैथुनायोपसंगतौ ॥ ८
तौ समीक्ष्य तु वित्रस्तावकृतार्थौ प्रधावितौ ।
तयोश्च द्रवतोर्विप्रं जगृहे नृपतिर्बलात् ॥ ९
दृष्ट्वा गृहीतं भर्तारमथ ब्राह्मण्यभाषत ।
शृणु राजन्वचो मह्यं यत्त्वा वक्ष्यामि सुव्रत ॥ १०
आदित्यवंशप्रभवस्त्वं हि लोकपरिश्रुतः ।
अप्रमत्तः स्थितो धर्मे गुरुशुश्रूषणे रतः ॥ ११
शापं प्राप्तोऽसि दुर्धर्ष न पापं कर्तुमर्हसि ।
ऋतुकाले तु संप्राप्ते भर्त्रास्म्यद्य समागता ॥ १२
अकृतार्था ह्यहं भर्त्रा प्रसवार्थश्च मे महान् ।
प्रसीद नृपतिश्रेष्ठ भर्ता मेऽयं विसृज्यताम् ॥ १३
एवं विक्रोशमानायास्तस्याः स सुनृशंसकृत् ।
भर्तारं भक्षयामास व्याघ्रो मृगमिवेप्सितम् ॥ १४
तस्याः क्रोधाभिभूताया यदश्रु न्यपतद्भुवि ।
सोऽग्निः समभवद्दीप्तस्तं च देशं व्यदीपयत् ॥ १५
ततः सा शोकसंतप्ता भर्तृव्यसनदुःखिता ।
कल्माषपादं राजर्षिमशपद्ब्राह्मणी रुषा ॥ १६
यस्मान्ममाकृतार्थायास्त्वया क्षुद्र नृशंसवत् ।
प्रेक्षन्त्या भक्षितो मेऽद्य प्रभुर्भर्ता महायशाः ॥ १७
तस्मात्त्वमपि दुर्बुद्धे मच्छापपरिविक्षतः ।
पत्नीमृतावनुप्राप्य सद्यस्त्यक्ष्यसि जीवितम् ॥ १८

°रसायुत (Ñ3 °घृत); M3 °समाकुल — d) T2 G4-6 घोरसकाशः; Cd as in text

8 a) D4 कदाचित्स (by transp) G6 समाविष्टो — b) K0 Ñ V1 B D T2 G3 भक्षयन् — c) Ś1 K (except K1) ददृशे — d) K0.3.4 Ñ1 D4 गिरिगह्वरे; Ñ3 V1 Dn D1 निर्जने वने; T2 G4-6 सुमनोहरे (for वन°) — e) Ñ V1 B6 D (except D4) ब्राह्मणं ब्राह्मणीं (by transp) — f) Ś1 Ñ V1 B Dn D1.2.3 M3 मिथुनाय

9 a) K0.3.4 स (for तौ) Ñ V1 B D तौ स वीक्ष्य तु (Ñ1.3 D4 समीक्ष्य) वित्रस्तौ; S तौ (G1 M6-8 स) समीक्ष्य च वित्रस्तौ — b) D4 (by corr) अकृतार्थावधावतां — c) Ñ1.2 V1 B Da Dn D1 प्र; D4 T2 G4-6 वि; D2 तु (for च) — d) Ñ1.2 V1 B D (except D4) M3 जग्राह

10 ab) K (except K1) D4 गृहीत प्रेक्ष्य भर्तारं ब्राह्मणी (D4 °ण) समभाषत — c) Ñ1.2 V1 B D (except D4) राजन्मम वचो — d) Some S MSS त्वया (for त्वां)

11 a) Ś1 °वंशसंभूत — b) Ś1 K D4 स्वयं (for त्वं हि) Ñ V1 B D T1 G3.6 M3 लोके परि° (B4 °षु वि°; D2 वि वि°; G6 च वि°) — c) K0 स्थिरो धर्मे — After 11, D4 marg sec m ins:

1708* विष्णवोऽसि महीपाल त्वमिक्ष्वाकुविवर्धन ।
येन त्वया पुरा विष्णुस्तोषितः शुभकर्मणा ।
आत्मनः तृणवत्कृत्वा जीवितं हरयेऽर्पितम् ।
तदासि रक्षितस्तेन वै विष्णुना प्रभविष्णुना ।

12 a) Ñ1.3 शापप्राप्तोऽपि; Ñ3 V1 B D (except D4) शापोपहत — d) K3 भर्त्रा ह्यद्य समा°; Ñ3 V1 B4 Dn D2 भर्तृव्यसनकर्शिता; D2 भर्ता मेऽद्य समागत.; S भर्त्राद्य (T1 G3.8 M1 भर्तार) समुपा°

13 a) D1 ह्यद्य (for ह्यहं) Ñ3 S अकृतार्थिन्यहं भद्र (T1 G3.8 अकृतार्थास्मि भद्र ते) — b) Ñ1.2 V1 B1 (m as in text) 3.4 D (except Da) प्रसवार्थं समा(B1 मुहा)गता. — c) Ñ3 नृपशार्दूल — d) K (except K1) Ñ3 V1 B D अद्य मे; Ñ1 S मम (for मेऽयं) Ś1 K D4 विमुच्यतां, Ñ3 विसर्ज्यतां

14 a) K0.3.4 D4 लालप्यमानाया°; G1 विलोक° — b) K0 तु सु; K3.8 Ñ2.3 V1 B1.6 Dn D1.2 तु स; D3 स हि (for स सु) Ñ V1 B3.4 Dn D1.3 G3.5 नृशंसवत् — d) Ś1 K Ñ1.3 D4 पशु (for मृग) T1 G3 व्याघ्रो मृगशिशुं यथा

15 G3 (? hapl) om. 15b–17a — b) K0 Ñ3 यदा, K3.4 Ñ1.2 V1 B Da Dn D1.4.5 यानि; S (G3 om) तदा (for यद्) K3.4 N V1 B Da Dn D4.5 T2 G1.3.4.6 M3 (by corr) अश्रूण्यपतन्भुवि D2 अश्रूण्यभ्यपतन्भुवि — c) Ś1 दीप्तः समभवत् (by transp.) — d) K1.3.4 व्यदीपयन्.

16 G3 om 16 (cf v 1 15) — a) K4 शोकसंवीता; Ñ1 °समाप्ता — b) Ñ V1 B6 Da D2.4 °कर्शिता; B1.3.5 Dn D1 °कर्षिता (for °दुःखिता) — c) T1 G3.8 राजानं (for राजर्षिं)

17 G3 om 17a (cf v 1 15). Before 17, B1 ins ब्राह्मण्युवाच — a) G1 यस्मान्मय्यकृतार्थायां — c) K3 T1 G3.8 पश्यन्त्या Ñ1 भक्षितो ह्येष; B1m भक्षितश्चाद्य — d) Ñ1 M3 भर्ता मम; Ñ3 V1 B1 D (except D4.5) प्रियो भर्ता

18 b) K (except K1) G4 M1 °विक्षित ; Ñ1 D4 °वीक्षित ; D2 T1 G3 °दूषित.; T2 G5 °कर्शित ; G6

यस्य चर्षेर्वसिष्ठस्य त्वया पुत्रा विनाशिताः ।
तेन संगम्य ते भार्या तनयं जनयिष्यति ।
स ते वंशकरः पुत्रो भविष्यति नृपाधम ॥ १९
एवं शप्त्वा तु राजानं सा तमाङ्गिरसी शुभा ।
तस्यैव संनिधौ दीप्तं प्रविवेश हुताशनम् ॥ २०
वसिष्ठश्च महाभागः सर्वमेतदपश्यत ।
ज्ञानयोगेन महता तपसा च परंतप ॥ २१

मुक्तशापश्च राजर्षिः कालेन महता ततः ।
ऋतुकालेऽभिपतितो मदयन्त्या निवारितः ॥ २२
न हि सस्मार नृपतिस्तं शापं शापमोहितः ।
देव्याः सोऽथ वचः श्रुत्वा स तस्या नृपसत्तमः ।
तं च शापमनुस्मृत्य पर्यतप्यद्भृशं तदा ॥ २३
एतस्मात्कारणाद्राजा वसिष्ठं संन्ययोजयत् ।
स्वदारे भरतश्रेष्ठ शापदोषसमन्वितः ॥ २४

C 1 6912
B 1 182. 26
K. 1 198. 28

इति श्रीमहाभारते आदिपर्वणि त्रिसप्तत्यधिकशततमोऽध्यायः ॥ १७३ ॥ समाप्तं चैत्ररथपर्व ॥

°पीडित. — ᶜ) Ñ1 °स्याप्य (for °प्राप्य) — ᵈ) K1 परि (for सदस्) — After 18, D4 (marg sec m.) T2 G4 (marg) 5 ins

1799* तेन प्रसाद्यमाना सा प्रसादमकरोत्तदा ।

19 ᵃ) K (except K1) D5 वसिष्ठस्य ऋषेर्यस्य; T1 G2 ऋषेर्यस्माद् (G2 °र्यस्य) वसिष्ठस्य. — ᵇ) K3 G3 त्वया पुत्रो विनाशितः — ᵉ) T1 G6 सगत्य — ᶠ) Ś1 K1 Ñ1 नराधिप; B1 s m D2 नृपोत्तम, G1.2.4 M5 नराधम

20 ᵃ) T1 शप्त्वा महीपालं — ᵇ) S (except M5) तदांगिरसी. — ᵈ) Ñ1 पावकं प्रविवेश ह

21 ᵃ) K0 2 Da T2 G5.6 M °भाग — ᵇ) Ñ3 V1 B D (except D5) भवैक्षत — ᶜ) Ś1 K1 मनसा (for महता) — ᵈ) K3 4 Da1 T G4.5 °तप. — After 21, K0 3 ins

1800* न चाप्यत्र महाबाहो अधर्मः प्रतिपद्यते ।
ब्राह्मणो यदपत्यं हि प्रार्थितः संप्रयच्छति ।
यदा तु कामतो गच्छेत्परनारीं नरो नृप ।
तदास्य परदारोक्तमधर्मस्य फलं भवेत् ।
अपकल्कस्तु राजेन्द्र निस्तीर्येतद्द्विजोत्तमः ।
नान्यसो भरतश्रेष्ठ स हि लोकगुरुर्मत ।

22 ᵃ) K3 G1 तु (for च) — ᵇ) Ñ1 शापेन महता K (except K1) D5 सदा — ᶜ) S निपतितो — ᵈ) S भार्यया स नि° (T G6 सनि°; G3 परि°)

23 ᵃ) Ñ2 V1 B D (except D5) स नृपः; Ñ3 शापं त (for नृपति) — ᵇ) T1 शाप तं (by transp). Ñ3 नृग- कामेन मोहित. — ᶜ) Ś1 K1 तद्धि वच°; K0 2-4 तद्वचनं (for सोऽथ वच.) — ᵈ) Ñ V1 B D सभ्रांतो (for स तस्या) Ś1 K0 1 °सत्तम S विसंज्ञ समपद्यत — K3 om. 23ᵉ-24ᵈ. — ᵉ) Ñ V1 B D त शापमनुसस्मृत्य — ᶠ) Ś1 सत (for तदा)

24 K3 om 24 (of v 1 23) — ᵇ) K0 2 4 G3 5 6 M5 सनियोज°; D2 स स्वयोज°, D5 समयोज°. — ᶜ) D5 स्वपत्न्यां Ñ3 V1 B (except B5) Da Dn D1 2 स्वदारेषु नर(B5 नृप)श्रेष्ठ — ᵈ) G1 पाप° — After 24, D4 (marg. sec m) T2 G2 5 6 (om. line 5) ins

1801* यदा कल्माषपादस्तु राक्षसत्वमवाप स ।
तदा वसिष्ठ कुरुणा यज्ञार्थे संवृतोऽभवत् ।
यदा कल्माषपादस्तु राक्षसत्व विसृष्टवान् ।
तदा तेनैव राज्ञा तु वसिष्ठ सवृतोऽभवत् ।
एवं वसिष्ठो युष्माकं पुरोधा संवृतोऽभवत् ।

Colophon om. in T1. — *Major parvan* T2 G1 2.4-6 M संभव° (for आदि°) — *Sub-parvan* Ñ1.2 V1 चैत्ररथ, followed by वासिष्ठोपाख्यान. Ś1 K1-4 B1.6 Da Dn D1 2 T2 G1 4 M3.6-8 (all om the sub-parvan name) mention only वासिष्ठ (Ś1 K1-4 D2 और्व; T2 G1.4 M3 6-8 वासिष्ठोपाख्यान); Ś1 K1 3 4 Dn D1 2 M3.6-8 add समाप्त — *Adhy name* K0 2 4 D5 मित्रसहशाप- वर्णन (D5 °सहशाप); T2 G1.4 6 वसिष्ठापचारकथनं (G6 °चारं) — *Adhy no* (figures, words or both) Dn2 181, D4m 184, T2 G2-5 132, G1 134, G6 M 133 — *S'loka no* Dn M8 26 — *Aggregate s'loka no.* Dn2 6882

174

1 Ś1 K1 S om उवाच — ᵃᵇ) S °मनुरूप वै त्व हि गंधर्वसत्तम — ᶜ) K0 3 D5 °हित त(K3 स-; D5 त्व)मा चक्ष्व, S °हित ममाचक्ष्व

2 Ś1 K1 S om. उवाच (G3 om the ref.) — ᵃ) G3 M6-8 एव (for एप) M3 5 कनीयान्वै देवलस्य. — ᵇ) T2

१७४

C 1. 6913
B. 1. 183. 1
K. 1. 190. 1

अर्जुन उवाच ।
अस्माकमनुरूपो वै यः स्याद्गन्धर्व वेदवित् ।
पुरोहितस्तमाचक्ष्व सर्वं हि विदितं तव ॥ १
गन्धर्व उवाच ।
यवीयान्देवलस्यैष वने भ्राता तपस्यति ।
धौम्य उत्कोचके तीर्थे तं वृणुध्वं यदीच्छथ ॥ २
वैशंपायन उवाच ।
ततोऽर्जुनोऽस्त्रमाग्नेयं प्रददौ तद्यथाविधि ।
गन्धर्वाय तदा प्रीतो वचनं चेदमब्रवीत् ॥ ३
त्वय्येव तावत्तिष्ठन्तु हया गन्धर्वसत्तम ।
कर्मकाले ग्रहीष्यामि स्वस्ति तेऽस्त्विति चाब्रवीत् ॥४
तेऽन्योन्यमभिसंपूज्य गन्धर्वः पाण्डवाश्च ह ।
रम्याद्भागीरथीकच्छाद्यथाकामं प्रतस्थिरे ॥ ५
तत उत्कोचकं तीर्थं गत्वा धौम्याश्रमं तु ते ।
तं वव्रुः पाण्डवा धौम्यं पौरोहित्याय भारत ॥ ६
तान्धौम्यः प्रतिजग्राह सर्ववेदविदां वरः ।
पाद्येन फलमूलेन पौरोहित्येन चैव ह ॥ ७
ते तदाशंसिरे लब्धां श्रियं राज्यं च पाण्डवाः ।
तं ब्राह्मणं पुरस्कृत्य पाञ्चाल्याश्च स्वयंवरम् ॥ ८
मातृषष्ठास्तु ते तेन गुरुणा संगतास्तदा ।
नाथवन्तमिवात्मानं मेनिरे भरतर्षभाः ॥ ९
स हि वेदार्थतत्त्वज्ञस्तेषां गुरुरुदारधीः ।

G3 4.5 हि तप्यति; G6 तपस्विन — c) S (except G2) उत्कचके K1 [ऽ]त्यर्थे (for तीर्थे) — d) Ś1 K (except K3) Ñ3 D4 5 वृणीध्व, B3 G1 3 वृणुध्व; D2 वृणीय; T G3 4-6 M वृणीध्व Ś1 यथेच्छथ; K3 यदीप्सथ; K4 D1 यदिच्छथ; Ñ3 B5 S यदी(T2 G3.4 M6 °दि)च्छसि

3 Ś1 K1-3 D2 S om उवाच; K4 om the ref — a) G1 अथोर्जुनस्तम् M समादाय — b) Ś1 च यथा°; T1 G3 भरतर्षभ — c) B3 तत ; G6 वृद्धौ (for तदा)

4 Before 4, T2 G (except G3) ins अर्जुन — a) K3 D4 M5 तात तिष्ठतु — c) Ko 3 4 Ñ2 3 V1 B D कार्यकाले, T1 G3 युद्धकाले, G2 काम्यकाले Ñ3 V1 Dn D1.4 ग्रहीष्याम°

5 Before 5, S (except T2 M3 5) ins वैश° — a) Ñ1 अभिसप्रेक्ष्य; G1 °गम्य; M6 इति सपूज्य G3 तावन्योन्यौ च स° — b) Ñ1 B3 D1 5 G1 3 5 M6 पांडवश्च T1 ते; M6-8 हि (for ह) — c) G2 4 ततो (for रम्याद्) K4 Ñ2 3 V1 B D T1 G3 4 भागीरथीतीराद् (D6 °कक्षाद्); Ñ1 °कूलाद्

6 a) T1 G3 उत्कलित; T2 G1.4-6 M उत्क°; G3 उत्कोचन (of v 1. 2) — b) Ko 3 B3 D4 प्रति; T1 G3 च ते (for तु ते) G6 °धर्मांतिके — c) K1 अब्रुवन्; K3 समूचु° (for त वव्रु)

7 a) S तांश्चापि — b) Ś1 सर्वे; B1 D2 सर्वान् (for सर्व) Ś1 K D6 धर्मभृतां (K1 °विदां) वर — c) K4 Ñ3 V1 B D (except D2 3) पद्येन (for पाद्ये°) — d) Ś1 K4 T2 G चैव हि

8 a) Ñ1 3 B (B5 marg) Dn D2 S (except T1, G3 corrupt) तेन चाशंसिरे (B6 orig ते चाथाश°); Ñ2 V1 Dn D1 ते समाश°; D4 5 ते चाशाश° Ś1 Ko लब्धु; D2 G3 लब्ध्वा; G1 लक्ष्य — b) G1 लब्ध (for श्रिय) — D6 reads 8c-9d after 12 — c) Ñ V1 B D ब्राह्मण तं (D4 ते) — d) Ñ V1 B D (except D4) पांचाली च (Ñ3 वै); T1 याज्ञसेन्या Ñ V1 B D T1 G1 3 °वरे

9 D6 reads 9 after 12 (cf v 1 8) — a) K1 G1 तु तेनैव; B1 महेष्वासा ; T2 G3 4 5 ततस्तेन K3 सह मात्रा ततस्ते वै; Ñ2 V1 B (B1 marg) D पुरोहितेन तेनाथ Cd cites मातृषष्ठा (as in text) — b) M गता (for तदा) Ś1 सगता गुरुणा सदा (by transp), T1 G3 सहिता (G3 सगता) गुरुणा तत ; T2 G1 3 4-6 गुरुणा सह सगता. — c) Ś1 K अथ, T1 G3 तदा (for इव)

10 After 10ab, S (for T1 G3 see below) ins
1802* वेदविच्चैव वाग्मी च धौम्य श्रीमान्द्विजोत्तम° ।
तेजसा चैव बुद्ध्या च रूपेण यशसा श्रिया ।
मन्त्रैश्च विविधैर्धौम्यस्तुल्य आसीद्बृहस्पते ।
स चापि विप्रस्तान्मेने स्वभायाम्यधिकान्भुवि ।
[(L. 1) T1 G3 धर्मविच्चैव — T1 G3 read line 4 after 11ab]
— c) G3 ते तु (for तेन) Ko सर्वविदा; T1 G3 धर्मविद . — d) Ko N1 3 D2 सर्वविद ; Ñ2 V1 Dn3 धर्मविद ; Dn1 n3 D1 धर्मविदा T1 तत ; T2 G1,2 4 5 M वृत्ता ; G6

तेन धर्मविदा पार्था याज्याः सर्वविदा कृताः ॥१०
वीरांस्तु स हि तान्मेने प्राप्तराज्यान्स्वधर्मतः ।
बुद्धिवीर्यबलोत्साहैर्युक्तान्देवानिवापरान् ॥ ११
कृतस्वस्त्ययनास्तेन ततस्ते मनुजाधिपाः ।
मेनिरे सहिता गन्तुं पाञ्चाल्यास्तं स्वयंवरम् ॥ १२

इति श्रीमहाभारते आदिपर्वणि चतुःसप्तत्यधिकशततमोऽध्यायः ॥ १७४ ॥

१७५

वैशंपायन उवाच ।
ततस्ते नरशार्दूला भ्रातरः पञ्च पाण्डवाः ।
प्रययुर्द्रौपदीं द्रष्टुं तं च देवमहोत्सवम् ॥ १
ते प्रयाता नरव्याघ्रा मात्रा सह परंतपाः ।
ब्राह्मणान्ददृशुर्मार्गे गच्छतः सगणान्बहून् ॥ २
तानूचुर्ब्राह्मणा राजन्पाण्डवान्ब्रह्मचारिणः ।
क्व भवन्तो गमिष्यन्ति कुतो वागच्छतेति ह ॥ ३
युधिष्ठिर उवाच ।
आगतानेकचक्रायाः सोदर्यान्देवदर्शिनः ।
भवन्तो हि विजानन्तु सहितान्मातृचारिणः ॥ ४

C. 1 6928
B. 1 184 4
K. 1 185 4

पुरा (for कृता) G3 सर्वविद्याविशारदा

11 a) S मेनिरे सहिता वीरा (T1 G3 सहिता मेनिरे राज्यं). — b) T2 G1.2 4-6 M प्राप्त राज्यं (for प्राप्तराज्यान्) T1 G3 प्राप्तमिलेव भारत — After 11ab, T1 G3 read line 4 of 1802* — c) G1 तेजोवीर्य° — d) K4 देवानिवाबरान्, Ñ1 °निवामरान्, Ñ2 V1 B D (except D5) °निव द्विजः, S (except T1 G3) देवा इवापरे

12 b) Ś1 K (except K3) मनुजाधिप (K4 °प) — d) B5 Dn3 ते; G4 M6-8 तु (for त) D1 पाचाल्यस्स स्वय°; D5 पाचालनगरेप्सितं; Cd as in text — After 12, D5 reads 8c-9a.

Colophon om in K1. — *Major parvan*: T2 G M संभव° (for आदि°) — *Sub-parvan* Ś1 K2-4 B3 6 Dn1.n2 M6-8 द्रौपदीस्वयवर, Ñ1 2 V1 B5 D5 चैत्ररथ, D1 स्वयघर; T1 समव — *Adhy name* K0 4 D2 धौम्यपौरोहित्य, Ñ1.2 V1 D5 धौम्यपुरोहितकरणं, T2 G4 6 धौम्यवरण (T2 °णन); M पुरोहितवरण — *Adhy no* (figures, words or both) Dn2 182, D4m 185, T1 181, T2 G3-5 133, G1 135, G6 M 134 — *S'loka no* Dn 12, M8 14 — *Aggregate s'loka no* Dn2 6894

175

☞ S (except G6) reads this adhy (for the first time) after adhy 156 and *repeats* it here (with v l), T1, however, reads here stanza 1 only of this adhy (inserted as the first st of adhy 176), omitting the rest (cf. App I, No 96)

1 Ś1 K (except K0) S om उवाच — a) Ś1 K Da D5 Cd कुरुशार्दूला (K1 °ल) — After 1ab, T1 M8.5 ins

1803* ब्रह्मरूपधरा पार्था जटिला ब्रह्मचारिण ।

— c) Ś1 लब्धु (for द्रष्टु) — d) Ñ2 V1 B Dn D1 4.5 T G2 4-6 देश महो°, D2 दिव्य महो°; Cd as in text (of 11, 20)

2 b) K0 4 Ñ1.2 V1 B5 6 Dn D1 4 सह मात्रा (by transp), B1m Da मातृपष्ठा° (Da1m सह मात्रा) Ś1 K1 परतप, Da महाबला° (Da1m as in text). — c) T1 ब्राह्मणान्गच्छतोपश्यन् — d) T1 पाचालान् (for गच्छत°) K1 गणशो; Ñ V1 B D G2 संगतान्; T2 G1 2 4-6 M सहितान् (for सगणान्)

3 a) K1m Ñ2 3 V1 B Dn D1.4 त (or ते) ऊचुर्, G3 तान्वनुर् T1 अथ ते ब्राह्मणा ऊचु — b) K4 Dn3 M5 पाढवा Ñ3 B3 D4 T1 G1 धर्मचारिण — d) K0 च, K3 हि (for ह) K1m Ñ3 V1 B D कुतो चास्या(B3 °च्या)गता इह (B1 इति; D5 °गतेति च)

4 Ś1 पाढवा ऊचु (!), K1 पाढया, K2 3 S युधिष्ठिर — G3-4 om 4 and the ref before 5 — a) T1 प्रयातानेकच° — b) Ś1 K1 देवरूपिण; K2 °दर्शना, Ñ2 V1 B D (except D5) एकचारिण; G1 °वर्णिन, G5 °शीलिन — c) Ś1 K3.4 Ñ1 3 G3 M5 6-8 [ऽ]भि-; K1 T2 G6 M5 [ऽ]पि, Ñ3 V1 B Da Dn D1.2 4 वै (for हि) K0 D5 T1 ह्य(T1 नो)भिजानतु — d) T2 G1 5 6 M संगतान् (for सहितान्) Ñ3 मातृसारिण, G5 मित्रचारिण K1 Ñ1 2 V1 B D (except D5) सह मात्रा द्विजर्षभा (K1 प्रचारिण); K3 जनन्या सहितान्द्विजान्

C. 1. 6723
B. 1. 184. 5
K. 1. 185. 4

ब्राह्मणा ऊचुः ।
गच्छताद्यैव पाञ्चालान्द्रुपदस्य निवेशनम् ।
स्वयंवरो महांस्तत्र भविता सुमहाधनः ॥ ५
एकसार्थं प्रयाताः स्मो वयमप्यत्र गामिनः ।
तत्र ह्यद्भुतसंकाशो भविता सुमहोत्सवः ॥ ६
यज्ञसेनस्य दुहिता द्रुपदस्य महात्मनः ।
वेदीमध्यात्समुत्पन्ना पद्मपत्रनिभेक्षणा ॥ ७
दर्शनीयानवद्याङ्गी सुकुमारी मनस्विनी ।
धृष्टद्युम्नस्य भगिनी द्रोणशत्रोः प्रतापिनः ॥ ८
यो जातः कवची खड्गी सशरः सशरासनः ।
सुसमिद्धे महाबाहुः पावके पावकप्रभः ॥ ९
स्वसा तस्यानवद्याङ्गी द्रौपदी तनुमध्यमा ।
नीलोत्पलसमो गन्धो यस्याः क्रोशात्प्रवायति ॥ १०
तां यज्ञसेनस्य सुतां स्वयंवरकृतक्षणाम् ।
गच्छामहे वयं द्रष्टुं तं च देवमहोत्सवम् ॥ ११
राजानो राजपुत्राश्च यज्वानो भूरिदक्षिणाः ।
स्वाध्यायवन्तः शुचयो महात्मानो यतव्रताः ॥ १२
तरुणा दर्शनीयाश्च नानादेशसमागताः ।
महारथाः कृतास्त्राश्च समुपैष्यन्ति भूमिपाः ॥ १३
ते तत्र विविधान्दायान्विजयार्थं नरेश्वराः ।
प्रदास्यन्ति धनं गाश्च भक्ष्यं भोज्यं च सर्वशः ॥ १४
प्रतिगृह्य च तत्सर्वं दृष्ट्वा चैव स्वयंवरम् ।
अनुभूयोत्सवं चैव गमिष्यामो यथेप्सितम् ॥ १५
नटा वैतालिकाश्चैव नर्तकाः सूतमागधाः ।

---

5 Ś1 K1 S om. ऊचुः (T G1-6 om. the ref.) — ^{a}) T2 G4 6 गच्छामोद्यैव; M7 8 गच्छयाद्यैव Ś1 Ñ2 B Dn1.n2 D5 G1 पंचालान् — ^{b}) K2 Ñ V1 Dn D1 निवेशने — ^{cd}) Ś1 स (for सु). T2 G M8 सुमहोत्सव — M8 6-8 (hapl.) om. from सुमहा° up to भविता (in 6^c). T1 इच्छामो भवतो ज्ञातुं महत्कौतूहलं हि न.

6 M8.6-8 om. up to भविता (cf. v. l. 5). Before 6, T G ins. ब्राह्मणा°. — ^{a}) Ś1 K0-2 Ñ V1 B D G1 एकसार्थं; K3 °सार्थं, T1 एहि सार्थं; T2 G1-4 एकसार्थाः. Ñ1 2 V1 B D (except D5) T G स्म (for स्मो). — ^{b}) Ñ2 V1 B D तत्रैव (for अप्यत्र). — ^{c}) D5 T1 अपि (for हि). — ^{d}) D8 सुमहात्मन. T1 उत्सवो भविता महान्.

7 Da D5 (? hapl.) om. 7^{ab}. — ^{cd}) T2 G M वेदि°. K1 पद्मपत्रायतेक्षणा. T1 यासावयोनिजा कन्या स्यास्यते सा स्वयंवरे.

8 ^{b}) K1 Ñ1.2 B3 Da T G1-2 3 6 M यशस्विनी. G4 द्रौपदी तनुमध्यमा. — After 8^{ab}, G4 reads 10^{cd} for the first time, repeating it in its proper place. — ^{d}) D5 प्रकोपिनः.

9 ^{a}) T1 जातो यः पावकाद्दूरः. — ^{cd}) K2 3 M8 6 सुसमिद्धान्महाबाहुः पावकात् etc. Ñ2 V1 B D (except D5) पावकोपम°. T1 सुसमृद्धो महाभाग सोमकानां महारथ°. — After 9, T1 ins.:

1804* यस्मिन्सजायमाने च वागुवाचाशरीरिणी ।
एष शिष्यश्च मृत्युश्च भरद्वाजस्य जायते ।

10 ^{a}) T1 स्वसा तस्यैव येषां या. — ^{b}) T1 जाता तस्मिन्महामखे; G6 सुकुमारी यशस्विनी (cf. v. l. 8^b). — For G4 cf. v. l. 8. — ^{cd}) K1 क्रोश; G1-3 केशाद् (for क्रोशाद्). Ś1 K1 4 D5 G6 प्रधावति; Ñ1 2 V1 B (except B3) Da Dn D1 3 4 M8 प्रवाति वै (M8 च) (for प्रवायति). T1 क्षीरक्षमभिरूपा हि श्यामा नीलोत्पलं यथा.

11 ^{a}) Ś1 Ñ2 V1 B D (except D5) यज्ञसेनस्य च सुतां, N3 G5 ता यज्ञसेनदुहितां. — ^{b}) T1 G1 2 M द्रौपदीं परम(T1 G2 °मां)स्त्रियं. — ^{c}) Ñ1 2 V1 B D (except D5) गच्छामो (Da Dn1 n2 D2 4 °म) वै; T2 G M सगच्छाम. T1 गच्छामस्तत्र वै द्रष्टु°. — ^{d}) Ñ2 V1 B D दिव्य; T2 G5 6 देवं; G1-4 देश (for देव); cf. v. l. 1^c. T1 स चैवास्याः स्वयंवर.

12 T2 (? hapl.) om. 12^b-13^a. — ^{c}) K2 सुधियो (for शुच°). — ^{d}) M6-8 दमात्मानो. K1 D5 T1 धृत°; K4 जित°, Ñ2 B3 Da G M महा°.

13 T2 om. 13^{abc} (cf. v. l. 12), G1 om. 13^{ab}. — ^{b}) K2 नानादेशात्समा°; T1 बलवतो दुरासदा. — ^{c}) D5 G1 कृतार्थाश्च. — ^{d}) Ś1 K D2.3 S समुपेष्य(K0 G2 M8 7 °ष्य)ति (T1 समेष्यतीह). K2 भूरिदा°.

14 ^{a}) Ś1 K1 विविधोपायान् (K1 °या); K0 3 N1 D5 M °धान्दानान्; Ñ2 °धान्देयान्; T G °ध दान. — ^{b}) Ñ2 D1 जनेश्वरा; G1 नराधिपा. — ^{d}) K1.2 G2 भक्ष्यभोज्य च; K4 T1 भक्ष्यभोज्यांश्च (T1 °ज्यानि).

15 ^{a}) T1 प्रतिलभ्य. Ś1 K3 D1 G1 तु तत्सर्वं; B3 D5 तत सर्वं. — ^{b}) T1 दृष्ट्वा कृष्णां स्वयंवरे. — ^{cd}) Ś1 K1-4 त च; K0 D5 तत्र (for चैव). T1 य च सा क्षत्रिय रंगे

नियोधकाश्च देशेभ्यः समेष्यन्ति महाबलाः ॥ १६
एवं कौतूहलं कृत्वा दृष्ट्वा च प्रतिगृह्य च ।
सहास्माभिर्महात्मानः पुनः प्रतिनिवर्त्स्यथ ॥ १७
दर्शनीयांश्च वः सर्वान्देवरूपानवस्थितान् ।
समीक्ष्य कृष्णा वरयेत्संगत्यान्यतमं वरम् ॥ १८

अयं भ्राता तव श्रीमान्दर्शनीयो महाभुजः ।
नियुध्यमानो विजयेत्संगत्या द्रविणं बहु ॥ १९

युधिष्ठिर उवाच ।

परमं भो गमिष्यामो द्रष्टुं देवमहोत्सवम् ।
भवद्भिः सहिताः सर्वे कन्यायास्तं स्वयंवरम् ॥ २० C. 1 6944 B. 1 184. 20 K. 1 185. 21

इति श्रीमहाभारते आदिपर्वणि पञ्चसप्तत्यधिकशततमोऽध्यायः ॥ १७५ ॥

कुमारी वरयिष्यति

16 ^a) Ś1 Ñ1.2 V1 B D (except D5) तत्र, G1 M6-8 चात्र (for चैव). — ^b) G6 तत्र (for सूत॰) M6-8 ॰मागधे — ^c) Ś1 नियोधयश्च, T1 निदेश॰; T2 G3-5 नियोध॰ — ^d) T1 समवेतान् (for समे॰) B (except B6) Da स्वयवरं; D4 परस्पर (for महा॰)

17 ^a) Ś1 एकं, T1 एतत् (for एवं) K4 S दृष्ट्वा (T1 तत्र) (for कृत्वा) — ^b) K4 S (except T1) भुक्त्वा (for दृष्ट्वा) — ^d) K1 पुर॰ प्रति; T1 मात्रा सह, G6 रग प्रति. K3 Da1 D1 T1 G3 M5 निवत्स्यथ; K4 T2 निवर्तेय; G1 ॰निवृत्स्यथ, G2-4 M8 निवर्तथ (M8 ॰त).

18 ^b) Ko S देवरूपानिव स्थि॰ — ^d) K4 Ñ2 V1 B D (except D5) संगत्यैकतमं (D2 ॰रं); M ॰तरं. T G (except G1) M8 पतिं (for वरम्)

19 ^a) K3 T2 G M भ्राता च व॰ शीघ्रं; T1 एको हि वो भ्राता — ^c) Ñ2.3 V1 B3.5 Dn D1.3 G3-5 नियुज्यमानो; G6 शूरस्यमानो Ñ V1 B1 Dn विजये — ^d) Ñ1.2 भवेद्; S महत् (for बहु). B5 सगत्यान्यतमं बल (cf. 18^d). — After 19, Ñ2 V1 D5 ins.

1805* आहरिष्यस्य नूनं प्रीतिं वो वर्धयिष्यति ।

20 Ś1 K1-3 S om उवाच — ^a) K1 व्रजिष्यामो T1 वय सह गमि॰; G5 परम भोजयिष्यामि — ^b) Ñ2 V1 B D चैव, G3-4 देश; G6 दैव (for देव), cf v 1 1^d, 11^d T1 द्रष्टु तत्र स्वयवरं — ^cd) Ś1 K1 सर्वैः (for सर्वे) Ś1 K D5 पांचाल्यास्त स्वय॰ T1 द्रौपदीं यज्ञसेनस्य कन्यां तस्यास्तयोरसर्वं

Colophon T2 G1-5 read a col after the first occurrence of this adhy (i e after adhy 157), and one also (after the second occurrence) here M reads it only here (after the second occurrence), the first occurrence being embodied in our adhy. 158 — *Major parvan* T2 G M संभव॰ (for आदि॰) — *Sub-parvan* Ś1 K Ñ3 B3.5 Da Dn1.n2 D1.2.4.5 T2 G3.4 (the latter three both times) M8 द्रौपदीस्वयंवर; N1.2 V1 B1 स्वयवर — *Adhy name* Ko.4 पाडवप्रस्थान॰ (K4 ॰स्थापन.); Ñ1.2 V1 पांडवागमनं; T2 G3.4.6 ब्राह्मण॰ समागम॰ — *Adhy no* (figures, words or both) Dn2 183, D4m 186, T1 165, T2 G2.4.5 (all first time) 117, and (all second time) 134, G1.3 (both first time) 119 and 115 respectively, and (both second time) 136, G6 M (at the second occurrence) 135 — *S'loka no* Dn M5 20 — *Aggregate s'loka no* Dn2 6916.

176

1 Ś1 K D2 S om. उवाच (Ko om the ref) — T1, which om. 1, repeats 1 175 1 here — ^a) Ś1 K (except K4) B1.2 Da D1 एवमुक्त्वा — D5 (marg sec m) S ins. after 1^ab (T1, after the repetition of 1 175 1), a *repetition* of 1803* [v l. T G सर्वे; M5 भूत्वा (for पार्था)]; of 1 55 20 — ^c) S (T1 om) राजन् (for राज्ञा) Ñ V1 B D5 G1.2 M5.8 ॰पचालान्

2 ^a) Ñ2 V1 D1 तेषु, B1.3 D2 ते च; Dn2 n3 ते सु; D2 स्वेन (for ते तं) — ^c) N2 V1 B Dn D1.4.5 धीरा (for राजन्) — ^d) Ñ1.2 V1 B D (except Da D2) मुनिं (for पथि) A few MSS तथा

3 T2 om 3-4 — ^a) M6-8 तस्मै यथैव Ko तस्मै पूजां यथार्हां च. — ^b) Ñ1 चक्रुस् (for कृत्वा) M8 रहसि (*inf lin* तेन च as in text) Ñ2 V1 B2.6 D सत्कृता॰ (for सान्त्विता॰) — ^c) Ś1 K1 चाप्यनु॰; D2 तदनु॰. S (T2 om) कथयित्वास्य(G8 ॰स्य)नु॰ — ^d) Ko.3.4 द्रुपद प्रति; Cd as in text

4 T2 om 4 (cf v 1 3) — ^b) Ko.4 D5 वनान्युपवनानि च; T1 G6 सरांसि च वनानि च (by transp). — ^c) M5.8 ते (for च)

१७६

C. 1. 6945
B. 1. 185. 1

वैशंपायन उवाच ।

एवमुक्ताः प्रयातास्ते पाण्डवा जनमेजय ।
राज्ञा दक्षिणपाञ्चालान्द्रुपदेनाभिरक्षितान् ॥ १
ततस्ते तं महात्मानं शुद्धात्मानमकल्मषम् ।
ददृशुः पाण्डवा राजन्पथि द्वैपायनं तदा ॥ २
तस्मै यथावत्सत्कारं कृत्वा तेन च सान्त्विताः ।
कथान्ते चाभ्यनुज्ञाताः प्रययुर्द्रुपदक्षयम् ॥ ३
पश्यन्तो रमणीयानि वनानि च सरांसि च ।
तत्र तत्र वसन्तश्च शनैर्जग्मुर्महारथाः ॥ ४
स्वाध्यायवन्तः शुचयो मधुराः प्रियवादिनः ।
आनुपूर्व्येण संप्राप्ताः पाञ्चालान्कुरुनन्दनाः ॥ ५
ते तु दृष्ट्वा पुरं तच्च स्कन्धावारं च पाण्डवाः ।
कुम्भकारस्य शालायां निवेशं चक्रिरे तदा ॥ ६
तत्र भैक्षं समाजह्रुर्ब्राह्मीं वृत्तिं समाश्रिताः ।
तांश्च प्राप्तांस्तदा वीराञ्जज्ञिरे न नराः क्वचित् ॥ ७
यज्ञसेनस्य कामस्तु पाण्डवाय किरीटिने ।
कृष्णां दद्यामिति सदा न चैतद्विवृणोति सः ॥ ८
सोऽन्वेषमाणः कौन्तेयान्पाञ्चाल्यो जनमेजय ।
दृढं धनुरनायम्यं कारयामास भारत ॥ ९
यन्त्रं वैहायसं चापि कारयामास कृत्रिमम् ।

---

5 a) G6 मधुरा (for शुचयो) — b) K1 B4 मधुरः; G3 मधुका, G6 पाडवा K3 प्रियदर्शना — cd) Ś1 K (except K3) Ñ2 D1 G2 आ(K4 अ)नुपूर्वेण; Cd as in text T1 transp समाप्ता and पांचालान् A few MSS. पचालान् Ñ2 V1 B D (except D5) पाडुनंदना
6 a) D1 दृष्ट्वा तु (by transp) T G पुर तस्य — b) K3 स्कधागार; T2 G °धारान्, Cd as in text — d) Ñ2 3 V1 B D (except D4) M6–8 निवासं
7 a) Some MSS भैक्ष्यं — b) K3 Ñ1. 3 B3 5 Dn D2 4 5 समास्थिता Ñ2 V1 Dn D1 प्राह्मणीं वृत्तिमाश्रिताः. — c) Ñ2 V1 B1 Dn D1. 5 तान्सप्राप्तान्; G1 प्राक्च प्रा° K2. 3 Ñ2 V1 B (except B6) Dn D1 S (except T1 G3. 4) तथा B1 3 राजन् (for वीरान्) — d) Dn मानवा (for न नरा) — After 7, D4 (marg sec m) T G2–8 ins
1806* यज्ञसेनस्तु पाञ्चाल्यो भीष्मद्रोणकृतागसम् ।
ज्ञात्वात्मान तदारेभे प्राणायामक्रिया क्षमाम् ।
अवाप्य धृष्टद्युम्न हि न स द्रोणमचिन्तयत् ।
सुतवैरप्रसङ्गाच्च भीष्माद्भयमचिन्तयत् ।
[(L. 2) D4 T2 ततोरेभे; T1 तदा रेभे; G3 समारेभे D4 T2 प्राणायामक्रियां T1 G4 क्षमां क्रियां (by transp) — (L. 4) D4 T2 स तु, T1 स्थित; G4 स से (for सुत)] D4 (marg sec. m) T2 G5 cont T1 G2–4 ins after 8
1807* कन्यादानात्तु शरण सोऽमन्यत महीपति ।
नानानुपंक्तसंयोगान्मेने ह यत्यतरम् ।
[(L. 1) D4 °दान तु; G1–4 °दानाद्धि G3 सोपश्यत — (L. 2) D4 G1–4 हि (for ह)]

8 a) Dn काम तु T1 स कामो यज्ञसेनस्य — c) T2 G5 6 ददानीति; G1–4 M ददामीति T1 दास्यामि कृष्णामिति वै — d) B5 न चैत; T1 न चैनं Ś1 तु; Cd वि (as in text). — After 8, T1 G1–4 ins 1807*
9 ab) Ś1 सोन्वेष्यमाण; D1 G6 M8 अन्वेष° Ñ2 3 V1 B D M6–8 कौंतेय G6 पांचाल कौन्वेयान् S (except T1) पाचालो — After 9ab, D4 (marg sec m) T G2. 3 ins.
1808* शक्रेण वरो दत्त प्रीतेन च महात्मना ।
स निष्फल स्यान्न तु मे इति प्रामाण्यमागत ।
मया कर्तव्यमधुना दुष्करं लक्ष्यवेधनम् ।
इति निश्चित्य मनसा कारितं लक्ष्यमुत्तमम् ।
[(L. 1) T2 G5 वरं दत्तं — (L. 2) D4 T2 G3 तन्निष्फल] — c) Ñ2 3 V1 B (B1m as in text) D T2 G1 M6 °नानम्य — d) G1–4 मार्गयामास G1–4 वै तदा (for भारत) — After 9, T G2–8 ins
1809* वैय्याघ्रपद्यसोम्र वै सृञ्जयस्य महीपते ।
तद्धनु किंधुर नाम देवदत्तमुपानयत् ।
आयसी तस्य ज्या चासीत्प्रतिबद्धा महाबला ।
न तु ज्या प्रसहेदन्या तद्धनुःप्रवर महत् ।
[(L. 1) T G3 वैय्याघ्रपाद° G3 महीक्षित — (L. 2) T G3 स धनु — (L. 3) T2 G2. 4 ज्यायासीत्]
10 a) Ñ V1 B1 3 D (except D5) T2 G5 6 M6–8 समित, T1 समयं M8. 5 यत्नेण समित लक्ष — b) G1–3 राजन् (for राजा) Ñ2 V1 B D (except D4) चकार सः. T G6 M कारयामास कांचन

तेन यन्त्रेण सहितं राजा लक्ष्यं च काञ्चनम् ॥ १०

द्रुपद उवाच ।

इदं सज्यं धनुः कृत्वा सज्येनानेन सायकैः ।
अतीत्य लक्ष्यं यो वेद्धा स लब्धा मत्सुतामिति ॥

वैशंपायन उवाच ।

इति स द्रुपदो राजा सर्वतः समघोषयत् ।
तच्छ्रुत्वा पार्थिवाः सर्वे समीयुस्तत्र भारत ॥ १२
ऋषयश्च महात्मानः स्वयंवरदिदृक्षया ।
दुर्योधनपुरोगाश्च सकर्णाः कुरवो नृप ॥ १३
ब्राह्मणाश्च महाभागा देशेभ्यः समुपागमन् ।
तेऽभ्यर्चिता राजगणा द्रुपदेन महात्मना ॥ १४
ततः पौरजनाः सर्वे सागरोद्धूतनिःस्वनाः ।
शिशुमारपुरं प्राप्य न्यविशंस्ते च पार्थिवाः ॥ १५
प्रागुत्तरेण नगराद्भूमिभागे समे शुभे ।
समाजवाटः शुशुभे भवनैः सर्वतो वृतः ॥ १६
प्राकारपरिखोपेतो द्वारतोरणमण्डितः ।
वितानेन विचित्रेण सर्वतः समवस्तृतः ॥ १७
तूर्यौघशतसंकीर्णः परार्ध्यागुरुधूपितः ।
चन्दनोदकसिक्तश्च माल्यदामैश्च शोभितः ॥ १८
कैलासशिखरप्रख्यैर्नभस्तलविलेखिभिः ।

C. 1 6963
B. 1 185. 19
K. 1 200. 28

---

11 Ś1 K1 om उवाच, S om the ref — a) A few MSS सज्ज. — b) K2 सज्जेन, T G2-4 6 M छिद्रेण, G1 यंत्रेण. Ñ V1 B D सज्जैरेभिश्च (B6 Da D2 °स्तु) (Ñ1 सज्जैरातत) — c) Ś1m K1 संधाय लक्ष्यं B Da D2 4 यो विध्येत्; G2-4. 6 यो विध्यात् — d) B D2 4 स लभेन् S च (for मत्) Ñ1 B6 Da D4 5 इमां (for इति) — After 11, Ś1 K D5 ins an additional colophon (*Sub-parvan* Ś1 K द्रौपदीस्वयंवर — *Adhy name* Ko 4 D5 द्रुपदवाक्य — *Adhy no* D5 133)

12 Ś1 K (except Ko) om उवाच; S om the ref. — a) K1 इत्थं स; S इत्येवं (T1 °व) — b) Ñ2 V1 B D स्वयवरमघो°; G1 सर्वलोकेष्वघो° — c) T1 G6 पांडवा सर्वे

13 b) Ñ V1 Dn °दिदृक्षव — T1 G2-4 ins after 13ab (G2 has line 1 only after 13ab and the rest after 13, G3 4 om. 14ab)

1810* यादवा वासुदेवेन सार्धमन्धकवृष्णय· ।
राजानो राजपुत्राश्च युवानो मृष्टकुण्डला ।
नानाजनपदाधीशा यज्वानो भूरिदक्षिणा ।
मनोज्ञरूपलावण्या महेन्द्रसमविक्रमा ।
क्रोधेन चाग्निसदृशा क्षमया पृथिवीसमा ।
स्थैर्ये मेरुसमा धीरा सूर्यवैश्वानरोपमा ।
पृथिव्यां ये च राजान ऋषयश्च तपोधना ।
बालवृद्धानृते सर्वे महीपाला· समागता ।
त्रयस्त्रिंशत्सुरा सर्वे विमानैर्व्योम्नि निष्ठिता ।

— c) G3 4 दुर्योधनमुखाश्चैव. — d) G2 कौरवा (for कुरवो) Ko 3. 4 Ñ1 3 Da D5 T G1 2 6 M6-8 नृपा·, G3 4 ययु — After 13, G2 ins. lines 2-9 of 1810*

14 G3 4 om 14ab — b) K3 Ñ1 T G (G3 4 om.) M3 (*inf. lin.*). 6-8 समुपागता M8 5 नानादेशसमागता. — c) Ñ V1 B D (except D5) G2-4 ततोर्चिता; T2 ते ह्यर्चि° G2-4 महीपाला, G6 नरेंद्रेण (for राज°) — After 14, T1 G2-4 ins

1811* ब्राह्मणैरेव सहिताः पाण्डवा· समुपाविशन् ।
वैतालिका नर्तकाश्च सूतमागधवन्दिनः ।

T1 G2-4 cont N ins after 14

1812* उपोपविष्टा मञ्चेषु द्रष्टुकामाः स्वयंवरम् ।
[T1 G2-4 राजन्नुपागमन्सर्वे द्रष्टु° etc]

15 a) K4 पौरजन सर्वे·; S पुरवरे श्रेष्ठे — b) Ś1 K1 2 T1 G1 6 M सागरोद्धत°, K4 °स्वन·; T2 G2-5 °रोपमनिस्वने — c) K4 D4 S शि(G5 शि)शुमारगिरिं (K4 °शिर; D4 °शिर·) प्राप्य — d) K (except K1) B5 D1 5 न्यवसन् (for न्यविशन्) Ko 3 4 D5 तत्र; B1 3 Da D4 तेथ, B5 तेपु, D1 ते स्म (for ते च) K1 पार्थिव S न्यविशत महारथा·.

16 a) S °त्तरे च — b) Ñ3 M5 भूमिदेशे

17 a) D4 T G प्राकार(T1 G6 °साद)परिघोपेतो — d) B1(m as in text) 3 सवृत·, G6 सर्वत्र (for सर्वत) Ś1 K4 D4 समविस्तृत ; K1 Ñ2 V1 B1m 6 Dn D1 5 T2 G2-5 °लंकृत·; Ñ1 B1 3 5 Da °वस्थित (B5 °तै), T1 समुपावृत ; G1 संवृतस्तत·, G6 M °वास्तृत ; text as in Ko 2 3 Ñ3 D2 !

18 b) Ś1 Ñ1 3 °भूपित ; Ko °रूपित·; K1 °वासित· K2-4 Dn3 D1 S (except T1) °र्घ्यागरुधूपि(K3 3 °भूपि)तः. — G3 om 18cd — c) B6 °नागरुसिक्तश्च, M6-8 °सिक्तैश्च — d) Ś1 K (except K3) माल्यपुञ्जैश्च Ñ1 भूपित. Ñ2 V1 B D °दामोपशो° (D5 °दामविभूपित·); T1 °दाम विशोभित·, M8 °दामभिरावृत·

19 b) D1 2 T2 G3-6 M6-8 नभ·स्थल° — c) K3 Ñ2

C. 1. 6993 B. 1. 185. 12 K. 1. 200. 23

सर्वतः संवृतैर्नद्धः प्रासादैः सुकृतोच्छ्रितैः ॥ १९
सुवर्णजालसंवीतैर्मणिकुट्टिमभूषितैः ।
सुखारोहणसोपानैर्महासनपरिच्छदैः ॥ २०
अग्राम्यसमवच्छन्नैरगुरूत्तमवासितैः ।
हंसांशुवर्णैर्बहुभिरायोजनसुगन्धिभिः ॥ २१
असंबाधशतद्वारैः शयनासनशोभितैः ।
बहुधातुपिनद्धाङ्गैर्हिमवच्छिखरैरिव ॥ २२
तत्र नानाप्रकारेषु विमानेषु स्वलंकृताः ।
स्पर्धमानास्तदान्योन्यं निषेदुः सर्वपार्थिवाः ॥ २३
तत्रोपविष्टान्ददृशुर्महासत्त्वपराक्रमान् ।
राजसिंहान्महाभागान्कृष्णागुरुविभूषितान् ॥ २४
महाप्रसादान्ब्रह्मण्यान्स्वराष्ट्रपरिरक्षिणः ।
प्रियान्सर्वस्य लोकस्य सुकृतैः कर्मभिः शुभैः ॥ २५
मञ्चेषु च परार्ध्येषु पौरजानपदा जनाः ।
कृष्णादर्शनतुष्ट्यर्थं सर्वतः समुपाविशन् ॥ २६
ब्राह्मणैस्ते च सहिताः पाण्डवाः समुपाविशन् ।
ऋद्धिं पाञ्चालराजस्य पश्यन्तस्तामनुत्तमाम् ॥ २७
ततः समाजो ववृधे स राजन्दिवसान्बहून् ।
रत्नप्रदानबहुलः शोभितो नटनर्तकैः ॥ २८
वर्तमाने समाजे तु रमणीयेऽह्नि षोडशे ।
आप्लुताङ्गी सुवसना सर्वाभरणभूषिता ॥ २९
वीरकांस्यमुपादाय काञ्चनं समलंकृतम् ।
अवतीर्णा ततो रङ्गं द्रौपदी भरतर्षभ ॥ ३०
पुरोहितः सोमकानां मन्त्रविद्ब्राह्मणः शुचिः ।
परिस्तीर्य जुहावाग्निमाज्येन विधिना तदा ॥ ३१
स तर्पयित्वा ज्वलनं ब्राह्मणान्स्वस्ति वाच्य च ।

V1 B D (except D3) सवृ(K3 °मृ)त° (B6 °तै) शुभ्रै°; M (except M1) सवृतो नद्धै° — c) Ñ3 V1 B D T G1 (by corr) 3 (sup lin) M3 3 °तोच्छ्र(D5 °च)यै..

20 a) T G (except G4) °जालवितते; M3 °माला संयुक्त; M6-8 °मालासवीतै — b) Ś1 K3 Ñ3 V1 Dn3 °भूषणै°

21 a) K4 °समवस्थानै; Ñ2 V1 B1 T1 स्वागदमसम°, D3 °वसनच्छन्नै — b) Ś1 K0-2 4 °भूषितै; K3 Ñ1.3 T2 G M °धूपितै; T1 वितानध्वजशोभितै° Some MSS. अगरु° (for अगुरु) — K0 om 21c-22b, G1 om 21cd — c) K2 हसांग°; K3 4 D2.3 हसाभ्र°; Ñ2.3 V1 B1.6 Dn D1 हसांशु°; B1 3 Dn हसांस°, S हसवर्णैश्च

22 K0 om 22ab (cf v 1 21). — a) Ñ1 3 S °पथ(T2 G3 °पथि, G1 °पदैर)द्वारै° — b) K4 °शोभनै°; M6-8 °शोभिभि.. — c) Ś1 K (except K3) M3 °विन द्धांगै, Ñ1 3 °नियद्धागै°; T2 G3-4 °विद्रिषांगै

23 c) T2 G सदान्योन्यं — d) Ñ1 निषेदुर्वसुधाधिपा

24 b) Ś1 K Ñ1 3 V1 D5 महायल°; S महासत्वान्पृथग्जना (T1 G1 °नान्) — c) M6-8 नरसिंहान् — d) K0.2 4 D5 दिव्यचन्दनभूषितान्; S मृष्टस्रगनुलेपनान्

25 a) T1 G1 महाप्रभावान् Ś1 Dn3 D1 G3 ब्राह्मण्यान् — b) G1 स्वराष्ट्रस्य हि र° — c) G6 धर्मस्य लोकस्य — d) K (except K1) D3 3 T1 G3 M3 स्वकृतै G3 स्वकृतैःशुभाशुभै

26 a) S ततो मञ्चाधिमञ्चेषु — b) Ś1 पदपतस्तान सुत्तमान्; K (except K1) Ñ3 B Dn D1.3 4 °पदो जन — cd) Ñ2 V1 B D °सिद्ध्य° (for °तुष्ट्य°) Ś1 पौराश्च (for सर्वत) K0 2.3 Ñ3 B Dn D1 3 4 समुपाविशत् S उपोपविविशु सर्वे याज्ञसेनीं दिदृक्षव°

27 Ś1 K1.2.4 (hapl) om 27ab — a) B3 T1 स्तेव; T2 G M चैव (G1 स्तैश्च) (for ते च) — c) Some MSS पचाल° G6 पांचालदेशस्य — c) Ś1 जानपदास्तथैव च(!); G2 4 °स्तामनिंदितां

28 a) K3 B1 Dn D1 G6 M ववृते — b) G1.3 M6 स राजा — c) K1 रगप्रभमन° (sic), K3 °प्रधान°; Dn D1 2 °प्रवाल°.

29 b) M6.8 पुरोत्तमे; M6-8 हि षोडशे — After 29ab, D4 (suppl. fol., sec m.) ins a passage of 50 lines given in App I (No 98) — c) S आप्लुता (M6-8 °स्य) शुद्धवसना

30 a) Ñ3 V1 Dn D1 4 6 माला च स(D5 चिता)मुपादाय; G4 वीरकां स्रजमादाय Cd वीरकांस्य (=मालां) as in text — b) Ñ3 V1 Dn D1.4 5 कांचनीं समलकृतां; T2 G1.4 5 कांचनै स° — d) K4 द्रौपदी योषितां वरा; S द्रौपदी द्रुपदात्मजा

31 c) K0 4 ब्राह्मणर्षभ — d) Ñ V1 B D विधिवत्तदा; M6-8 हविषा सदा

32 a) K1 4 Ñ V1 B (except B1) D (except Dn3 D1) T2 G1.4 5 M3 6 सतर्प°; K3 तर्पयित्वा तु — b) Ñ1.3 Dn1 ब्राह्मण. Ś1 K1 स्वस्ति वाचयन् — c) Ś1 K1.4 Dn1

वारयामास सर्वाणि वादित्राणि समन्ततः ॥ ३२
निःशब्दे तु कृते तस्मिन्धृष्टद्युम्नो विशां पते ।
रङ्गमध्यगतस्तत्र मेघगम्भीरया गिरा ।
वाक्यमुच्चैर्जगादेदं श्लक्ष्णमर्थवदुत्तमम् ॥ ३३
इदं धनुर्लक्ष्यमिमे च बाणाः
शृण्वन्तु मे पार्थिवाः सर्व एव ।
यन्त्रच्छिद्रेणाभ्यतिक्रम्य लक्ष्यं
समर्पयध्वं खगमैर्दशार्धैः ॥ ३४
एतत्कर्ता कर्म सुदुष्करं यः
कुलेन रूपेण बलेन युक्तः ।
तस्याद्य भार्या भगिनी ममेयं
कृष्णा भवित्री न मृषा ब्रवीमि ॥ ३५
तानेवमुक्त्वा द्रुपदस्य पुत्रः
पश्चादिदं द्रौपदीमभ्युवाच ।
नाम्ना च गोत्रेण च कर्मणा च
संकीर्तयंस्तान्नृपतीन्समेतान् ॥ ३६

C. 1 6990
B. 1 185. 37
K. 1 200 62

इति श्रीमहाभारते आदिपर्वणि षट्सप्तत्यधिकशततमोऽध्यायः ॥ १७६ ॥

G6 M वादयामास G6 सर्वे हि. — d) K1 च सर्वश. (for समन्त°).

33 b) D1 याज्ञसेनो (for धृष्ट°). — After 33ab, K4 Ñ1 2 V1 B3.6 Dn2 D1 2.4 5 ins.

1813* कृष्णामादाय विधिवन्मेघदुन्दुभिनिःस्वन· ।

— c) K2 N V1 B6 Dn D4 5 G2 M6–8 रगमध्ये; B1 D1 °मध्य, G1 जनमध्ये — d) S (except T1 G6) गंभीरनिस्वन.. — e) M6–8 घाक्य(M7 °च)मुच्चैर् — f) G1 श्लक्ष्ण धर्मवदुत्तम

34 K3 om. 34–36 Before 34, Ko 4 D5 ins. धृष्टद्युम्न उ°, S (except M6–8) धृष्टद्युम्नः. — a) Some MSS लक्षम् — b) Ś1 शृण्वन्त्विमे; Ñ1 °तु ये S क्षत्रियाः (for पार्थिवा·). Ś1 एव सर्वे (by transp) Ñ1.2 V1 B D (except D5) मे भूपतयः समेताः — c) Ñ2 V1 B D छिद्रेण यन्त्रस्य समर्पयध्व — d) Ko 4 समापयध्वं, K1 समर्द°; K2 समर्थ°. Ñ2 V1 B D लक्ष्य (Ñ2 V1 Dn D1 शरै) शितैर्व्योमचरैर्दशार्धैः ; G3 समाददे पचभिश्चापि बाणै Cd cites खगमै (as in text)

35 K3 om 35 (of v. l. 34) — a) Ñ2 V1 B D एतन्महत्कर्म करोति यो वै — b) G1 तस्यैव M (except M5) भविता (for भगिनी) B6 Da D2 ममैषा — d) S (except T1 G1 2) कृष्णा स्वसा न मृषा प्रब्रवीमि.

36 K3 om 36 (of v l 34) — a) G3 तेनैवम्; G4 तामेवम् — b) D5 S इति (for अभि) Ñ2 V1 B Da Dn D1–4 °द तां भगिनीमुवाच. — d) Ñ2 V1 B5 6 D (except D4) भूमिपतीन् (for तान्नृपतीन्)

Colophon om. in K3. — *Major parvan* T2 G M संभव° (for आदि). — *Sub-parvan* Ś1 Ko–2 Ñ3 B D2 4 T2 G1.4.6 M3.6–8 द्रौपदीस्वयवर; Ñ1.2 V1 Dn3 M5 स्वयंवर; T1 संभव — *Adhy name* Ko 4 D5 द्रौपदी(Ko om)रंगावतरणं, N1.2 V1 धृष्टद्युम्नवाक्यं — *Adhy no.* (figures, words or both) Dn3 184, D1 80 (read 180), D4m 187, T1 183, T2 G2 4.5 135, G1.3 137; G6 M 136 — *S'loka no* Dn 36, M3 37. — *Aggregate s'loka no* Dn2 6952

177

1 Ś1 K1.2 S om. उवाच — d) Ko Ñ2 V1 B D तथा; K3 शल ; M3 5 शम (for सम.)

2 a) Ṅ V1 B D वायुर्वेग°. — b) Ś1 भीमवेश°, Ko 3.4 °वेगोपर°; Ñ1 °बाणधर°; Ñ2 V1 B1 6 Da Dn D1 G1 °वेगरव°; D2 T °वेगरथ°; D5 °वेगघन°; G2–4 °वेगरय°; G5 °वेगरत°, G6 °वेगश्च वीर्यवान् — D1 (hapl.) om 2c–3d. — c) T1 G2 बलाकश्च; G6 °किश्च — d) Ñ2 V1 B (except B6) Dn D4 करकायुर्

3 D1 om. 3 (of v l 2) — a) Ko 3 D5 T G M3 सकुण्डलश्(G1 °लिश्). Ś1 K1.2 चित्रवेदी (K1 °धी) Ñ2 V1 B Da Dn D2 4 कुंडज(Ñ2 V1 B6 Dn °क; D2 4 °ल)श्चित्रसेनश्च — b) Ś1 सुवर्च ; K (except K1) B5 Da °र्चा — c) Ś1 D2 M6–8 बहु°; K3 °शीली, B4 बल° — d) Ko 3.4 कुण्डलो; N2 V1 B4 Dn तुहुण्डो; B1.3 6 Da D2 4 5 मुकुटो, S कुण्डली B4 T1 विकचस् — After 3, D4 (marg sec m) S ins

1814* विन्दश्चाप्यनुविन्दश्च सजीवी विकल· करी ।
[T1 G1 M3.5 सदीपी; T2 G4–6 सदीपी; M6–8 सजीवी]

4 c) K4 शूरा (for वीरा) — d) Ñ1 समुपागमन्; D2 °पस्थिता.. — e) Ñ2 V1 Dn D1 असख्याता (for

१७७

C. 1. 6781
B. 1. 186. 1
K. 1. 201. 1

धृष्टद्युम्न उवाच ।

दुर्योधनो दुर्विषहो दुर्मुखो दुष्प्रधर्षणः ।
विविंशतिर्विकर्णश्च सहो दुःशासनः समः ॥ १
युयुत्सुर्वातवेगश्च भीमवेगधरस्तथा ।
उग्रायुधो बलाकी च कनकायुर्विरोचनः ॥ २
सुकुण्डलश्चित्रसेनः सुवर्चाः कनकध्वजः ।
नन्दको बाहुशाली च कुण्डजो विकटस्तथा ॥ ३
एते चान्ये च बहवो धार्तराष्ट्रा महाबलाः ।
कर्णेन सहिता वीरास्त्वदर्थं समुपागताः ।
शतसंख्या महात्मानः प्रथिताः क्षत्रियर्षभाः ॥ ४
शकुनिश्च बलश्चैव वृषकोऽथ बृहद्बलः ।
एते गान्धारराजस्य सुताः सर्वे समागताः ॥ ५
अश्वत्थामा च भोजश्च सर्वशस्त्रभृतां वरौ ।
समवेतौ महात्मानौ त्वदर्थे समलंकृतौ ॥ ६
बृहन्तो मणिमांश्चैव दण्डधारश्च वीर्यवान् ।
सहदेवो जयत्सेनो मेघसंधिश्च मागधः ॥ ७
विराटः सह पुत्राभ्यां शङ्खेनैवोत्तरेण च ।
वार्धक्षेमिः सुवर्चाश्च सेनाबिन्दुश्च पार्थिवः ॥ ८
अभिभूः सह पुत्रेण सुदाम्ना च सुवर्चसा ।
सुमित्रः सुकुमारश्च वृकः सत्यधृतिस्तथा ॥ ९
सूर्यध्वजो रोचमानो नीलश्चित्रायुधस्तथा ।
अंशुमांश्चेकितानश्च श्रेणिमांश्च महाबलः ॥ १०
समुद्रसेनपुत्रश्च चन्द्रसेनः प्रतापवान् ।
जलसंधः पितापुत्रौ सुदण्डो दण्ड एव च ॥ ११
पौण्ड्रको वासुदेवश्च भगदत्तश्च वीर्यवान् ।
कलिङ्गस्ताम्रलिप्तश्च पत्तनाधिपतिस्तथा ॥ १२
मद्रराजस्तथा शल्यः सहपुत्रो महारथः ।
रुक्माङ्गदेन वीरेण तथा रुक्मरथेन च ॥ १३
कौरव्यः सोमदत्तश्च पुत्राश्चास्य महारथाः ।
समवेतास्त्रयः शूरा भूरिर्भूरिश्रवाः शलः ॥ १४

शत°) Ś1 महाबला (for °त्मान) — f) Ñ3 V1 Dn D1 पार्थिवा; S समेता (for प्रथिता) K3.4 क्षत्रिया भुवि, S देवरूपिण°

5 a) K T2 G1.3.4 °निश्चाच(K1 °नि सच)ल°श्चैव; Ñ V1 B D G3 M6-8 °नि सौबल°, T1 °निश्चाशल°; G2 M5 °निश्चापल°, G6 °निश्चाचलै° — b) S महाधनु° (G6 °रथा) (for बृह°) — d) B3 Da D2.4 S पुत्रा Ś1 K D5 प्रकीर्तिता° (for समा)

6 a) D5 द्रोण° (for भोज°) — G6 om 6c–8b — c) Ñ1 समागतौ; M6-8 सयने तौ — d) Many S MSS त्वदर्थं

7 G3 om 7 (cf v l. 6) — a) Ś1 K1 बृहन्तौ(K1 °न्तो)मणि°; K0 D4 बृहन्तुर्मणि°; M (except M8) बृहन्तौ मणि° — b) Ñ3 V1 B D (except D4) पार्थिव (for वीर्य) — D2 (hapl.) om 7c–8d — c) Ñ V1 B D (except D4, D2 om) सहदेवजयत्सेनौ — d) Ñ2.3 V1 Dn D1 पार्थिव° (for मागध)

8 G1 om. 8ab, D2 om. 8 (cf v l 6, 7) — a) K3 सुधन्वा च; Ñ1.2 V1 Dn D1 सुदामा च; G3 सप्तपुत्र, G2 सयीज°; G4 सार्यदु° — d) K3 पार्थिव, K4 °वा°; S वीर्यवान्

9 a) Ñ1.2 अविद्य; Ñ3 V1 B1(m as in text) 3.6 Dn D1.2 सुकेतु°; B3 D4 अविमु°; Da अवित्त (for अभि°) Ñ3 सहपुत्रश्च — b) K1 Ñ3.3 V1 B3 Dn D1.4 सुनाम्ना; S वसुना K1 Ñ3 B3 Da अथ (for च) — c) K0.3.4 Ñ V1 B1.5 Dn D1.4.5 M5.8 सुचित्र; B3 °जित; G1 °मित्रि — d) K3 वृत्त, G6 धृत्त (for वृक) T2 G3.5 सत्यव्रतस्

10 Ś1 K3 (hapl.) om. 10ab — b) B3 नीलश्चोग्रायुध°

11 a) T G °श्चद्रश्च — b) B (except B3) Da D2.4 चित्रसेन; G6 इन्द्र° K0.3.4 D5 च वीर्यवान्; S च पार्थिव° (for प्रताप°) — c) S (except G3) जरासंध D5 S स(G2-4 च, M5 सु)पुत्रश्च (G1 °स्तु) — d) K0.2.3 Ñ1 B1.5 अदण्डो; K4 Ñ3.3 V1 Dn D1 विदण्डो

12 c) K (except K1) B M6-8 ताम्रलिप्तश्च G1 कलिङ्गाधिपतिस्ताम्र — d) Ś1 K1.3 पट्टना°; D2 यवना°; M5 वर्तना° Ñ1 S महान् (for तथा)

13 b) K (except K1) S सह पुत्रैर् S महाबल° — c) K3 रुक्मांगदे विचित्रेण

सुदक्षिणश्च काम्बोजो दृढधन्वा च कौरवः ।
बृहद्बलः सुषेणश्च शिबिरौशीनरस्तथा ॥ १५
संकर्षणो वासुदेवो रौक्मिणेयश्च वीर्यवान् ।
साम्बश्च चारुदेष्णश्च सारणोऽथ गदस्तथा ॥ १६
अक्रूरः सात्यकिश्चैव उद्धवश्च महाबलः ।
कृतवर्मा च हार्दिक्यः पृथुर्विपृथुरेव च ॥ १७
विडूरथश्च कङ्कश्च समीकः सारमेजयः ।
वीरो वातपतिश्चैव झिल्ली पिण्डारकस्तथा ।
उशीनरश्च विक्रान्तो वृष्णयस्ते प्रकीर्तिताः ॥ १८

भगीरथो बृहत्क्षत्रः सैन्धवश्च जयद्रथः ।
बृहद्रथो बाह्लिकश्च श्रुतायुश्च महारथः ॥ १९
उलूकः कैतवो राजा चित्राङ्गदशुभाङ्गदौ ।
वत्सराजश्च धृतिमान्कोसलाधिपतिस्तथा ॥ २०
एते चान्ये च बहवो नानाजनपदेश्वराः ।
त्वदर्थमागता भद्रे क्षत्रियाः प्रथिता भुवि ॥ २१
एते वेत्स्यन्ति विक्रान्तास्त्वदर्थं लक्ष्यमुत्तमम् ।
विध्येत य इमं लक्ष्यं वरयेथाः शुभेऽद्य तम् ॥ २२ C 1 7004 B 1 186 24 K 1 201 24

इति श्रीमहाभारते आदिपर्वणि सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥

---

14 D1 (! hapl) om 14^{b}–15^{a} — ^{b}) Ś1 Ñ2 V1 B1.3 Dn पुत्रश्चास्य, T1 °श्चैव; G6 °स्वस्य Ś1 Ñ2 V1 Dn °रथ. — ^{c}) K0 D5 अथ. पुत्रा° — ^{d}) K4 बल., T1 बलः (for शलः)

15 D1 om 15^{abc} (cf. v l 14) — ^{a}) A few MSS कांभोजो — ^{b}) K0 3.4 Ñ V1 B1 6 Da Dn D2 पौरव (for कौ°) — ^{c}) S (except T1 G6) सुषेणश्च — After 15, N (for D4 see below) ins

1815* पटच्चरनिहन्ता च कारूपाधिपतिस्तथा ।
[K (except K4) Da D2 करूपा°]

On the other hand, S ins after 15

1816* पाण्ड्यकेरलचोलेन्द्रास्त्रयस्त्रेतामयो यथा ।
आसनेषु विराजन्ते आशामागस्त्यमाश्रिता° ।

D4 (marg *sec m*) ins 1815* after 1816* (v l in line 2 of 1816* भृशमादित्यसन्निभा for the posterior half)

16 ^{ab}) K1 रोहिणेयश्च (for रौक्मि°) S संकर्षणो रौहिणेयो वासुदेवश्च वीर्य° — K1 om 16^{c}–17^{b} — ^{c}) Some MSS शाम्बश्च — ^{d}) Ś1 सारणीयो गद°, K4 सारणश्चांगद°, Ñ2 3 V1 B6 Dn D1 4 प्राद्युम्नि सगद°(D1 °गण°); M6-8 सारणो निशठस्तथा

17 K1 om 17^{ab} (of v l 16) — ^{a}) K4 S स(K4 T1 सा)त्यक(G1 3 °ग)श्चैव (G6 सात्त्विकश्चैव) — D2 om 17^{b}–18^{a} — ^{b}) Ñ V1 B D (D2 om) महाम(B5 D4 °धु)ति° S युयुधानश्च सात्यकि — ^{d}) K1 तथा (for पृथुर्) M6-8 पृथिवीं पृथुरेव च

18 D2 om 18^{a} (cf. v l 17) — ^{a}) N (D2 om) विदूरथश्च K1 कद्रुश्च; T1 G2 6 M5 कण्व°; T2 M3 6-8 कद्र°; G1 3-5 कर्ण° (cf. 1. 1. 173^{d} and v l) — After 18^{a}, K3 ins.

1817* ये चान्ये यादवास्तथा ।
आगतास्तव हेतोश्च कृष्णे जानीहि सत्वरम् ।
कृतवर्मा च हार्दिक्य° (=17^{c})

— N ins after 18^{a} (K3, after 1817*, D2, which om 17^{b}–18^{a}, after 17^{a})

1818* शङ्कुश्च सगवेषण. ।
आशावहोऽनिरुद्धश्च

[(L 2) K0 3 4 B (except B3) D (except Dn) आ(B1 m यु)गावहो]

— c) K0 1 8 D2 5 M5 एतान् (for एनान्) — d) N T1 G6 °त्स्याम हृष्टवत् (G6 °मि हृष्टवान्) — After 31, Ś1 K Ñ1 2 V1 B3 D (except Da) ins

1883* तांस्तथा वदत सर्वान्प्रसमीक्ष्य क्षितीश्वरान् ।
अत्यन्यान्पुरुषांश्चापि कृत्वा तत्कर्म संयुगे ।

[(L. 1) Ñ1 2 V1 B3 Dn D1 2 4 °था वादिन — (L. 2) K0 3 4 अन्योन्य, Ñ1, 2 V1 B3 Dn D1 2 4 5 अथान्यान्; Cd अत्यन्यान् (as above) B3 कृते कर्मणि सं°]

32 Before 32, Ñ V1 B (except B6) Dn D1 2 4 M3, 5 ins वैश° उ° (resp. वैश°) — a) Ñ1 कर्णं (for कृष्ण.) T2 G2 5 °स्य हरि (G2 हसन्) समीक्ष्य. — b) Ñ1 स (for तौ)

33 a) G6 °रुद्धा° (for °वृत्ता°) Ñ2 3 V1 B D एव ते विनि° — b) T2 G (except G1 6) क्षुब्धा (for युद्धाद्) — c) N3 यथाकाम — Ś1 K1 om 33^{c}–34^{c} — d) K (K1 om) Ñ1 D5 राज(K0 नर)पुगवा

34 Ś1 K1 om 34^{abc} (of v l 33) — b) Da1 D1 G2 पाचालैर् K (K1 om) M हृता — c) K4 इति स्तुवत — d) G1 ये के तत्र समा°

35 b) G1 °जिनधारिभि — K2 3 transp 35^{cd} and 36^{ab} — c) Ñ2 V1 B D (except D2 4 5) तौ तु (for तत्र)

36 K2 3 transp 35^{cd} and 36^{ab} — a) M6–8 निवृत्तौ (for विमुक्तौ) Dn राज (for जन) — b) Ś1 K B1m Cd क्षतविक्षतौ; B1, 3 D2 T G3 6 M6 परिवीक्षि°, B5 परिरक्षि°, G1 परिवर्जि°; G2 च निविक्षि°, G3 4 साधु वीक्षि°; M8 परिवारि° — d) T2 G2–5 तौ वीरौ हि विरे°; G6 नृवीरौ तत्र रे° — After 36, Ñ2 3 V1 B D ins

1884* पौर्णमास्यां घनैर्मुक्तौ चन्द्रसूर्याविवोदितौ ।

37 Before 37, S (except M2 5) ins वैश° — a) M6 मातापि विविधं — b) B1 3 D2 विपर्ययमचिंत°, G3 °श तस्य चिं° — d) Some MSS भैक्ष्य°. Ś1 K D2 5 °ले च लघिते; Ñ1 °ले प्रगच्छ°; Ñ2 3 V1 Da Dn D1 4 °लेभिग°

38 a) G6 नून, M (except M5) वा स्यु° Ñ1 धार्तराष्ट्रा हि तान्हन्यु — b) Ñ1 °पुगवान्; B5 °पाडवा°, D5 °नंदना , G3, 4 °पुगवै — d) Ñ1 अघोरैर्, T2 G (except G1 6) असुरैर् K4 दृढवेगिभि , G3–4 दानवैरिह

39 a) K0 4 हृद (for मत) K1 तात, T2 G3 चापि (for जात) K2 वैपरीत्य तु सजात — d) Ñ1 2 V1 B D (except D2) °स्नेहावृता (Ñ1 °त्तत) T2 G (except G1 6) सुतसगान्विता (T2 G5 °तं) तथा — After 39, N T1 G1 6 (T1 G1 6 om the posterior half, see below) ins

1885* तत सुसजनप्राये दुर्दिने मेघसप्लुते ।

[K0 T1 G6 भुक्तजन° K2 Ñ1 D5 °सकुले, K8 °सयुते]

40 T1 G1 6 om 40^{a} — a) Ś1 महान्यथा°, K1 अधन्यथा°, N3 Da भवत्यथा° K0 2 T2 च (for तु) G2 महताथ वरारोहा — Da2 repeats 40^{ab} (v l प्राविशत्तत्र and आस्तपुर°) — c) G3 4 सहितस् (for प्राविशत्) G2 तूर्णं (for तत्र) Ś1 K D5 प्राविशत्तत्र बीभत्सु — d) Ś1 K D5 ब्रह्मवृद(Ś1 K1 °सिद्धि)पुर°, Ñ2 3 V1 B Da (erroneously) Dn D1 2 4 Ar1p जिष्णुर्भार्गववेश्म तत्; T2 G3–5 °ष्णुर्धर्मपु° — After 40, K3 ins

१८२

वैशंपायन उवाच।

गत्वा तु तां भार्गवकर्मशालां
पार्थौ पृथां प्राप्य महानुभावौ।
तां याज्ञसेनीं परमप्रतीतौ
भिक्षेत्यथावेदयतां नराग्र्यौ ॥ १

कुटीगता सा त्वनवेक्ष्य पुत्रा-
नुवाच भुङ्क्तेति समेत्य सर्वे।
पश्चात्तु कुन्ती प्रसमीक्ष्य कन्यां
कष्टं मया भाषितमित्युवाच ॥ २

साधर्मभीता हि विलज्जमाना
तां याज्ञसेनीं परमप्रतीताम्।
पाणौ गृहीत्वोपजगाम कुन्ती
युधिष्ठिरं वाक्यमुवाच चेदम् ॥ ३

इयं हि कन्या द्रुपदस्य राज्ञ-
स्तवानुजाभ्यां मयि संनिसृष्टा।
यथोचितं पुत्र मयापि चोक्तं
समेत्य भुङ्क्तेति नृप प्रमादात् ॥ ४

कथं मया नानृतमुक्तमद्य
भवेत्कुरूणामृषभ ब्रवीहि।
पाञ्चालराजस्य सुतामधर्मो
न चोपवर्तेत नभूतपूर्वः ॥ ५

मुहूर्तमात्रं त्वनुचिन्त्य राजा

1867* [illegible] ।
[illegible] गृहद्वारि [illegible] पृथा ।

Colophon. Major parvan T1 G M संभव° (for स्वयं°) — Sub-parvan Ś1 K Ñ3 B Da Dn D1-4 T2 G1 2 4 M1 द्रौपदीस्वयंवरः; T1 संभव — Adhy name D1 [illegible]; T2 G1 2 4 [illegible] — Adhy no (figures, words or both) Da1 T1 186, Dm 191, T2 G 140 (G1 2 142), M 141 — Śloka no Da1 44, Dn 46, M1 42 — Aggregate śloka no Da1 7101

182

☞ MS T1, which ends with adhy 181, is replaced by T3

1 Ś1 K (except K0) [illegible] om उवाच (G1 om the ref) — a) F3 तु तां; G1 तानौ Da1 भार्गवेदम°; G1 [illegible]; G1 °दर्शं° — b) T2 G1 प्रेक्ष्य (for प्राप्य) — c) Ś1 F2 4 तां (for तां) T2 G1 4 परिगृह्य [illegible] (for तास°) — After 1 T2 G1 4 ins

1867* [illegible]
[illegible]

2 a) [illegible] T G1-4 M (except M1) [illegible] (for [illegible]); G1 [illegible] Ñ V1 B D T2 G1 [illegible] — b) [illegible] D1 [illegible] D1 [illegible]; B (except [illegible]) [illegible] (cf 4d)

— c) Ś1 K2 Ñ1 2 V1 B3 D (except D1 2) T1 च (for तु) T1 सा तु (for कुन्ती) Ñ2 transp कुन्ती and कन्यां Ñ1 2 V1 B D कृष्णां (for कन्यां)

3 a) Ś1 K1 2 [illegible]; K0 3 4 D1 [illegible]; G1 M3 च (for हि) T G1-3 M1-3 °मानां (for °माना) Ñ1 2 V1 B Da Dn D1 2 °भीता परिचिन्तयन्ती (Da1 °ती); D1 धर्मोपनीतां परिचिन्तयन्ती; G1 °भीतामभिलज्जमानां; G2 अधर्मभीता च हि° — b) K (except K1) °प्रतीता

4 Before 4, Ś1 K0 2 T1 G कुन्ती; K3 पृथा उ°; Ñ V1 B3 Da Dn D1 4 5 पृथुवाच — a) Ñ V1 B Da Dn D1 4 तु; D1 5 च (for हि) — b) K3 Ñ V1 D1 [illegible]; T2 G1 4 °सृष्टा — c) G1 यथोचितं T2 G1 तथा (for मया) — d) G1 सर्वं तु (for समेत्य) T1 भुंक्तव्यम्; T2 G1-4 भुजीष्व[illegible]; G1 2 M भुक्तव्यम्; G2 [illegible] (for भुङ्क्ते) B om नृप

5 a) Ñ V1 B1 Da Dn D1 मया कथं (by transp), B1 2 4 Da D1 4 [illegible]; M1-3 कथं [illegible] Ś1 K D1 [illegible] (K1 [illegible]); B1 [illegible] — b) Ś1 K D1 ब्रवीहि (for ब्रवीहि) B Da D1 4 मया भवेद्धि [illegible] — c) Ñ V1 B (except B1) D (except D1) M1 4 पाञ्चाल° — d) Ñ1 G1 2 4 °भूतपूर्वं; Ñ1 2 4 V1 B D (except D1) [illegible] M1-3 (corrupt) न चोपवर्तेत°

6 Before 6, Ś1 K1-4 D1 5 (except M1 2) ins वैशं° F0 Ñ V1 B Da Dn D1 4 5 वैशं° उ° — a) Ñ V1 B D

युधिष्ठिरो मातरमुत्तमौजाः ।
कुन्तीं समाश्वास्य कुरुप्रवीरो
धनंजयं वाक्यमिदं बभाषे ॥ ६

त्वया जिता पाण्डव याज्ञसेनी
त्वया च तोषिष्यति राजपुत्री ।
प्रज्वाल्यतां हूयतां चापि वह्नि-
र्गृहाण पाणिं विधिवत्त्वमस्याः ॥ ७

अर्जुन उवाच ।

मा मां नरेन्द्र त्वमधर्मभाजं
कृथा न धर्मो ह्ययमीप्सितोऽन्यैः ।
भवान्निवेश्यः प्रथमं ततोऽयं
भीमो महाबाहुरचिन्त्यकर्मा ॥ ८

अहं ततो नकुलोऽनन्तरं मे
माद्रीसुतः सहदेवो जघन्यः ।
वृकोदरोऽहं च यमौ च राज-
न्नियं च कन्या भवतः स्म सर्वे ॥ ९

एवंगते यत्करणीयमत्र
धर्म्यं यशस्यं कुरु तत्प्रचिन्त्य ।
पाञ्चालराजस्य च यत्प्रियं स्या-
त्तद्ब्रूहि सर्वे स्म वशे स्थितास्ते ॥ १०

वैशंपायन उवाच ।

ते दृष्ट्वा तत्र तिष्ठन्तीं सर्वे कृष्णां यशस्विनीम् ।
संप्रेक्ष्यान्योन्यमासीना हृदयैस्तामधारयन् ॥ ११

तेषां हि द्रौपदीं दृष्ट्वा सर्वेषाममितौजसाम् ।
संप्रमथ्येन्द्रियग्रामं प्रादुरासीन्मनोभवः ॥ १२

C 1 7143
B 1 161 19
K 1 200 13

(except D5) स एवमुक्तो मतिमान्नृवीरो — [b]) S भ्रातरम् (for मात°) Ñ1 °रो धर्मभृतां वरिष्ठ ; Ñ2 3 V1 B D (except D5) मात्रा मुहूर्तं तु वि(Ñ2 V1 Dn1, n2 D1 2 °तं स्तव)चिन्त्य राजा — [c]) Ś1 यदु° (for कुरु°)

7 Before 7, S (except M3 5) ins युधिष्ठिर — [a]) Ñ V1 B D फाल्गुन (for पाण्डव) — [b]) Ś1 K1 त्वयापि; Ñ2 3 V1 B D त्वयैव N शोभिष्य° (D4 वा वत्स्य°), G2 तेनेष्य° — [c]) Ñ1 S एव (for अपि) Ś1 K1 4 चाद्धि Ñ2 3 V1 B D (except D5) °ल्यतामग्निर(Dn °म)मित्रसाह

8 Ś1 K1 S om उवाच — [a]) Ś1 Dn1 S (except G1 2 M3) मा (for मा) Ñ1 नृपधर्म°, T3 G4 °धर्मभाजन G1 2 माधर्मभाज न कृथा वरेण्य — [b]) G1 2 रमेत (for कृथा न) Ś1 K0 1 [ऽ]र्थैं , K2 4 न ; K3 [ऽ]द्य (for ऽन्यै) Ñ V1 B1, 3 D (except D4, 5) धर्मोयमशिष्टदृष्ट , T2 G3 4 °र्मो ह्यनभीप्सि°

9 [b]) Ñ2 3 V1 B D (except D5) पश्चादय सहदेव स्तरस्वी (B6 °वो जघन्य) Arjp सहदेवो जघन्य (as in text) — Da1 om 9[c]–10[b] — [d]) K4 Ñ1 D2 T1 G2 5, 6 च सर्वे; Ñ2 3 V1 B1, 3 5 Dn D1 4 5 नियोज्या ; B6 Da2 तु सर्वे

10 Da1 om 10[ab] (of v l 9) — [a]) Ñ1 °कृते (for °गते) K0 अस्ति, K3 Ñ1 B Da2 D1 2 4 M6–8 अद्य (for अत्र) — [b]) Some MSS धर्मं Ñ1 प्रसह्य; Ñ2 3 V1 B D (except D5, Da1 om) विचिन्त्य (for प्र°). — [c]) K0 Ñ V1 B D (except D1 2 4) पचाल° K3 तु; S हि (for च) Ñ2 3 V1 B D (except D5) हित च यत् (for च यत्प्रि°) — [d]) Ñ1 प्रब्रूहि, Ñ2 3 V1 B D (except D5) प्रशाधि T3 G (except G1) वय (for वशे)

11 K2 om. 11–15 Ś1 K1 3 4 D2 S om उवाच (T1 G1 M3 5 om the ref) — After वैश° उ°, N (except K2) ins

1888* जिष्णोर्वचनमाज्ञाय भक्तिस्नेहसमन्वितम् ।
दृष्टिं निवेशयामासु पाञ्चाल्या पाण्डुनन्दना° ।
[(L 1) Ś1 K1 °स्नेहसमुत्थिता]

— [a]) N3 V1 B1, 5 6 D (except D5) transp ते and दृष्ट्वा Ñ2 3 B5 Dn D1 4 पश्यन्तीं (for तिष्ठन्तीं) B2 दृष्ट्वा च सर्वे ते तत्र — [b]) B3 स्थिता (for सर्वे) — [c]) Ś1 K (K2 om) D5 °क्ष्यानन्यमनसो — [d]) T3 G4 हृदये Ñ1 G3 M तद् (for ताम्) V1 °यैस्तेविचारयन्

12 K2 om 12 (of v l 11) — [a]) Ñ3 3 B5 D (except D2 5) T1 G1 तु; G6 च (for हि)

13 K2 om 13 (of v l 11) — [a]) Ñ1 2 V1 Dn transp रूप and हि K0 काम्यरूप तु पांचा° — [b]) Ś1 T1 G1 6 M विधातृ — T1 (which om 13[cd]) ins. after 13[ab] G6, after 13

1889* ते मन्यमाना कौन्तेया सर्वभूतमनोहराम् ।
चक्रमु सत्त्वसंपन्ना विधात्रा च प्रचोदिता ।

— [c]) K4 S (T1 om) अन्येभ्य — [d]) K1 सर्वलोक°

14 K2 om 14 (of v l 11) — [a]) Ś1 °कारभाव त, Ñ3 Dn1 D1 °धर्मज्ञ°, T1 G6 °तत्त्वज्ञ° — [d]) Ñ1

कार्म्यं रूपं हि पाञ्चाल्या विधात्रा विहितं स्वयम् ।
बभूवाधिकमन्याभ्यः सर्वभूतमनोहरम् ॥ १३
तेषामाकारभावज्ञः कुन्तीपुत्रो युधिष्ठिरः ।
द्वैपायनवचः कृत्स्नं संसरन्वै नरर्षभ ॥ १४
अब्रवीत्स हि तान्भ्रातॄन्मिथोभेदभयान्नृपः ।
सर्वेषां द्रौपदी भार्या भविष्यति हि नः शुभा ॥ १५

इति श्रीमहाभारते आदिपर्वणि द्व्यशीत्यधिकशततमोऽध्यायः ॥ १८२ ॥

१८३

वैशंपायन उवाच ।
भ्रातुर्वचस्तत्प्रसमीक्ष्य सर्वे
ज्येष्ठस्य पाण्डोस्तनयास्तदानीम् ।
तमेवार्थं ध्यायमाना मनोभि-
रासांचक्रुरथ तत्रामितौजाः ॥ १
वृष्णिप्रवीरस्तु कुरुप्रवीरा-
नाशङ्कमानः सहरौहिणेयः ।
जगाम तां भार्गवकर्मशालां
यत्रासते ते पुरुषप्रवीराः ॥ २
तत्रोपविष्टं पृथुदीर्घबाहुं
ददर्श कृष्णः सहरौहिणेयः ।
अजातशत्रुं परिवार्य तांश्च

समन्ततः; Ś2 K1 V1 B D T G1-3 समस्तान् K0.4 वै नरर्षभ ; Ś1 V1 S भरतर्षभ (Ś1 V1 T1 G3 M2.3 °भ); K1.4 B D मनुजर्षभ (D5 पुरुषर्षभ)

15 K3 om 15 (cf v 1 11). — a) Ś1 K1 नृप; K0 D5 M3 (inf lin as in text) सदा — c) M1-3 कृष्णा (for भार्या) — d) S महिषी (G3 सा मान्ये) नो भविष्यति — After 15, T1 G3 ins

1850* मन्त्रगुह्यतमो पार्थो भ्रातुर्ज्येष्ठस्य पाण्डवाः ।
अन्योन्यमनुपश्यन्तो धर्मार्थं काममीप्सितम् ।

T1 G2.4 ins after 15 D5 (marg sec m.) T2 G1.3, after the colophon

1851* जनमेजय उवाच ।
1) कथमिति दर्पेण च केनापि
तत्र धनुष्मत्सु कृत्स्न विमर्दम् ।
दिष्ट च रूपं न च पक्ष हेतो
शापद्य तस्मै द्रुपदो यदि ॥
वैशंपायन ।
2) दर्पेण कृष्णेन च फाल्गुन
कारोति ज्ञातुकामेन पार्थान् ।
परिप्रमादेव बभूव लोके
जीवन्ति पार्था इति विस्मयोऽभ्य ॥
3) कथमानन्दपूर्वतामस्तदाश्रम
स्थपदं फाल्गुनेनोपयाम ।
यम स्तदा त्वन्नुमोक्षवीर
रूत्र कर्तोभिर्भिषीद्य कृष्ण ॥
4) इति स्वयं वासुदेवो निविश्य
पार्थांन्विविपिस्मन्निविधिर्वराधे ।
स तद्वनु सम्यमियेष कर्तुं
बभूवुरस्यैष्टतमा हि पार्थाः ॥
[D5 जनमे° उ°, and वैश° उ° — 2c) D5 समति (for च नृप) — 3c) T G2.4 निहतान् (for नृपतीन्) — T2 G1-3 om 4cd — 4c) T1 G3 कृष्णस्य वै प्राणसमो हि पार्थ]

Colophon om in Ś1 K Da2 Dn2 D1 — *Major parvan* T2 G M संभव° (for आदि°) — *Sub-parvan* Ś2 B Da D2.4.5 T2 G2.4 द्रौपदीस्वयंवर; T1 संभव — *Adhy name* T2 G2.4 पांडवकामप्रस्ताव — *Adhy no* (figures, words or both) Dn2 T1 199, D5 (marg) 193, D3 140, T2 G 141 (G1.3 143), M 142 — *Śloka no* Da1 M1 15, Dn2 16

183

☞ This adhy is (1 hapl) om in G2.

1 Ś1 K (except K0) S om उवाच — d) K0.1.4 °कुरथ तत्रामितौजाः ; K1 V1 B1 (m as in text) T1 G1.2.4 M2.3 तत्र (V1 T1 G1 M2.3 °कुरथ) तत्रामितौजाः ; Ś2 B1 D1 D2 सर्वे च ते तत्पुरुषीनसत्वाः ; Ś1 °कुरथ तत्र° ; T2 G3.4 °कुरथा (G4 °त्र) सात्रामितौजसः ; M1-3 °कुरथा तत्रामितौजाः (sic).

2 T1 G1.4 om 2-3 — a) T1 G3 °वीर कुरुपुंगवांस्तु — b) Ś1 K0-4 Ś2.3 V1 B D T2 G3 नाशङ्क°. B2 °रौहिणेय (cf v 1 3). — K1.4 (hapl) om 2c-3c.

उपोपविष्टाञ्ज्वलनप्रकाशान् ॥ ३
ततोऽब्रवीद्वासुदेवोऽभिगम्य
कुन्तीसुतं धर्मभृतां वरिष्ठम् ।
कृष्णोऽहमस्मीति निपीड्य पादौ
युधिष्ठिरस्याजमीढस्य राज्ञः ॥ ४
तथैव तस्याप्यनु रौहिणेय-
स्तौ चापि हृष्टाः कुरवोऽभ्यनन्दन् ।
पितृष्वसुश्चापि यदुप्रवीरा-
वगृह्णतां भारतमुख्य पादौ ॥ ५
अजातशत्रुश्च कुरुप्रवीरः
पप्रच्छ कृष्णं कुशलं निवेद्य ।
कथं वयं वासुदेव त्वयेह
गूढा वसन्तो विदिताः स्म सर्वे ॥ ६
तमब्रवीद्वासुदेवः प्रहस्य
गूढोऽप्यग्निर्ज्ञायत एव राजन् ।
तं विक्रमं पाण्डवेयानतीत्य
कोऽन्यः कर्ता विद्यते मानुषेषु ॥ ७
दिष्ट्या तस्मात्पावकात्संप्रमुक्ता
यूयं सर्वे पाण्डवाः शत्रुसाहाः ।
दिष्ट्या पापो धृतराष्ट्रस्य पुत्रः
सहामात्यो न सकामोऽभविष्यत् ॥ ८
भद्रं वोऽस्तु निहितं यद्गुहायां
विवर्धध्वं ज्वलन इवेध्यमानः ।
मा वो विद्युः पार्थिवाः केचनेह
यास्यावहे शिबिरायैव तावत् ।
सोऽनुज्ञातः पाण्डवेनाव्ययश्रीः
प्रायाच्छीघ्रं बलदेवेन सार्धम् ॥ ९

C. 1. 7155
B. 1. 191. 25
K. 1. 206. 29

इति श्रीमहाभारते आदिपर्वणि त्र्यशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥

---

3 K1.4 om 3[ab], Dn1 T3 G2.4 om 3 (cf v l 1, 2). — b) B3m °रौक्मि° (cf v l 2) — cd) After च, N (Dn1 om) ins अपि (to avoid the hiatus)

4 G2 om 4 (cf. v l 1) — a) K0 Dn1 तत्र; T1 त च; G6 तांश्च (for ततो) T3 G4 महान् (for ऽब्रवीत्). — b) B6 Da कुंतीपुत्र; G6 °सुतान् G6 वरिष्ठान् — d) G3.4 °स्याजि°. T1 G6 तस्थौ (for राज्ञ)

5 G2 om 5 (cf v l. 1) — a) Ś1 अपि (for एव) — b) Ñ1 V1 B6 Da Dn3 D1.2 S ते (for तौ) B3 कृष्णौ; D1 कृष्ण (for हृष्टा) — c) Ñ1 T3 G1.3-5 M6-8 °स्वसायाश्च V1 B1.3 चैव (for चापि) K0.3 Ñ1 D5 T3 G1.3-5 M6-8 मधु°; G6 नर°; M3 inf lin कुरु° (as in text) — d) Da D2.4 प्रागृ°.

6 G2 om 6 (cf. v l 1) — a) T1 G6 तु (for च) — b) K1 प्रवेश्य; Ñ2.3 B1 D (except D5) विलोक्य (for निवेद्य) — c) K4 एव (for इह). — d) Ś1 K B3 M3 गूढ Ñ2.3 Dn च (for स्म)

7 G2 om 7 (of v l 1) — c) Ś1 K1 पाण्डवी°

8 G2 om 8 (cf. v l 1) — a) N2.3 B (except B6) Dn D1.4 सर्वे (for तस्मात्) Ñ1 M6-8 चास्य मुक्ता; Ñ2.3 V1 B D (except D5) विप्रमुक्ता; T G (G2 om) चापि मु°; M3.5 च स्य मु° — b) Ñ2.3 B D (except D5) घोरात् (for सर्वे) Ñ1 शत्रुसंघा ; V1 मित्रसाहाः; T1 शत्रुसिंहा· D2 पांडुपुत्रा सहाया — c) K0.3.4 Ñ1 B6 T G4.5 M °ष्ट्र सपुत्र — d) S (G2 om.) सामात्यो वै (for सहामात्यो) V1 भविष्यति, G6 भवेयु· — After 8, T G1.3.4 ins

1892* दिष्टया कृष्णा वीर्यमाश्रित्य लब्धा
दिष्टया भूय शश्वदेव कृतार्था· ।

9 G2 om 9 (of v. l 1) — a) Ñ1 परमं (for निहितं) K1 वै (for यद्) — b) K0 व्यवर्धध्वं; T1 G3 विवृद्धध्वं; G6 विवृद्ध वै Ñ V1 B D ज्वलना (D1 °नाद्); G6 °नम् K0.3 B1.3.6 Da D2.3 T1 °माना, K1 इवैध°; Ñ V1 B3 Dn D4 इवैधमाना ; D1 अवध्यमाना ; G1 M6-8 इवेध्यमान (G1 °ना); G6 °मान — c) Ñ2 V1 B1.3 Dn T3 G3-6 M3.6-8 विदु , D1.4 विद्म K0 B Da D2.4.5 के(B3m किं)चिदेव; Ñ2.3 V1 Dn D1 केचिदेव — d) Ś1 K Ñ1 D5 गच्छावहे; B3 यास्यामहे; S (G2 om) यास्यावो वां — f) D5 ययौ (for प्रायाद्) Ś1 साकं (for सार्धम्) — After 9, D4 (marg sec m) T G (except G2) ins.

1893* तत्रैवासन्पाण्डवाश्चाजघन्या
मात्रा सार्धं कृष्णया चापि वीरा ।

Colophon om in G2 — *Major parvan* T3 G1.3-5 M संभव° (for आदि°) — *Sub-parvan* Ś1 K Ñ2 B Da Dn1.n2 D1.2.4 T3 G4 द्रौपदीस्वयंवर; G3 M3 स्वयंवर;

१८४

वैशंपायन उवाच ।

धृष्टद्युम्नस्तु पाञ्चाल्यः पृष्ठतः कुरुनन्दनौ ।
अन्वगच्छत्तदा यान्तौ भार्गवस्य निवेशनम् ॥ १

सोऽज्ञायमानः पुरुषानवधाय समन्ततः ।
स्वयमारान्निविष्टोऽभूद्भार्गवस्य निवेशने ॥ २

सायेऽथ भीमस्तु रिपुप्रमाथी
जिष्णुर्यमौ चापि महानुभावौ ।
भैक्षं चरित्वा तु युधिष्ठिराय
निवेदयांचक्रुरदीनसत्त्वाः ॥ ३

ततस्तु कुन्ती द्रुपदात्मजां ता-
मुवाच काले वचनं वदान्या ।
अतोऽग्रमादाय कुरुष्व भद्रे
बलिं च विप्राय च देहि भिक्षाम् ॥ ४

ये चान्नमिच्छन्ति ददस्व तेभ्यः
परिश्रिता ये परितो मनुष्याः ।
ततश्च शेषं प्रविभज्य शीघ्र-
मर्धं चतुर्णां मम चात्मनश्च ॥ ५

अर्धं च भीमाय ददाहि भद्रे
य एष मत्तर्षभतुल्यरूपः ।
श्यामो युवा संहननोपपन्न
एषो हि वीरो बहुभुक्सदैव ॥ ६

सा हृष्टरूपैव तु राजपुत्री
तस्या वचः साध्वविशङ्कमाना ।
यथावदुक्तं प्रचकार साध्वी

T1 [illegible] — *Adhy. name.* D1 पांचाल्यप्रति [illegible] [illegible]; T1 वासुदेव[illegible], T2 G1.4 वासुदेव, G2 [illegible] — *Adhy. no.* (figures, words or both) [illegible] T1 190, D4m 191, D1 141, T2 G1-3 142, G2.4 144, M 143 — *Śl. no.* Dn 23 (Dn 9), M1 10 — [illegible] Dn 7127.

184

1 [illegible]) [illegible] D1 S om. उवाच (G1 om. the ref.). — [illegible]) K (except K4) च (for तु) T2 G2.4 पांचाल [illegible] — [illegible]) B1 यान्तौ, G1 पुत्रौ (for यान्तौ) — [illegible]) Ś1 [illegible] Da D1 [illegible]

2 [illegible]) V1 पुरुषं [illegible] — [illegible]) V1 [illegible]; D1.4 G1-3 M [illegible]; T2 G1 [illegible]; G2 [illegible] — [illegible]) Ś1 [illegible] V1 B D [illegible] (for निविष्टो) [illegible] [illegible] — [illegible]) S (except G1 M1) [illegible] — After 2, T G (except G1) [illegible]

[illegible]
[illegible]

3 [illegible]) Ś1 ([illegible]) K4 [illegible] V1 B D T2 G1 M1-3 [illegible] [illegible] G1.4 [illegible] K4 D1 F [illegible] — [illegible]) [illegible] M-2 [illegible] Ś1 F Ñ1 Da D1 [illegible] — K (except K1) [illegible] — [illegible]) Ś1 F1 [illegible] D1 M1 [illegible]

4 [illegible]) Ś1 Da1 पद्मान्य; K1 (corrupt) पद्भ्यां; K4 [illegible] D1 [illegible] — Before 4[illegible], M2-3 ins. युता — [illegible]) K3 [illegible]; Ñ2.3 V1 B D (except D1) [illegible]; T1 G1 ततो Ñ1 V1 T1 G2.4 M [illegible] — [illegible]) G1 भद्राय (for विप्राय) G2 भद्रे (for भिक्षाम्)

5 [illegible]) Ś1 प्रदान; K1 प्रदात (for ये चान्न) Ñ1 G2.4 (before corr.) [illegible] हि; T1 G1 हि देहि; G1 M [illegible] (for ददस्व) — [illegible]) Ś1 K Ñ1 प्रतिश्रिता V1 [illegible] — [illegible]) Ś1 K (except K4) D1 T1 G1.4 तु (for च) Ś1 transp. [illegible] and [illegible] — [illegible]) K (except K1) Ñ V1 B D (except D1) G1 M चतुर्णां

6 [illegible]) Ñ V1 B D (except Da D1) तु (for च) Ś1 K D1 [illegible]; Ñ V1 B Da Dn D1.4 T1 G1.4 च देहि — [illegible]) Ś1 [illegible] (by transp.), Ñ V1 B D M [illegible]; T G [illegible] — [illegible]) Ñ1.3 V1 B D (except D1) G1 [illegible] (for [illegible]) — [illegible]) Ś1 K1 [illegible] (for हि) M1 [illegible] च

7 [illegible]) M1 [illegible] (for सा) Ñ V1 B D (except D1) T1 G1.4 [illegible] S हि (T1 G1 च) (for तु) — [illegible]) K4 [illegible]; Ñ1 Da D1 [illegible] — [illegible]) T1 G1 [illegible] — [illegible]) Ś1 K [illegible]; Ś1 V1 [illegible]; Ñ1.3 [illegible] Da D1 [illegible]; D4 [illegible]; G (except G1.4) [illegible].

8 [illegible]) K4 Ñ V1 Dn [illegible] — [illegible]) Only Ś1 as in

ते चापि सर्वेऽभ्यवजह्रुरन्नम् ॥ ७

कुशैस्तु भूमौ शयनं चकार
माद्रीसुतः सहदेवस्तरस्वी ।
यथात्मीयान्यजिनानि सर्वे
संस्तीर्य वीराः सुषुपुर्धरण्याम् ॥ ८

अगस्त्यशास्तामभितो दिशं तु
शिरांसि तेषां कुरुसत्तमानाम् ।
कुन्ती पुरस्तात्तु बभूव तेषां
कृष्णा तिरश्चैव बभूव पत्तः ॥ ९

अशेत भूमौ सह पाण्डुपुत्रैः
पादोपधानेव कृता कुशेषु ।
न तत्र दुःखं च बभूव तस्या
न चावमेने कुरुपुंगवांस्तान् ॥ १०

ते तत्र शूराः कथयांबभूवुः
कथा विचित्राः पृतनाधिकाराः ।
अस्त्राणि दिव्यानि रथांश्च नागा-
न्खड्गान्गदाश्चापि परश्वधांश्च ॥ ११

तेषां कथास्ताः परिकीर्त्यमानाः
पाञ्चालराजस्य सुतस्तदानीम् ।
शुश्राव कृष्णां च तथा निषण्णां
ते चापि सर्वे ददृशुर्मनुष्याः ॥ १२

धृष्टद्युम्नो राजपुत्रस्तु सर्वं
वृत्तं तेषां कथितं चैव रात्रौ ।
सर्वं राज्ञे द्रुपदायाखिलेन
निवेदयिष्यंस्त्वरितो जगाम ॥ १३

पाञ्चालराजस्तु विषण्णरूप-
स्तान्पाण्डवानप्रतिविन्दमानः ।
धृष्टद्युम्नं पर्यपृच्छन्महात्मा
क्व सा गता केन नीता च कृष्णा ॥ १४

कच्चिन्न शूद्रेण न हीनजेन
वैश्येन वा करदेनोपपन्ना ।
कच्चित्पदं मूर्ध्नि न मे निदिग्धं

C. 1 7170
B. 1 192 15
K. 1. 207 15

---

text (catalectic)! Ko 3 यथात्मदीयान्य°, K1 °त्मी-यान्यप्यजि°; K2 Ñ2 3 V1 B D यथा स्वकीयान्य°, K4 °थास्मदीयान्य°; Ñ1 °थात्मनीयान्य°; T G अथात्मनीना(G1 तथात्मदीया)न्य°; M अथात्मकी(M6-8 °नी)यान्य°. — d) K3 4 धीरा. Ko धरिण्या

9 a) Ś1 K3 Cd °स्त्यशांता°, Ko 2 B6 D5 अगस्तिशा°; K3 sup lin °स्त्याशांता°; K4 D1 °स्त्याशा°; D4m S °स्त्यकांता° Ñ1 °स्त्यगुप्ताभिमतां दिशां तु — b) G1 अभूवन् (for तेषां) D2 पुरुषोत्तमानां (for कुरु°) — d) S (except T1 G1.6) कृष्णापि तत्रैव Ś1 K1 T2 G2-5 M सा तु; K4 Ñ1 पादे; V1 चासे; T1 G6 पत्नी; G1 सांते (for पत्त). Ñ2 3 B D पादांतरे चाथ (B6 Da D2 4.5 °रेणाथ) बभूव कृष्णा Cd cites तिर° and प(or पा)त्त.

10 b) Ś1 °पदानेव; K1 3 G2 °पधानेव; Ñ2 3 V1 B (except B6) D (except D5) °पधानीव ❀Dev पादा° उपधानं शिर स्थानं यस्या ।❀ — c) Ñ1 मन आस; Ñ2 3 V1 B D (except D5) मनसापि (for च बभूव) T1 G6 न तत्र तस्या मनसश्च (G6 मन आप) दुःख; T2 G1-5 M न तत्र दुःखं च समाससाद — d) D2 चात्र मेने; T2 G4 चापि मेने

11 b) Ñ1 कथां °श्रां °कारा — c) T2 G3-5 रथाश्वनागान् — d) Some MSS परस्व°

12 b) Ko Ñ V1 B Dn D1, 2 5 पचाल° Ś1 G2 M6-8 सुता (for सुत°) — c) S (except T1 G6 M8) श्रुत्वा च (for शुश्राव) Ñ2 3 V1 B D तदा (for तथा). Ś1 K V1 T1 G6 अभिपन्नां (Ś1 °न्ना) (for निषण्णां)

13 a) Ko 3 च, T2 G (except G1) स (for तु) K4 वृत्त (for सर्वं) — b) K4 transp वृत्तं and तेषां D1 सर्वं, T2 G (except G1) चैषां (for तेषां) — d) Dn T G (except G1) त्वरित

14 Before 14, M6-8 ins वैशं° — a) Some MSS पंचाल° G4 °ण्णचेत° — b) K4 °ण्डवाश्चाप्रति°. — d) T1 G1 हृता (for गता) T1 G3 5 6 M हृता; G1 गता (for नीता)

15 K2 om 15 — b) T1 G2 वा कारणेनोप°. G1 वा मम सुता चापनीता — c) Ś1 (orig) मे न दिग्धं, Ś1m K4 Ñ3 V1 B1 3 6 Da D1 2 मे निविष्ट; K1 मेनुदिग्धं; Ñ2 Dn D4 5 पंकदिग्ध, T G1 2 5 6 M मे विपक्तं Cd cites निदिग्धं (= विनिहित) as in text T2 G3 4 कच्चिन्न पांसौ हविराहुतं तत् — d) K4 Ñ V1 B D G1 कच्चिन्न माला पतिता (K4 ins here वै, D5 -भूत्) श्मशाने

16 a) B5 T1 G3 4 5 6 °प्रतिमो; T2 G4 °प्रथमो; Cd

कच्चिन्माला पतिता न श्मशाने ॥ १५
कच्चिन्नवर्णप्रवरे मनुष्य
उद्रिक्तवर्णोऽप्युत वेह कच्चित् ।
कच्चिन्न वामो मम मूर्ध्नि पादः
कृष्णाभिमर्शेन कृतोऽद्य पुत्र ॥ १६
कच्चिच्च यत्ते परमप्रतीतः
संयुज्य पार्थेन नरर्षभेण ।
ब्रवीहि तत्त्वेन महानुभावः
कोऽसौ विजेता दुहितुर्ममाद्य ॥ १७
विचित्रवीर्यस्य तु कच्चिदद्य
कुरुप्रवीरस्य धरन्ति पुत्राः ।
कच्चित्तु पार्थेन यवीयसाद्य
धनुर्गृहीतं निहतं च लक्ष्यम् ॥ १८

इति श्रीमहाभारते आदिपर्वणि चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥

१८५

वैशंपायन उवाच ।
ततस्तथोक्तः परिहृष्टरूपः
पित्रे शशंसाथ स राजपुत्रः ।
धृष्टद्युम्नः सोमकानां प्रबर्हो
वृत्तं यथा येन हृता च कृष्णा ॥ १
योऽसौ युवा स्वायतलोहिताक्षः
कृष्णाजिनी देवसमानरूपः ।
यः कार्मुकाग्र्यं कृतवानधिज्यं
लक्ष्यं च तत्पातितवान्पृथिव्याम् ॥ २
असज्जमानश्च गतस्तरस्वी

वृतो द्विजाग्र्यैरभिपूज्यमानः ।
चक्राम वज्रीव दितेः सुतेषु
सर्वैश्च देवैर्ऋषिभिश्च जुष्टः ॥ ३
कृष्णा च गृह्याजिनमन्वयात्तं
नागं यथा नागवधूः प्रहृष्टा ।
अमृष्यमाणेषु नराधिपेषु
क्रुद्धेषु तं तत्र समापतत्सु ॥ ४
ततोऽपरः पार्थिवराजमध्ये
प्रवृद्धमारुज्य महीप्ररोहम् ।
प्रकालयन्नेव स पार्थिवौघा-
न्क्रुद्धोऽन्तकः प्राणभृतो यथैव ॥ ५
तौ पार्थिवानां मिषतां नरेन्द्र
कृष्णामुपादाय गतौ नराग्र्यौ ।
विभ्राजमानाविव चन्द्रसूर्यौ
बाह्यां पुराद्भार्गवकर्मशालाम् ॥ ६
तत्रोपविष्टार्चिरिवानलस्य
तेषां जनित्रीति मम प्रतर्कः ।
तथाविधैरेव नरप्रवीरै-
रुपोपविष्टैस्त्रिभिरग्निकल्पैः ॥ ७
तस्यास्ततस्ताविभिवाद्य पादा-
वुक्त्वा च कृष्णामभिवादयेति ।
स्थितौ च तत्रैव निवेद्य कृष्णां
भैक्षप्रचाराय गता नराग्र्याः ॥ ८
तेषां तु भैक्षं प्रतिगृह्य कृष्णा
कृत्वा बलिं ब्राह्मणसाच्च कृत्वा ।
तां चैव वृद्धां परिविष्य तांश्च
नरप्रवीरान्स्वयमप्यभुङ्क्त ॥ ९
सुप्तास्तु ते पार्थिव सर्व एव

C. 1 7183
B. 1 193 10
K 1 208. 11

य. (for तत्)

3 ^{a}) Ñ1 B6 स सज्ज°; V1 स भ्राज°; B8m D2.4 स भाज्य°, Da D1.5 असह्य°, G2 अतर्क्य°; Cd as in text Ñ2.3 B D (except D5) G2.5 तत (for गत) T1 G1 असशय राजपुत्रस्त°. — ^{b}) V1 S द्विजातिभिस्तैर् — ^{c}) Ñ1 व्युत्काम, S विक्रम्य — ^{d}) T3 G4 स (for च) K1 तुष्ट, S दृष्ट; Cd as in text — After 3, D4 (marg *sec m*) T G (except G2) ins

1896* श्यामो युवा वारणमत्तगामी
कृत्वा महत्कर्म सुदुष्कर तत् ।

G1 cont T G3.4 ins after 6^{ab}

1897* विक्षोभ्य विद्राव्य च पार्थिवास्तान्
स्वतेजसा दुष्प्रतिवीक्ष्यरूपौ ।

4 ^{a}) K4 Ñ2.3 B5.6 D (except D4) G1 प्रगृह्य; B1.3 गृहीत्वा (for च गृह्य) K0.3.4 अन्वगात् T G2-6 M कृष्णापि कृष्णाजिनिन जगाम — After 4^{ab}, T G M3.5 ins

1898* य सूतपुत्रेण चकार युद्ध
शक्रेऽर्जुन त त्रिदशेशवीर्यम् ।

— ^{d}) K0.3.4 Ñ3.3 B Dn D1.5 G2 वै (for त) T1 युद्धाय सर्वेषु समा°

5 ^{a}) G2.3.4 (before corr) 5 हि य (for ऽपर) K1 °राजमान्ये; Ñ2.3 V1 B D T1 °सघ (D2 °सिंह) मध्ये — ^{b}) Ś1 K1 °माभज्य, K2-4 Ñ1 V1 Da °मारुह्य G2 मही प्रचक्ष — ^{c}) K0.3 S प्रा (or प्र)कालयत्, K1 प्राका° K0.3 M तेन, Da इति, T G तत्र (for एव) T1 G6 पार्थिवाग्रणे, T3 G1-5 °वौघ; M °चेन — ^{d}) T3 G2.6 भीमः (for क्रुद्ध) — After 5, M3.5 ins

1899* तं भीमसेनं परितर्कयामि
य पातयामास रणे तु शल्यम् ।

6 ^{a}) T3 G3.4 ता (for तौ) V1 प्रवरौ, G1 अधिपौ, G3 अमिता (for मिषता) V1 नृवीरौ (for नरेन्द्र) — ^{b}) M5 नरेंद्रौ (for नराग्र्यौ) — After 6^{ab}, T G3.4 ins 1897* (of v l 3) — ^{d}) Ś1 K1 G1.5 M6-8 याह्यात्, K4 Da T3 G4 बाह्य Ś1 K1 D5 पुरा, Ñ1 इमां

7 ^{a}) T1 M6-8 ततोप° — ^{b}) D5 एष; T3 G3.4 आस (for प्र) K4 °त्री मम तत्र तर्क° — ^{c}) M6-8 °धैर्न-रवीरैरुपेतैर् — ^{d}) T1 G1.6 M3.5 °ष्टा त्रिभि°

8 ^{a}) K4 तस्याग्रतस् K0.1.3 D5 अभिवद्य — ^{b}) Da D2.4 तु (for च) Ñ2.3 B D °ष्णा त्वभि° S (except T1 M5) उपोपविष्टौ नरलोकवीरौ — ^{c}) Ñ V1 Dn D1 स्थिता, B Da D2.4.5 भिक्षा; M3.5 स्थिताश्च् K2 T1 G1 M5 निवेश्य — K1 (hapl) om 8^{d}-9^{a} — ^{d}) Ś1 K (K1 om) Ñ1 V1 G1 भैक्ष्य°, Ñ2.3 B D भिक्षा°.

9 K1 om 9^{a} (of v l 8) — ^{a}) Some MSS भैक्ष्यं K2 परिगृह्य, V1 प्रतिहृत्य — ^{b}) K3 Ñ2.3 B D T1 दत्त्वा (for कृत्वा) S ब्राह्मणानर्चयित्वा Cd cites ब्राह्मणसात् — ^{c}) Ñ1 दत्त्वा (for वृद्धा) Ñ V1 B7.8 Dn D4.5 °वेष्य; B6 °वेश्य, D2 G6 °वेक्ष्य; G5 °भोज्य; a few MSS (incl.

कृष्णा तु तेषां चरणोपधानम् ।
आसीत्पृथिव्यां शयनं च तेषां
दर्भाजिनाग्र्यास्तरणोपपन्नम् ॥ १०
ते नर्दमाना इव कालमेघाः
कथा विचित्राः कथयांबभूवुः ।
न वैश्यशूद्रौपयिकीः कथास्ता
न च द्विजातेः कथयन्ति वीराः ॥ ११
निःसंशयं क्षत्रियपुंगवास्ते
यथा हि युद्धं कथयन्ति राजन् ।
आशा हि नो व्यक्तमियं समृद्धा
मुक्तान्हि पार्थाञ्शृणुमोऽग्निदाहात् ॥ १२
यथा हि लक्ष्यं निहतं धनुश्च
सज्यं कृतं तेन तथा प्रसह्य ।
यथा च भाषन्ति परस्परं ते
छन्ना ध्रुवं ते प्रचरन्ति पार्थाः ॥ १३
ततः स राजा द्रुपदः प्रहृष्टः
पुरोहितं प्रेषयां तत्र चक्रे ।
विद्याम युष्मानिति भाषमाणो
महात्मनः पाण्डुसुताः स्थ कच्चित् ॥ १४
गृहीतवाक्यो नृपतेः पुरोधा
गत्वा प्रशंसामभिधाय तेषाम् ।
वाक्यं यथावन्नृपतेः समग्र-
मुवाच तान्स क्रमवित्क्रमेण ॥ १५
विज्ञातुमिच्छत्यवनीश्वरो वः
पाञ्चालराजो द्रुपदो वरार्हाः ।
लक्ष्यस्य वेद्धारमिमं हि दृष्ट्वा
हर्षस्य नान्तं परिपश्यते सः ॥ १६
तदाचड्ढ्वं ज्ञातिकुलानुपूर्वीं

पदं शिरःसु द्विषतां कुरुध्वम् ।
प्रह्लादयध्वं हृदयं ममेदं
पाञ्चालराजस्य सहानुगस्य ॥ १७
पाण्डुर्हि राजा द्रुपदस्य राज्ञः
प्रियः सखा चात्मसमो बभूव ।
तस्यैष कामो दुहिता ममेयं
स्नुषा यदि स्यादिति कौरवस्य ॥ १८
अयं च कामो द्रुपदस्य राज्ञो
हृदि स्थितो नित्यमनिन्दिताङ्गाः ।
यदर्जुनो वै पृथुदीर्घबाहु-
र्धर्मेण विन्देत सुतां ममेति ॥ १९
तथोक्तवाक्यं तु पुरोहितं तं
स्थितं विनीतं समुदीक्ष्य राजा ।
समीपस्थं भीममिदं शशास
प्रदीयतां पाद्यमर्घ्यं तथास्मै ॥ २०
मान्यः पुरोधा द्रुपदस्य राज्ञ-
स्तस्मै प्रयोज्याभ्यधिकैव पूजा ।
भीमस्तथा तत्कृतवान्नरेन्द्र
तां चैव पूजां प्रतिसंगृहीत्वा ॥ २१
सुखोपविष्टं तु पुरोहितं तं
युधिष्ठिरो ब्राह्मणमित्युवाच ।
पाञ्चालराजेन सुता निसृष्टा
स्वधर्मदृष्टेन यथानुकामम् ॥ २२
प्रदिष्टशुल्का द्रुपदेन राज्ञा
सानेन वीरेण तथानुवृत्ता ।
न तत्र वर्णेषु कृता विवक्षा

C 1 7197
B 1 193 24
K 1 208 25

जातीं च कुला° — ᵇ) S (except T3) शिर सु पाद द्वि° — ᵈ) K0 2 Ñ V1 B D (except D1) पञ्चा° Ś1 K B6 Dn D1 5 च सानुग(K2 3 °ज)स्य, T1 सहात्मजस्य; T3 G M (except M3) सहानुजस्य

18 ᵈ) B1 3 इह; M6-8 यदि (for इति) Ñ2.3 B6 Da1 Dn D1 4 स्नुषां प्रदास्यामि हि कौरवाय

19 ᵃ) Ñ1 स; Ñ3 3 V1 B D (except D5) हि (for च) — ᵇ) B1 5 °ताङ्गीं, B3 G2 °ताग — ᶜ) S1 K0 1 3 यदि, K3.4 अपि (for यद्) K2 4 असौ, Ñ1 S मे (G2 अय) (for वै) — ᵈ) K4 Ñ2 3 B D ममैतां, V1 समेता, S (except G2 6) इहेति — After 19, T1 ins

1900* तद्दै श्रुत्वा पाण्डवाः सर्व एव
राज्ञा यदुक्त द्रुपदेन वाक्यम् ।
कुन्त्या सार्धं मानया चापि चक्रु
पुरोहित ते पुरुषप्रवीरा ।,

while N ins

1901* कृत हि तस्यास्सुकृत ममेद
यशश्च पुण्य च हित तदेतत् ।
[(L 1) Ś1 K ममेद]

20 Before 20, T1 ins युधिष्ठिर° — ᵃ) Ñ B D अथो° (Da यथो°) K4 Ñ V1 B1 6 D (except D1 2) हि (for तु) K2 Ñ V1 B1 Dn2 D1 2 °हित स्थित B3 °क्य नृपते पुरोहित; T1 द्विजस्य वाक्य तु निशम्य त च — G1 (hapl) om 20ᵇ-22ᵃ — ᵇ) K3 तथा, Ñ V1 B Da1 Dn D1 ततो (for स्थित) T3 G (G2 om) M6-8 विधिज्ञ (for विनीत) D2 विनीतवाक्य; T1 पुरोहित वै (for स्थितं वि°) V1 M3 5 प्रसमीक्ष्य — K0 (? hapl) om 20ᶜ-21ᵇ — ᶜ) K4 पार्श्वे स्थित, Ñ V1 B D (except D5) समीपतो (Ñ1 B3 °गं) K4 T3 G3 4 भीमसेन (for भीममिद)

21 G2 om. 21, K0 om 21ᵃᵇ (of v 1 20) — ᵇ) Ñ1 तस्मात् (for तस्मै) D2 प्रयुज्या, D4 प्रदेया. T3 G3 4 ins हि after प्रयोज्या Ñ2 3 B1 3 6 D T1 हि, B5 T3 G (G2 om) M च (for एव) — ᶜ) K1 Ñ V1 B D (except D5) ततस् (for तथा) T G1 3 4 6 M3 तां, G6 M6-8 त (for तत्) — ᵈ) T1 स (for ता) K1 एव, S (except T1, G2 om) चापि (for चैव) Ś1 K1 प्रगृहीत-वान्स, K2 अपि सप्रगृह्य, K3 प्रतिसनिगृह्य, K4 Ñ1 V1 B1 3 G5 6 M6-8 प्रतिसगृह्याण, Ñ2 3 B5 6 D (except D5) प्रतिगृह्य हर्षात्, T G1 3 4 M3 प्रतिगृह्य तत्र; M3 (inf lin) 5 प्रतिजग्राह चैव (for प्रतिसगृहीत्वा as in K0 D5)

22 G2 om 22ᵃ (of v 1 20) — ᵃ) Ñ2 3 B1 3 Dn D1 5 °हित तदा — ᶜ) K3 Ñ V1 B1 3 5 D2 5 पञ्चाल°. K1 B3.6 Da Dn3 D2 4 5 विसृष्टा — ᵈ) G1 °मनिष्टेन K3 यथानु°; Ñ2 3 V1 B D (except D5) यथा (B Da2 D4 पथा) न कामात्, T1 G6 यथानिकाम, T3 G1-5 M य(G1.5 M3 5 प)थाद्य काम

23 ᵃ) Ś1 K1 प्रतिष्ठितो यो द्रुपदेन शुल्कः — ᵇ) Ś1 K1 सोनेन, K2 Ñ2 3 D (except D1 2 4) S सा तेन Ś1 K1 यथानुवृत्त, K0 °वृत्त; T G M3 5 तथा गृहीता

C. 1. 7209
B. 1. 194. 7
K. 1. 209. 10

धनूंषि चाग्र्याणि शराश्च मुख्याः
शक्त्यृष्टयः काञ्चनभूषिताश्च ॥ ७
प्रासा भुशुण्ड्यश्च परश्वधाश्च
सांग्रामिकं चैव तथैव सर्वम् ।
शय्यासनान्युत्तमसंस्कृतानि
तथैव चासन्विविधानि तत्र ॥ ८
कुन्ती तु कृष्णां परिगृह्य साध्वी-
मन्तःपुरं द्रुपदस्याविवेश ।
स्त्रियश्च तां कौरवराजपत्नीं
प्रत्यर्चयांचक्रुरदीनसत्त्वाः ॥ ९
तान्सिंहविक्रान्तगतीनवेक्ष्य
महर्षभाक्षानजिनोत्तरीयान् ।
गूढोत्तरांसान्भुजगेन्द्रभोग-
प्रलम्बबाहून्पुरुषप्रवीरान् ॥ १०
राजा च राज्ञः सचिवाश्च सर्वे
पुत्राश्च राज्ञः सुहृदस्तथैव ।
प्रेष्याश्च सर्वे निखिलेन राज-
न्हर्षं समापेतुरतीव तत्र ॥ ११
ते तत्र वीराः परमासनेषु
सपादपीठेष्वविशङ्कमानाः ।
यथानुपूर्व्या विविशुर्नराग्र्या-
स्तदा महार्हेषु न विस्मयन्तः ॥ १२
उच्चावचं पार्थिवभोजनीयं
पात्रीषु जाम्बूनदराजतीषु ।
दासाश्च दास्यश्च सुमृष्टवेषाः
भोजापकाश्चाप्युपजह्रुरन्नम् ॥ १३

Ñ1.2 V1 Dn D1 S सर्वाणि कृत्स्नानि; B5 कृत्स्नानि सर्वाणि Ś1 D1 G2 अखिलानि Ś1 K D4 चैव (for तत्र) — c) K1 Ñ3 V1 B1 Dn D1 T2 G3-5 M8 अपि (for च) Ñ1 यानि, Ñ2.3 V1 B D (except D5) तत्र (for तानि)

7 a) K (except K1) रथाश्च व(K2 च)र्माणि; Ñ Dn D1 वर्माणि चर्माणि, V1 गदाश्च चर्माणि, B Da D2.4.5 चर्माणि वर्माणि, S अस्त्राणि (T1 धनूंषि) शस्त्राणि — b) B5 Da D4 शस्त्रा, G3 खड्ग (for खड्गा) T2 G2-4 महत्यो B5 Da S अथ (for अश्व) D2 T2 G (except G1.6) रथान् Ñ3 B D3 D4 विचित्रा°; D2 G (except G1.6) च चित्रान् — c) D1 om. 7c S (except T1) चोग्राणि K3.4 T2 G2.4.5 शरांश्च मुख्यान् Ñ2 V1 Dn चित्रा (for मुख्या°) — d) Ñ2 Dn °भूषणाश्च

8 a) K2 T2 G2.4-6 प्रासान् K0.2.3 मुसंढ्यश्च, K1 मुसुंढ्य°; K4 मूशंढ्य°, B1.3.6 मुपुढ्य°, D1.5 मुशढ्य°; T1 मुसुंढ्य°, T2 G4 मुसुण्डी°, G1 मुसढ्य°, G2 मुसुढी; G3 मुसुंढ्य°; G5 M5 मुसट्य°; G6 मुसंढ्य°, M7.8-8 मुसढ्य° K0.2.4 Da D1.2 परश्वधा°, D3 G1 °श्वधा°, T1 तथा शतघ्न्य; T2 G2.4.6 परश्वधा°, G3.5 °श्वधा° — b) Ś1 K4 D1 G6 सग्रामिकं; Ñ1 S सांग्रामिकं(Ñ1 T1 G1 M8.8-8 °का)श्चैव Ñ1 V1 D1 तथेह, T G2-6 तथापि (for तथैव) S चान्ये (T2 G2-6 °न्यान्) (for सर्वम्) — c) Ñ1 Dn °वस्तुवति, D4 °सत्कृतानि (for °संस्कृतानि) — d) T2 G (except G1) राजन् (for चासन्) Ś1 K1.2.4 D5 तथैव चापानि (D5 वासांसि) महांति तत्र; Ñ2.3 Da Dn D1.2.4 तथैव वासो विविधं च तत्र.

9 a) T1 G1 M5 च (for तु) — b) Ś1 K (except K3) स्त्रियश्च ता, T1 G6 राजस्त्रिय — c) Ñ2 Dn प्रत्यर्चयामासुर्; T2 G2-5 प्रत्युद्ययांचक्रुर् Ś1 K1 Ñ3 G3.5.6 अदीनसत्त्वां

10 a) K (except K1) D5 S उदी(G3 °दै)क्ष्य, Ñ1 समी°, Ñ2.3 V1 B Da Dn D1.2.4 निरी° — b) K3.4 मत्तर्षभा° — c) K0.4 गूढोच्चमांगान्, K2.3 B5 D2 गू(K3 स्यू)ढोच्चतासान्, S व्यूढा(G3° ढा)तरासान्; Cd as in text K2 Ñ1 G1.3 M8.8 °गेंद्रभोगान् — d) G5 प्रगल्भयाहून्

11 a) Ñ1 मजना° (for सचिवा°) — b) Ś1 K D5 पौत्रा° (for राज्ञ) Ś1 प्रसवाश्च सर्वे (m as in text) — d) B5 Da D2 समापेदु°; M5 समासेदु°

12 a) K2 वीराश्च सर्वे परमा° — b) G1 पात्रो(! read °ठो)पपीठेषु, M7.8 सपादपी° — c) Ñ2.3 B (except B6) Dn D1.2.4 यथानुपूर्वं, T1 G1 °पूर्व्याद्, T2 G2.4 °पूर्व्ये — d) Ñ2.3 B1.2.3 Dn D1.4.5 G6 M6.7 तथा B6 Da D2 सिंहासनेषूत्तमभूमिपा यथा

13 b) Ś1 K1.4 V1 T1 G1.2.6 पात्रेषु Ś1 K1 V1 T1 G1.6 °राजतेषु — c) Ś1 K D5 सूदा° (for दासा°) D5 दासा° (for दास्य°) V1 प्रहृष्टरूपा A few MSS °वेशाः — d) Ś1 K2 भोज्यां(K2 °जा)धका°; K1 भोज्येनका, K3.4 Ñ2.3 V1 B D समोजका°, S भोज्य पर T1 चाप्यवजह्रुर्, T2 G4 च व्यप°, G3 च व्युप°; G6 चाप्यप°. Ñ1 भोज्य-प्रकारानुपजह्रुरश्चं

14 b) Ñ B1.6 D (except D2.4.5) यथात्मकामं, V1

ते तत्र भुक्त्वा पुरुषप्रवीरा
यथानुकामं सुभृशं प्रतीताः ।
उत्क्रम्य सर्वाणि वसूनि तत्र
सांग्रामिकान्याविविशुर्नृवीराः ॥ १४

तल्लक्षयित्वा द्रुपदस्य पुत्रो
राजा च सर्वैः सह मन्त्रिमुख्यैः ।
समर्चयामासुरुपेत्य हृष्टाः
कुन्तीसुतान्पार्थिवपुत्रपौत्रान् ॥ १५

इति श्रीमहाभारते आदिपर्वणि षडशीत्यधिकशततमोऽध्यायः ॥ १८६ ॥

१८७

वैशंपायन उवाच ।
तत आहूय पाञ्चाल्यो राजपुत्रं युधिष्ठिरम् ।
परिग्रहेण ब्राह्मेण परिगृह्य महाद्युतिः ॥ १
पर्यपृच्छददीनात्मा कुन्तीपुत्रं सुवर्चसम् ।
कथं जानीम भवतः क्षत्रियान्ब्राह्मणानुत ॥ २
वैश्यान्वा गुणसंपन्नानुत वा शूद्रयोनिजान् ।
मायामास्थाय वा सिद्धांश्चरतः सर्वतोदिशम् ॥ ३
कृष्णाहेतोरनुप्राप्तान्दिवः संदर्शनार्थिनः ।
ब्रवीतु नो भवान्सत्यं संदेहो ह्यत्र नो महान् ॥ ४
अपि नः संशयस्यान्ते मनस्तुष्टिरिहाविशेत् ।
अपि नो भागधेयानि शुभानि स्युः परंतप ॥ ५
कामया ब्रूहि सत्यं त्वं सत्यं राजसु शोभते ।

C 1 7223
B 1 195. 6
K 1. 210 6

°वकाशं; B3 यथा स्वकाम; B5 °थेकाम T3 G1-4 सहस — K2 om 14°-15ᵇ — °) Ś1 K (K2 om) Ñ2 3 V1 Dn D1 5 राजन् (for तत्र) — ᵈ) Cd cites साग्रामिकानि (as in text) K1 साग्रामिकान्यासुसुदुर्, Ñ1 2 V1 Dn D1 °मिक ते (D1 वै) विविशुर्

15 K3 om 15ᵃᵇ (cf. v l 14). — ᵃ) Ś1 K1 D2 तान्; B5 6 Dn3 D4 स; Da स (for तल्ल). — ᵇ) T G3-6 सर्वे G6 °मुख्या. — °) K0 3 Dn D1 समर्थया° Ñ1 B D3 4 समर्च(Ñ1 B1 °र्थ)यामास उपेत्य हृष्ट — ᵈ) Ś1 °पुत्रपौत्रै°; K1 2 Ñ3 °पुत्रपौत्रा ; Ñ2 Dn D1 °राजपुत्रान्, T1 °मुख्यपौत्रान्

Colophon *Major parvan* T3 G M सभव° (for आदि°) — *Sub-parvan* Ś1 द्रौपदीविवाह, K1-4 Ñ3 B Da Dn1.n2 D2 4.5 T3 G1 3 4 M5 द्रौपदी(Da1 D5 M5 om.)स्वयवर, T1 सभव — *Adhy name* K0 यज्ञासा (read जिज्ञासा); K4 D5 वर्णजिज्ञासा; T3 G1.3.4 पाडवपरिज्ञान — *Adhy no* (figures, words or both) Dn3 T1 193, D1m 197, D5 G2 144, T3 G4-6 145, G1 3 147, M 146 — *S'loka no* Da1 Dn 15, M3 16 — *Aggregate s'loka no* Dn2 7199.

187

1 Ś1 K (except K0) Da1 D2 S om उवाच — ᵃ) D5 S पाचालो — °) D1 प्रतिमहेण, G2 परिग्रहाणा — ᵈ) D1 प्रतिगृह्य K Da D2 5 महामति ; Ñ1 समद्युति..

2 ᵃ) Ś1 K D5 M5 °पृच्छदमेयात्मा — ᵇ) Ś1 T G3-5 M3 5 °पुत्रं युधिष्ठिर — Before 2ᶜᵈ, T1 ins द्रुपद — ᵈ) Ś1 K D5 ब्राह्मणान्क्षत्रियान् (by transp). G2 ब्राह्मणानुगान्

3 ᵇ) K2 Ñ V1 B D G2 3 M7 अथ वा — °) Ś1 G2 वै, Ñ1 व° (for वा) Ñ2 3 V1 B D (except D5) वा विप्रान् (D2 विप्राय) — ᵈ) B D3 4.5 G1 M6-8 चरत. K4 °तो दिश

4 ᵃ) Ñ V1 B (except B6) D (except Da) G3 M5 °प्राप्ता — ᵇ) K2 B6 Da देवान्, Ñ2 3 V1 B1 3 5 Dn D1 3 4 5 देवा (for दिव) — °) T3 G3.4 ब्रवीहि D5 यथासत्य — ᵈ) Ñ1 S ह्य(M3 5 -प्य)स्ति (for ह्यत्र) K0 विद्यते, K3 4 वर्तते (for नो महान्)

5 ᵇ) K3 T3 G1(by corr) 5 6 मनस्तुष्टिमिहा°, K4 मनस्तुष्टेरिहाविशत्, Ñ V1 B D मन संतुष्टिमापहेत् (V1 °विशेत्, Dn3 D4 °हरेत्), T1 G3 °ष्टिरिवाविशेत्; G2 °ष्टिरयाविशत्

6 ᵃ) Ś1 T1 G1 कामये, K1 D5 काम्यया, K4 Ñ2 3 V1 B Da Dn D1.2 4 इच्छया Ñ3 V1 Dn D1 तत्सत्य (for सत्य त्व) T3 G2-5 कामयानस्य ब्रूहि त्वं (G5 मे ब्रूहि), G6 कामयेय ब्रूहि सत्य — ᵇ) B3 साधुषु (for राजसु) Ś1 K D5 पूज्यते M7 सत्य ब्रूहि सुशोभते — °) K0 3 4 D5 तु; M6-8 न (for च) — ᵈ) S °स्य नानृत भवेत्

7 ᵃ) Ś1 स्वमर°, K1 परम°, Ñ1 °सकाश, D1 ह्यमृत°.

C. 1.7223 B. 1.193.6 K. 1.210.6

इष्टापूर्तेन च तथा वक्तव्यमनृतं न तु ॥ ६
श्रुत्वा ह्यमरसंकाश तव वाक्यमरिंदम ।
ध्रुवं विवाहकरणमास्थास्यामि विधानतः ॥ ७

युधिष्ठिर उवाच ।

मा राजन्विमना भूस्त्वं पाञ्चाल्य प्रीतिरस्तु ते ।
ईप्सितस्ते ध्रुवः कामः संवृत्तोऽयमसंशयम् ॥ ८
वयं हि क्षत्रिया राजन्पाण्डोः पुत्रा महात्मनः ।
ज्येष्ठं मां विद्धि कौन्तेयं भीमसेनार्जुनाविमौ ।
याभ्यां तव सुता राजन्निर्जिता राजसंसदि ॥ ९
यमौ तु तत्र राजेन्द्र यत्र कृष्णा प्रतिष्ठिता ।
व्येतु ते मानसं दुःखं क्षत्रियाः स्मो नरर्षभ ।
पद्मिनीव सुतेयं ते ह्रदादन्यं ह्रदं गता ॥ १०
इति तथ्यं महाराज सर्वमेतद्ब्रवीमि ते ।
भवान्हि गुरुरस्माकं परमं च परायणम् ॥ ११

वैशंपायन उवाच ।

ततः स द्रुपदो राजा हर्षव्याकुललोचनः ।
प्रतिवक्तुं तदा युक्तं नाशकत्तं युधिष्ठिरम् ॥ १२
यत्नेन तु स तं हर्षं संनिगृह्य परंतपः ।
अनुरूपं ततो राजा प्रत्युवाच युधिष्ठिरम् ॥ १३
पप्रच्छ चैनं धर्मात्मा यथा ते प्रद्रुताः पुरा ।
स तस्मै सर्वमाचख्यावानुपूर्व्येण पाण्डवः ॥ १४
तच्छ्रुत्वा द्रुपदो राजा कुन्तीपुत्रस्य भाषितम् ।
विगर्हयामास तदा धृतराष्ट्रं जनेश्वरम् ॥ १५
आश्वासयामास च तं कुन्तीपुत्रं युधिष्ठिरम् ।
प्रतिजज्ञे च राज्याय द्रुपदो वदतां वरः ॥ १६
ततः कुन्ती च कृष्णा च भीमसेनार्जुनावपि ।
यमौ च राज्ञा संदिष्टौ विविशुर्भवनं महत् ॥ १७
तत्र ते न्यवसन्राजन्यज्ञसेनेन पूजिताः ।

— d) G4 आस्थास्याम; M6-8 °स्यति, Cd as in text

8 Ś1 K1.2 S om. उवाच — a) G2 दुर्मना (for वि°) — b) D5 S पांचाल — c) Ś1 K ध्रुवं काम.. — d) K3 न संशय, B3 मशेषत° (for मस°)

9 c) Some MSS मा (for मां) — e) K4 Ñ2 Dn D1.3 आभ्यां — f) B1m विजिता G2 जन°

10 a) Ñ1 तत्र तु (by transp) Ñ2.3 V1 B D (except D5) M1-3 च, T G2-5 M2.6 तौ (for तु) Ñ2.3 V1 B D (except D5) कुंती च (for राजेन्द्र) K2 G1 इमौ यमौ च राजेंद्र (G1 माद्रेयौ) — b) Ñ2 Dn D1 व्यवस्थिता (for प्रति°) — c) M व्येतु — d) K2.4 S स्म (for स्मो) B3 S (except G2) नराधिप — f) Ñ V1 B3 Dn1.n3 D1 G1 M7 अन्यह्रद Ś1 K D5 T1 ह्रदाद्ध्रदमि(K2 °द् ह्र)वागता

11 a) Ś1 K D5 G2 इति सत्य, T2 G3.4 इति तत्त्व B3 महाभाग — b) K0.2 B Da D4 G1 M3 सत्यम् (for सर्वम्) M6-8 एव (for एतद्) — c) Ś1 K D4.5 च (for हि)

12 Ś1 K1.2 D2 S om. उवाच (M2.5 om. the ref) — T1 (hapl.) om. 12b–13a — b) G1 हर्षगाकुल° — cd) Ñ3 प्रतिवाक्यं, D1 °कर्तुं, T1 °युक्त. K3 तथा युक्त; Ñ2 V1 Dn D1.2.3 मुदा युक्तो (D3 °क्तं) (for तदा युक्त) Ś1 K1.2 Ñ1 V1 नाशक्नोत्त S (T1 om) °क्तुं न शक्तोऽभूद्धर्मसूनु तदानघ

13 a) T1 om 13abc (cf. v. l. 12) K0.4 च (for तु) Da D2 स तु (by transp) K0.2.3 स (K3 प्र-) हर्षं वै, T2 G3.4 परं हर्षं — b) Ñ3 B6 Da D1.3 त्रिति°. B5 T2 G (except G5) M6-8 °तप — c) K3 Ñ1.2 V1 Dn D1 तदा (for ततो) Ś1 K1 Ñ3 V1 B D (except D5) वाचा; Ñ1 वाक्य, Ñ3 वाचं (for राजा)

14 a) K0.4 Ñ1 D5 पप्रच्छैनं स धर्मात्मा, S (G5 corrupt) पर्यपृच्छद्दीनात्मा — b) G2 यथा ते प्रद्रुत K (except K1) Ñ V1 B Da D1.4.5 M पुरात् — c) S तथास्मै S आचष्ट (for आचख्यौ) — d) Ś1 K (except K3) B1.3 Da1 D1.2.3 G1.2 °पूर्वेण B5 पार्थिव, G1 भारत.

15 d) Ñ1.2 V1 Dn D1 S (except M5) नरे°.

16 a) K0 D4 G1.2.6 तदा, K3 स तं — c) T1 G (except G3.4) M3.5 °जज्ञे स, M6-8 °जज्ञेय M3 राष्ट्राय K2 °जज्ञे वरार्हाय — d) S (except T1 G2 M5) ददतां

17 Before 17, M6-8 ins वैश° — c) G2 राज्ञा च (by transp) K0.3.4 Ñ1.3 Dn D1.4 T1 M5 सदिष्टं; B (except B5) Da D2 निर्दिष्ट, T2 G (except G3.4) M2.6-8 सदिष्टा — d) K2 भुवनोत्तमं

18 a) K1.4 Ñ2.3 V1 B D प्रत्याश्वस्त(K1.4 °श्वस्ता; D1 °गत)स्ततो, K2 प्रशान्तस्त्यास्ततो; S पर्याश्वस्ता(T2 G2-4 °श्वस्ता; G1 °श्वस्ता)स्तदा (M5 प्रत्याश्वास्य ततो) — d) Ñ1.3 V1 B D त (for तान्)

19 Before 19, T2 G2-6 M6-8 ins. द्रुपद G2

प्रत्याश्वस्तांस्ततो राजा सह पुत्रैरुवाच तान् ॥ १८
गृह्णातु विधिवत्पाणिमद्यैव कुरुनन्दनः ।
पुण्येऽहनि महाबाहुरर्जुनः कुरुतां क्षणम् ॥ १९
ततस्तमब्रवीद्राजा धर्मपुत्रो युधिष्ठिरः ।
ममापि दारसंबन्धः कार्यस्तावद्विशां पते ॥ २०

द्रुपद उवाच ।

भवान्वा विधिवत्पाणिं गृह्णातु दुहितुर्मम ।
यस्य वा मन्यसे वीर तस्य कृष्णामुपादिश ॥ २१

युधिष्ठिर उवाच ।

सर्वेषां द्रौपदी राजन्महिषी नो भविष्यति ।
एवं हि व्याहृतं पूर्वं मम मात्रा विशां पते ॥ २२
अहं चाप्यनिविष्टो वै भीमसेनश्च पाण्डवः ।
पार्थेन विजिता चैषा रत्नभूता च ते सुता ॥ २३
एष नः समयो राजन्रत्नस्य सहभोजनम् ।
न च तं हातुमिच्छामः समयं राजसत्तम ॥ २४
सर्वेषां धर्मतः कृष्णा महिषी नो भविष्यति ।
आनुपूर्व्येण सर्वेषां गृह्णातु ज्वलने करम् ॥ २५

द्रुपद उवाच ।

एकस्य बह्व्यो विहिता महिष्यः कुरुनन्दन ।
नैकस्या बहवः पुंसो विधीयन्ते कदाचन ॥ २६
लोकवेदविरुद्धं त्वं नाधर्मं धार्मिकः शुचिः ।
कर्तुमर्हसि कौन्तेय कस्मात्ते बुद्धिरीदृशी ॥ २७

युधिष्ठिर उवाच ।

सूक्ष्मो धर्मो महाराज नास्य विद्मो वयं गतिम् ।

C. 1. 7246
B. 1. 195. 29
K. 1. 210. 29

(? hapl) om 19–20 — b) Ñ2.3 B (except B6) Dn D1.4 S (except G6) अद्यैव K (except K1) D2 T3 G4.5 M6.8 °नन्दन — c) Ś1 K D5 महाराज — d) K2.3 फाल्गुन B6 D4 क्रियतां B6 क्षण

20 G2 om 20 (cf v l. 19) Before 20, Ñ2.3 V1 B D ins वैश° उ° (D2 om उ°), S (except G2 M8.6) वैश°. — a) Ñ V1 B D (except D5) तमब्रवीत्ततो राजा (Ñ1 राजन्) — b) Ś1 K Ñ1.2 V1 Dn D1.5 धर्मात्मा स (Ñ1.2 V1 Dn च), Ñ3 धर्मराजो — After 20^{ab}, M6–8 ins 1904* — Before 20^{cd}, M5 ins युधिष्ठिर — c) V1 D4 ममापि — d) Ś1 M5 तात (for तावद्) S (except G2) ins after 20 (M6–8, after 20^{ab})

1904* तस्मात्पूर्वं मया कार्यं यद्भवाननुमन्यते ।
[M6–8 °मस्यते]

21 Ś1 K1 S om उवाच — ab) Ñ3 B Da D2.4 transp विधिवत् and दुहितु° — d) D5 तस्मै Ñ3 B Da D2.4 कृष्णा (B3 कन्या) प्रदीयतां

22 Ś1 K1.3 S om उवाच — ab) Ś1 K Ñ2 V1 Dn D1.5 transp द्रौप° and महि° — c) Ñ2.3 V1 B Dn D1 प्र (B5 च) (for हि) — d) Ñ3 B (except B5) D2 महीपते

23 a) K0 चास्यनि°, D4 चास्या नि° — c) Ś1 K1 M5 पार्थेनाव(M5 °पि)जिता Dn चैव; M8 राजन्, M6–8 कृष्णा (for चैषा) — d) K0.2.4 D5 हि ते सुता, Ñ2.3 V1 B Da Dn D1.2.4 सुता तव

24 G2 M6–8 om 24 — b) K2 T3 G1.3.4 लब्ध°; K3 D2 अक्ष° (for रत्न°) — c) S (G2 M6–8 om) न चैन Ś1 K1 N1 T1 G3 M5 °मिच्छामि — d) D4 परम (for समय) — After 24, S (except G2 M6–8) ins.

1905* अक्रमेण निवेशे च धर्मलोपो महान्भवेत् ।
निर्जिता चैव पार्थेन रत्नभूता च ते सुता ।
[L. 2 = (var) 23^{cd}]

25 ab) Ś1 D5 transp धर्म° and महि°. — cd) K (except K3) Da1 D1 G3 आ(K2 D1 अ)नुपूर्वेण. T1 G1 सर्वे हि गृह्णीमो ज्वलने, T3 G2–6 M गृह्णतु सर्वेशो (M5 सर्वेशो गृह्णतु) ज्वलिते K (except K1) Ñ V1 B D करान्

26 Ś1 K1 S om उवाच — c) Ñ3 V1 B Da D2.4 तात; Cd Arjp पुंस° (as in text) — d) K2 प्रशमति कदा°, Ñ2.3 V1 B D श्रूयते पतयः क्वचित् — After 26, S ins

1906* सोऽयं न लोके वेदे वा जातु धर्मः प्रशस्यते ।

27 a) B5 त; T G च (for त्व) — b) Ś1 K अधर्मं (see below), Ñ1 नाधर्मो Ñ2.3 V1 B D धर्मवि(Da °व)च्छुचि (D1 धर्मक शुचि) — c) Ś1 K (except K1) कर्तुमिच्छसि (see above) — d) K0 कथ, K2 यस्मात् K3 B5 मतिर्; B3 भक्तिर् (m as in text), T1 कीर्तिर्

28 Ś1 K1.3 S om उवाच (G1 om the ref) — S ins after युधि° (G1, which om the ref., after 27)

1907* लोकधर्मविरुद्धोऽयं धर्मो धर्मभृतां वर ।
[T1 G1 M5 लोकवेदवि°, M8 लोकवेदावि°, M6–8 °वेदाद्वि°]

— b) S विद्म गतिं वय (T3 G3.4 स्वय) — c) Ś1 K (except K1) Ñ2.3 सर्वेषाम् K0.2.4 Da Dn1 D1.2.3 °पूर्वेण — d) B3 वर्त्मान्वयामहे, S तमनु(M5 तैरनु)यामहे

C. 1. 7246 B. 1. 190. 29 K. 1. 20. 29 पूर्वेषामानुपूर्व्येण यातं वर्त्मानुयामहे ॥ २८

न मे वागनृतं प्राह नाधर्मे धीयते मतिः ।
एवं चैव वदत्यम्बा मम चैव मनोगतम् ॥ २९

एष धर्मो ध्रुवो राजंश्चरैनमविचारयन् ।
मा च तेऽत्र विशङ्का भूत्कथंचिदपि पार्थिव ॥ ३०

द्रुपद उवाच ।

त्वं च कुन्ती च कौन्तेय धृष्टद्युम्नश्च मे सुतः ।
कथयन्त्विति कर्तव्यं श्वः काले करवामहे ॥ ३१

वैशंपायन उवाच ।

ते समेत्य ततः सर्वे कथयन्ति स्म भारत ।
अथ द्वैपायनो राजन्नभ्यागच्छद्यदृच्छया ॥ ३२

इति श्रीमहाभारते आदिपर्वणि सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥

१८८

वैशंपायन उवाच ।

ततस्ते पाण्डवाः सर्वे पाञ्चाल्यश्च महायशाः ।
प्रत्युत्थाय महात्मानं कृष्णं दृष्ट्वाभ्यपूजयन् ॥ १

प्रतिनन्द्य स तान्सर्वान्पृष्ट्वा कुशलमन्ततः ।
आसने काञ्चने शुभ्रे निषसाद महामनाः ॥ २
अनुज्ञातास्तु ते सर्वे कृष्णेनामिततेजसा ।

---

29 Before 29, G1 ins युधि°. — 29^{ab}–1 188 13^{ab} — ^{b}) Ś1 K1 नीयते Ko 2.4 N1 B Da D2 4 5 मन ; G3 गति.. — ^{c}) K1 एवमेव, Ñ1 एव च मे; D5 एव चैषा K2 मत मह्यं — ^{d}) Ñ V1 B Dn D1 2 4 मम चैतन्; Da सर्वमेतन्, S ममापि च — After 29, S ins
1908* आश्रमे रुद्रनिर्दिष्टाद्व्यासादेतन्मया श्रुतम् ।

30 T1 om 1. 187 30–188 6 — ^{a}) Ñ1 धर्म एव, S धर्म एष (G2 विप्तां, G3 -विरवा) — ^{b}) Ko Da चरेयम्; K2 चरित्रम्, K4 Ñ1 चरेनम्, B6 D2.5 चरेमम् K4 B6 Da D2 5 मा विचारयन् (Da °रय) S (T1 om) विचार्यैव (G6 °र्यैव, M6 यस्मादेषं) करोम्यहं — ^{c}) Ñ3 S (except G1, T1 om) तत्र (for तेऽत्र) Ñ1 मा च तत्र विशङ्को भू, Ñ2 3 V1 Dn D1 मा च शङ्का तत्र ते स्यात् — Ko om from ऽत्र (in 30^{c}) up to 31^{a} — ^{d}) Ñ1 कदाचिदपि S (T1 om.) न ह्यधर्मे मतिर्मम

31 T1 om. 31, Ko om. 31^{a} (cf v 1. 30) Ś1 K1 S om उवाच (T1 om the ref) — ^{a}) Ś1 कौंतेय कुन्ती च (by transp). — ^{c}) S (T1 om.) कथयित्वेति°. — ^{d}) Ko यत् (for श्व) K1 S (except G5 6 M6, T1 om) काल्ये

32 T1 om 32 (cf v 1 30) Ś1 K1 3 D2 S om उवाच — ^{a}) Ñ1 वच सर्वे — ^{b}) Ś1 K1 तानुत, M6–8 पाण्डवा (for भारत) — ^{c}) S (T1 om) ततो (for अथ) — ^{d}) S (T1 om) आजगाम (G1 M6 8 °गामा) विचिंतित (G3 आससाद महामुनि)

Colophon om. in T1 — *Major parvan* T2 G M समव° (for आदि°) — *Sub-parvan* Ś1 K3 द्रौपदी विवाह, Ko–2 4 Ñ3 B Da Dn1. n2 D2 4.5 T2 G3.4 M2 5 द्रौपदीस्वयंवर — *Adhy name* Ko 2 4 द्रुपदविमर्श , T2 G3 4 द्रुपदयुधिष्ठिरसंवाद° — *Adhy no* (figures, words or both) Dn2 194, D4m 198, D5 G2 145, T2 G4–6 146, G1.3 148, M 147 — *S'loka no.* Dn 33, M2 36 —*Aggregate s'loka no* Dn2 7232

188

1 T1 om 1 (cf. v 1 1 187 30) Ś1 K1.3 D2 S om उवाच — ^{b}) Ś1 K D5 द्रुपद°; S (T1 om) पाचाल° (G2 पार्थिव°) S (T1 om) महारथ — ^{d}) Ś1 K व्यास (for कृष्ण) Ñ2 3 B D (except D5) सर्वे (for दृष्ट्वा) N (except V1) ऽभ्यवाद(K1 °च)यन्

2 T1 om 2 (cf v 1 1) — ^{a}) T2 G (except G1.6) प्रत्यनदत् Ñ2 3 B Dn D1.2 4 स तां पूजा K2 तेनाभिनन्दिता सर्वे — ^{b}) Ko Da Dn1 दृष्ट्वा K2 3 D2 S (T1 om) च कुशलं तत — ^{c}) K1 Ñ2 3 B5 Dn शुद्धे K2 मासनेषु महार्हेषु; V1 आसने रुचिरे मृष्टे — ^{d}) S (T1 om) °मुनि (M3 °मति) K2 निषेदुस्ते परतपा

3 T1 om 3 (cf. v 1. 1), K2 om 3, G2 om 3–4 — ^{a}) Ñ1 तत ; G5 च ते (for तु ते) — ^{b}) Ś1 K (K2 om) व्यासेन (for कृष्णेन) K3 अमितबुद्धिना, D5 अक्लिष्टकर्मणा — ^{d}) Ś1 K (K2 om.) ते परतपा (Ś1 K1 °प); D5 ते महातपा (for द्विपदां वरा)

आसनेषु महार्हेषु निषेदुर्द्विपदां वराः ॥ ३
ततो मुहूर्तान्मधुरां वाणीमुच्चार्य पार्षतः ।
पप्रच्छ तं महात्मानं द्रौपद्यर्थे विशां पतिः ॥ ४
कथमेका बहूनां स्यान्न च स्याद्धर्मसंकरः ।
एतन्नो भगवान्सर्वं प्रब्रवीतु यथातथम् ॥ ५

व्यास उवाच ।

अस्मिन्धर्मे विप्रलब्धे लोकवेदविरोधके ।
यस्य यस्य मतं यद्यच्छ्रोतुमिच्छामि तस्य तत् ॥ ६

द्रुपद उवाच ।

अधर्मोऽयं मम मतो विरुद्धो लोकवेदयोः ।
न ह्येका विद्यते पत्नी बहूनां द्विजसत्तम ॥ ७
न चाप्याचरितः पूर्वैरयं धर्मो महात्मभिः ।
न च धर्मोऽप्यनेकस्थश्चरितव्यः सनातनः ॥ ८
अतो नाहं करोम्येवं व्यवसायं क्रियां प्रति ।
धर्मसंदेहसंदिग्धं प्रतिभाति हि मामिदम् ॥ ९

धृष्टद्युम्न उवाच ।

यवीयसः कथं भार्यां ज्येष्ठो भ्राता द्विजर्षभ ।
ब्रह्मन्समभिवर्तेत सद्वृत्तः संस्तपोधन ॥ १०
न तु धर्मस्य सूक्ष्मत्वाद्गतिं विद्मः कथंचन ।
अधर्मो धर्म इति वा व्यवसायो न शक्यते ॥ ११
कर्तुमस्मद्विधैर्ब्रह्मंस्ततो न व्यवसाम्यहम् ।
पञ्चानां महिषी कृष्णा भवत्विति कथंचन ॥ १२

युधिष्ठिर उवाच ।

न मे वागनृतं प्राह नाधर्मे धीयते मतिः ।
वर्तते हि मनो मेऽत्र नैषोऽधर्मः कथंचन ॥ १३
श्रूयते हि पुराणेऽपि जटिला नाम गौतमी । C 1 7235 B 1 190 14 K 1 211 14

---

4 T1 G2 om 4 (of v 1 1, 3) — b) G6 वाचम्. — c) B1 8 पर्यपृच्छन्महा°. — d) Ñ1.2 V1 Dn D1 S (T1 G2 om) द्रौपद्यर्थे K (except K1) Ñ1 2 V1 Da Dn D1 विशा पते, Ñ8 B D4 स्वयवरे; D2 5 महामते; S (T1 G2 om) महामुने

5 T1 om 5 (of v 1 1) Before 5, S (except T1) ins द्रुपद — a) V1 न चैवैका य° — b) Ś1 K1 वा (for च) Ñ2 Dn D1 धर्मपत्नी न संकर — c) Ñ2 8 Dn D1 5 एतन्मे

6 T1 om 6 (of. v. 1 1) K1.2 S om उवाच — a) D5 विरुद्धे हि; G1 M विप्रलुप्ते; Cd as in text Cf Winternitz, *JRAS* 1897 740 (footnote 1) — b) K4 कथं (for लोक) K (except K3) °धिनि, B5 °धने; D2 °विरुद्धके; S (T1 om) °धिते — d) K2 4 M (except M5) तत्वत (for तस्य तत्)

7 Ś1 K1 2 S om उवाच — a) K0 4 मम मति Ñ1 अधर्मोय मतो विद्धि — b) K0 विरुद्धो वेदलोकयो, G2 लोकवेदविरुद्धयो — c) Ñ1 युज्यते T1 भार्या (for पत्नी)

8 G3 om 8c–11b — c) Ś1 K0 1 8 अनेक सन्, K3 अनेकस्मिन् K4 Ñ V1 B D न चाप्यधर्मो विद्वद्भि — d) Ñ V1 B D कथचन (for सना°)

9 G3 om 9 (of v 1 8) — a) K0 4 Ñ2 V1 D1 T1 G1 ततो; Ñ8 कथ (for अतो) Ñ2 8 V1 Da D1 2 S °म्येन (M6-8 °म्येतत्); B °म्येत — b) T2 G8-6 सुतां प्रति, G1 तु यां प्रति — c) Ñ2 8 V1 Dn धर्मं संदेव संदिग्ध — d) B Da D2 4 च; T1 G6 तु (for हि) K3 मम त्विदं; Ñ1 हि मापि च; Ñ2 8 Dn D1 हि मे त्वयं

10 G2 om 10 (of v 1 8) Ś1 K1 S om. उवाच — b) G5 भ्राता ज्येष्ठो (by transp) Ś1 K1 नरर्षभ — d) N8 सम्मृत सन्, V1 न सद्वृत्तस्

11 G2 om 11^{ab} (of v. 1. 8) — a) D5 सूक्ष्मस्य — b) K2 T2 G1 3-5 विद्म, D5 T1 G6 वेद्मि, M5 विदु B5 D2 न क(D2 कां)चन — Ñ1 (hapl) om 11^{c}–12^{d}. — c) T1 G1 5 6 M च (for वा) G2 न च धर्मोधर्म इति.

12 Ñ1 om 12 (of v 1 11) — a) V1 °द्विधैर्युक्त. — b) T2 G3-6 अतो न; M6-8 ततोन्य (M6 °न्यद्) Ñ2 B (except B5) D ततोयं न (D5 च) व्यवस्यते (B3 D1 °ति), T1 न व्यवसाम्यह तत°

13 13^{ab}=1 187 29^{ab} — Ś1 K1.2 S om उवाच — b) K0 2 4 विद्यते (for धीयते) Ñ1 8 B Da D2 4 मन — c) S (except T1) च (for हि) K4 निमित्तो मे; B5 मनो मे तु — d) Ś1 K1 4 G2 नैष धर्म, Da1 नैको धर्म°

14 a) K4 D5 transp हि and अपि S पुराणेषु — b) S जटिलो नाम गौतम — After 14^{ab}, S ins
1909* तस्य पुत्री महाप्राज्ञा गौतमस्य यशस्विनी ।
[T2 G3.4 जटिलस्य (for गौतम°) G2 यशस्विन]
— c) K3 ऋपि मे ध्यायिनवती (sic), B1m Cd ऋषी नुद्दाहितवती — d) K0 2 4 Ñ2 8 V1 B1.8 Dn D1 2 S सप्त (as in text), the rest सर्व K0 यरे, K2 8 N V1

G. 1. 7225 B. 1. 195. 14 K. 1. 211 14

ऋषीनध्यासितवती सप्त धर्मभृतां वर ॥ १४
गुरोश्च वचनं प्राहुर्धर्मं धर्मज्ञसत्तम ।
गुरूणां चैव सर्वेषां जनित्री परमो गुरुः ॥ १५
सा चाप्युक्तवती वाचं भैक्षवद्भुज्यतामिति ।
तस्मादेतदहं मन्ये धर्मं द्विजवरोत्तम ॥ १६

कुन्त्युवाच ।

एवमेतद्यथाहायं धर्मचारी युधिष्ठिरः ।
अनृतान्मे भयं तीव्रं मुच्येयमनृतात्कथम् ॥ १७

व्यास उवाच ।

अनृतान्मोक्ष्यसे भद्रे धर्मश्चैष सनातनः ।
न तु वक्ष्यामि सर्वेषां पाञ्चाल शृणु मे स्वयम् ॥१८
यथायं विहितो धर्मो यतश्चायं सनातनः ।
यथा च प्राह कौन्तेयस्तथा धर्मो न संशयः ॥ १९

वैशंपायन उवाच ।

तत उत्थाय भगवान्व्यासो द्वैपायनः प्रभुः ।
करे गृहीत्वा राजानं राजवेश्म समाविशत् ॥ २०
पाण्डवाश्चापि कुन्ती च धृष्टद्युम्नश्च पार्षतः ।
विचेतसस्ते तत्रैव प्रतीक्षन्ते स तावुभौ ॥ २१
ततो द्वैपायनस्तस्मै नरेन्द्राय महात्मने ।
आचख्यौ तद्यथा धर्मो बहूनामेकपत्निता ॥ २२

इति श्रीमहाभारते आदिपर्वणि अष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥

B Dn D1 2 4 5 वरा, Da1 वरा, Da2 वर ; S (except G1) वरान् — After 14, K4 Ñ1 2 V1 (om line 1) Dn D4 5 S ins

1910* तथैव मुनिजा वार्क्षी तपोभिर्भावितात्मन ।
संगताभूद्दश भ्रातॄनेकनाम्न प्रचेतस ।

[(L. 1) K4 मनुजा वार्क्षी, T G3 4 (by corr) 6 मृगदावाक्षी G1 स्राक्षी; G2 दक्षी (for वार्क्षी) S भावितान्मुनीन् (M2 °नृपीन्) — (L 2) T1 G1 M दशोपतस्थुषी भ्रा°, T2 G4-6 दशाभजदपीन्भ्रा°; G3 दशागच्छत्सु महर्षीन्; G2 दश प्राचेतसो भ्रा°]

15 a) K2 तद्, Ñ2 3 Dn D1 हि (for च) — b) Ś1 K Ñ2 3 Da Dn धर्म्य B3 D1 S धर्मभृता वरा (B3 D1 T1 M1 वर, G3 वर ; G6 वर) — d) D1 T1 G1 जननी (for जनित्री) Ñ2.3 Dn D1 माता परमको गुरु°

16 a) Ś1 K D5 राजन्; Ñ1 वाक्य, V1 पार्थ, S वाचा — b) Some MSS भैक्ष्यवद् — c) Ko 3 4 Ñ B (except B6) Da D1 एतमह, V1 एतन्मत — d) K1 2 धर्म्यं Ñ2 V1 Dn D1 S पर धर्मं द्विजो(G1 नृपो)त्तम (T1 पर द्विजवरोत्तम)

17 Ś1 K1 S कुती (T1 पृथा) (all om. उवाच) — After the ref., S (except T1 G2 5 6) ins

1911* भुज्यतां भ्रातृभि° सार्धमित्यर्जुनमचोदयम् ।

— c) K2 (sup lin) Ñ2 3 B D यथा प्राह (D5 चाह), K3 4 T2 यथा चाह, G2 यथाहार्य G5 यथाभार्या, G6 यथाभार्य — d) Ś1 K1 Ñ2 3 V1 B3 D (except Da) मुच्येहम्

18 Ś1 K1 S om उवाच — a) Some MSS मोक्षसे — b) Ñ1 धर्मश्चापि, D5 धर्म एष — D2 5 (hapl) om 18c-19b — c) K4 Ñ2.3 V1 B Dn1 D1 T2 G2-6 नतु, Ñ1 न प्र°; T1 न हि Ś1 प्रेक्ष्यामि; K1 प्र, M2 पश्यामि (inf lin as in text) — d) K V1 Da पाचाल्य S वच

19 D2 5 om 19ab (cf v. l 18) — c) B3 6 Da D3 4 प्राह च (by transp), S चाप्याह (G1 चाह स)

20 K1 3 4 D2 S om उवाच — a) M6-3 अथ उ° — b) S कृष्णद्वैपायन Ñ3 स्वय; B Da D3 4 शुचि (for प्रभु) — d) V1 वासवेश्म

21 a) K2 B3 6 Da त्वपि; K3 चैव; D5 S त्वथ (for चापि) — b) K2.4 पार्थिव (for पार्षत) — c) K4 Ñ V1 B D विविशुस्तेपि (Dn D1 °श्चुर्यत्र) तत्रैव; S मिथ कथाभिस्ते तत्र — d) D5 S (except T1 G6) °क्षति

22 a) T G (except G1) द्वैपायनस्ततस्तस्मै (by transp) — b) S विशा पते — c) K1 तत्र यो धर्मो; Ñ1 D2 तद्यथाधर्मं; V1 तद्यथावृत्तं — After 22, K4 D1 S ins

